चातुर्वर्ण्यमविशेषात्॥ अग्निहोत्रादीनि कर्माण्युदाहरणं तेषु संदेहः किं चतुर्णां वर्णानां तानि भवेयुः उतापशूद्राणां त्रयाणां
वर्णानामिति। किं तावत्प्राप्तं॥ चातुर्वर्ण्यमधिकृत्य यजेत जुहुयादित्येवमादीनि श्रूयंते। अविशेषात्। नहि कश्चिद्विशेष उपादी
यते। तस्मान्न शूद्रो निवर्त्तते॥ ॥निर्देशाद्वा त्रयाणां स्यादग्न्याधेये ह्यसंबंधः क्रतुषु ब्राह्मणश्रुतिरित्यात्रेयः॥ ॥वाश
ब्दः पक्षं व्यावर्त्तयति त्रयाणामधिकारः स्यात्। कुतः अग्न्याधेये निर्देशात् अग्न्याधेये त्रयाणां निर्देशो भवति। वसंते ब्राह्मणो
ऽग्निमादधीत ग्रीष्मे राजन्यः शरदि वैश्य इति। शूद्रस्याधाने श्रुतिर्नास्तीत्यनग्निः शूद्रः। असमर्थोऽग्निहोत्रादि निर्वर्त्तयितुं त
स्मादग्निहोत्रं जुहुयात् स्वर्गकाम इत्येवमादिषु शूद्रस्याप्यधिकारश्रुतिर्नास्ति ब्राह्मणादीनेवाधिकृत्य सा प्रवर्त्तते। ते हि समर्था
म३ अग्नि[illegible]रा आहवनीयादयो न शूद्रस्याधियाना संस्कारशब्दत्वादाहवनीयादीनां तस्मादनधिकृतोऽग्निहोत्रादिषु शूद्रस्तात्रेपाम १२
न्ते स्म। निमित्तार्थेन बादरिः तस्मात्सर्वाधिकारं स्यात्॥ यदुक्तमनधिकारः शूद्रस्येति। तन्न सर्वं ह्यर्थिनमधिकृत्य यजेत सुव
र्ते सति प्रतिषेधवचने शूद्रान्नला वर्त्तते। [illegible]भावादिति। ~~सा[illegible]दिति~~। स्यादेवाग्निरर्थप्राप्तः कामश्रुति परिग्रह
प त्वेस मर्थो [illegible] न्य

क्त्वात्। अत्राह। नन्वस्य विधयश्चोदना ब्राह्मणादिसंयुक्ता न शूद्रस्योच्यते निमित्तार्थेन ताः श्रुतयो न प्रापिकाः कथं
निमित्तत्वमावायते तत्राहुः। ब्राह्मण आदधीत। वसंते राजन्यो ग्रीष्मे वैश्यः शरदि। ब्राह्मणादीनां वसंतादिभिः संबंधो
गम्यते। तेन वसंतादिसंबंधार्थो ब्राह्मणस्य इत्यवगम्यते। तथा चाध्यातिर्ने वाक्येन शूद्राभाववर्त्तितो भविष्यति। तस्माद्धार
रः। सर्वाधिकारं शास्त्रमन्यते स्मेति गम्यते। अपि वान्यार्थदर्शनाद्यथाश्रुति प्रतीयेत॥ ॥ अपि वेति पक्षो व्यावर्त्यते। यथा
श्रुत्येव प्रतीयेत। ब्राह्मणादयो ह्याधाने श्रूयंते तेन ब्राह्मणादिकर्त्तृकमाधानं वसंतादिश्च वर्णत्रयवसंतादिकालकं। तथा वेद
शूद्रवर्जितानामेवानुक्रमणं भवति। वार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यात्। पार्थुरश्मं राजन्यस्य रायोवाजीयं वैश्यस्य। शू
द्रस्य सामना मनंति। तथा पयोव्रतं ब्राह्मणस्य यवागू राजन्यस्य आमिक्षा वैश्यस्येति। तथा चानेष्टस्तु प्रक्रमे पुरा ब्राह्मणोग्नि
माद्धीत एकादशाहस्तु राजन्यो द्वादशाहस्तु वैश्य इति। एवम ब्रह्मसामक्रमव्रतक्रमप्रक्रमकं च शूद्रस्य प्रयुक्तमपि क्रमेणैव
लं स्यात्। तस्मान्न शूद्रेणानुष्ठानं यत्नेतव्या॥ ॥निर्देशात्तु पक्षे स्यात्॥ नैतदेवं शूद्रस्याधानाभावादनधिकारोऽपि हेत्वादिषि
ति अस्ति हि शूद्रस्याधाने य एवं विद्वानग्निमाधत्त इति रथकारस्य सामान्येन। इदमपि निमित्तार्थं भविष्यति। तस्मात्सर्वाधिकारं शा॥

स्वर्गं न विन्दुमर्हतीति ॥ वैगुण्यान्नेति चेत् ॥ अथ यदुक्तं ब्रह्मसामकल्पव्रतक्रमप्रक्रमकं च शूद्रस्य कर्म्मण्यनुक्तमपि फलं न सा
धये तद्वैगुण्यमिति तत्परिहर्त्तव्यं ॥ न काम्यत्वात् । न एष परिहारः काम्यत्वात् । काममपिध्यते शूद्रः अभीवर्त्तं नाम ब्रह्मसाम तत्र
नारम्भ किंचिदाम्नातं तत्र विशेषेण एव वक्तुर्विमित आहुः आदिदित्तिश्च नियतप्रक्रमेषु शूद्रस्य नियम्य ते व्रते पि मन्त्रु शूद्रस्येति संव
मी० त्सर्णानादव्यवसीयते स्ये व शूद्रस्य । तस्माद्ब्राह्मणवर्णपमभिप्रियेत संस्कारे च तत्प्रधानत्वात् ॥ व्रते च विशेषो वगम्यते तत्त्व वा
नत्वं । पुरुषप्रधानं हि व्रतं । किमतो यद्युरुषप्रधानता एतद् तो भवति पुरुषप्रधानैः संस्कारैर्न शक्नोत्यनुपसंक्रम्य माणत्वस्यापि
कारं व्याव्रत्यितुं न तत्कथमिति । यद्येतेनापि हि स्वर्गकाममभिधीयमाने तत्कामः शूद्रो नाभिहित इति कथं गम्यते । किं हि सर्वागस्य पुरुषनिर्वे
र्त्तनं निर्वर्त्तयति । उक्तमिति चेत् । न सामर्थ्यो पदाननाय हि तथा सैव चोद्यते तस्यैव तेन विना न सा मर्थ्यं नाम्नस्य । एष एव हि व्रत
स्यांगभावो यत्कर्त्तारं समर्थं करोति यस्य तु तेन न प्रयोजनं न स तदनपेक्षैव यागमभिनिर्वर्त्तयति तस्माद् शूद्रवर्जं । अपि वा राम
वेदनिर्देशादपशूद्राणां प्रतीयते । एवं न पापकारिणी श्रवणानीत्युक्तं । शास्यते तु वक्तुं पापकारिणीति । न च सूत्रकारेणोक्तं अपशिष्टं १३
नैमित्तिकेष्वपि तेषु यस्तु ब्राह्मण एव शूद्रस्य मुद्रासो वक्तुमिति । न तद्दर्शने हेत्वन्तरं व्यपदिष्टं । अपि वेति पक्षव्यावर्त्तनं एव मपि सा ति

नैमित्तिकेपि चाध्ययनलक्षणे विधिश्रवणे सति अपशूद्राणामेवाधिकारः। कुतः। वेदानर्हत्वात् वेदेध्ययनं निर्दिष्टो भवति। वसंते ब्राह्म
न णमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यमिति। वेदाभावात् असमर्थः शूद्रोपि तस्मान्नाधिक्रियेत॥ गुणार्थत्वान्नेति चेत्॥ गुणेना
यनेनार्थिनः शूद्रोनुपनीतः स्वयमुपेत्याध्येते। तथासम्यगर्थं ज्ञास्यत इति॥ संस्कारस्य तदर्थत्वात् विद्यायां पुरुषश्रुतिः॥॥
उच्यते। विद्यायामेवायं पुरुषश्रुतिः उपनयनस्य संस्कारस्य तदर्थत्वात्। विद्यार्थिनं मुखाचार्यस्य समीपमानीय तेनैष्टार्थं उपे
कर्तुं सैषा विद्यायां पुरुषश्रुतिः कथमवगम्यते। आचार्यकरणमेतदभिधीयते। कुतः। आलंभनपददर्शनात्। नयतिराचार्यकरणेव ना४
र्तते तदर्थत्वं च याऽऽद्युपनयनमाचार्यकरणं प्रयुक्तं वेदाध्यापनेनाचार्यो भवति। तस्माद्वेदाध्ययनेन ब्राह्मणादयः। अतः शूद्रस्यान
धीतवेदाध्ययने अनीतो वेदत्वात् असमर्थः शूद्रो नाधिक्रियत इति। विद्यानिर्देशान्नेति चेत्। इति वेत्यपपत्तिश्च वैद्यत्वादसामर्थ्यं ह्य
विद्वान् शूद्र इति। नैष दोषः। विद्यानिर्देशात् विद्यानिर्देशस्य तनुक्रामयिष्ये अध्यापयत इति। आकतेशन्नतमप्प्रत्येतं। तस्मात्तत्तत्रास्य म३
विकारः॥॥ अवैद्यत्वादभावः कर्माणि स्यात्॥ ननु नैतदस्ति शूद्राध्यापयत इति प्रतिषिद्धमस्याध्ययनं न शूद्रेण श्रोतव्यमि
ति। अधीयानस्याप्यध्ययनं सफलं न भवति दोषश्च। जायते अतो वैद्यः शूद्रः अस्याभावः कर्माणीति सिद्धं। अथापि वैद्यत्वेनन

सिध्येत्तथाप्यनग्नित्वादभावः कर्मणि स्यात्॥ अथ कथमनग्नितेति। आपकाणी हि ब्राह्मणादीनामाधानवाक्यानि। ननु
य एवं विद्वानग्निमाधत्त इत्याधानस्य विधायकं। तं उ. ब्राह्मणो वसंतेग्निमादधीतेति निमित्तार्थानि वचनानीति गम्यते। अत्र
अनेन ब्राह्मणेनाग्निमादधीतेति तिष्ठतापि विधानं गम्यते। य एवं विद्वानग्निमाधत्त इति कृत्वा। तदानुमानिकं प्रत्यक्षश्रुतात् दुर्बलं
। तस्मादापकाणि वचनानि॥ अतः शूद्रस्यानधिकारः॥ तथा चान्यार्थदर्शनं॥ ॥ अन्यार्थदर्शनं च भवति यथा न शूद्रस्याध्य
न पिबति किं लिंगं भवति। यज्ञुवाप्तत्तयमथा नं य शूद्रः। तस्मा शूद्रसकाशेना ध्येयमिति अनध्ययनं शूद्रस्य दर्शयति। तस्मादपशू
द्राणामधिकारः। नत्वाहवनीयादिनापि यागो वचनप्रामाण्याच्छूद्रस्य विधीयते। नात्र यागस्यानो विधीयते स्वर्गकामस्य
। किं तर्हि स्वर्गफलता विशिष्टस्य। तस्मादसंभवः शूद्रस्याग्निहोत्रादिषु॥ ॥ त्रयाणां द्रव्यसंपन्नः कर्मणो द्रव्यसिद्धित्वात्॥ अ
ग्निहोत्रादिषु वसंदेहः किमद्रव्यस्याधिकारो नेति उच्यते। त्रयाणां द्रव्यसंपन्नो ऽधिक्रियेत नाद्रव्यः कुतः। नहि शक्नोत्यद्रव्यो द्रव्यसंयु
क्तं कर्मानुष्ठानं। तस्मादद्रव्यस्यानधिकारः॥ ॥ अनित्यत्वात्तु नैवं स्यादर्थाद्धि द्रव्यसंयोगः॥ नैवं स्यादद्रव्यस्यानधिकार इति। कुतः।
। अनित्यत्वादनित्यो द्रव्यसंयोगः। नहि कश्चिज्जातमात्र एव पुरुषः अस्तुपापो येन द्रव्यवान् भवति। यः शक्नोति यष्टुं तस्य यज्ञे नेति

उद्यतो
राम
१४

१२

वाचको भवति। येन कथंचिदपि शक्नोति यागमभिनिर्वर्त्तयितुं तत्राधिकार इति यजेतशब्दः यस्तु केनचित्प्रकारेण शक्नोति
नं तं वर्जयित्वा प्रवर्त्तते। अर्थाद्द्रव्यसंयोगो भवति ज्ञायते विना धनेन नैतदुपपन्नं तस्मादर्थाद्द्रव्यसंयोगः॥ ८ ॥ ॥ अंगहीनश्च
तद्धर्मा॥ ॥ अथ येषामंगहीनं प्रति संदेहः। किमसावधिक्रियते उत नेति। तत्रापि विकरणातिदेशः। असमर्थ इति तुल्यः पूर्वपक्षः॥ आक्षे
विद्यमानत्वादुत्तरः। यदिदमभिधीयते अंगहीनश्च तद्धर्मा। किं धर्मा। अद्रव्यधर्मा इति॥ ॥ उत्पत्तौ नित्यसंयोगात्॥ ॥ यस्य तत्प्रति
समाधेयमंगवैकल्यं तं प्रति विचारः। किं अधिक्रियते नेति। पूर्वाधिकरणेनाधिक्रियत इति प्राप्ते ब्रूमः। नाधिक्रियत इति। कुतः। त्र्यंगस्याभा
वात्। नासौ केनचिदपि प्रकारेण शक्नोति यष्टुं। तस्मात्तस्याधिकारो न गम्यते। ननु यः शक्नोति तत्राधिक्रियत इति। यस्तु विकलो वि
नाप्यावेक्षणेन विना विमुक्तकर्मैः। पंगुर्विना प्रैषादिश्रवणे नवबधिरः। एतान्पदार्थान्प्रति यस्तु विकलादीनामनधिकार इति। ने
त्युच्यते। नाप्यावेक्षणादि पुरुषं प्रति निर्दिश्यते यदि हि तं प्रति निर्दिश्यते ततो विकलोप्यधिक्रियेत। क्रतुं प्रत्येषामुपदेशः। प्रकरणा
विशेषात्। पुरुषस्य चाख्यातेनानभिधानादित्युक्तमेतत्। विधिर्वा संयोगान्तरादित्यत्र। तैश्च विना विगुणं कर्म्म प्रयुक्तमपि न फलसाध
कं तस्मात्तस्यानधिकारः॥ ॥ अत्रार्षेयस्य हानं स्यात्॥ ॥ दर्शपूर्णमासयोः श्रूयते आर्षेयं वृणीत एकं वृणीते द्वौ वृणीते त्रीन्व

वृणीतेन चतुरो वृणीतेन पंचातिवृणीते नपंचातिवृणीत इति तत्र संदेहः। किमनार्षेयस्याधिकारः॥ उत नेति॥ किं प्राप्तं॥ अ
नार्षेयोप्यधिक्रियेत इति। कुतः। आर्षेयं वृणीत इति सामान्यवचनं तस्मादेकं वरिष्यति द्वौ वा। नन्वत्र श्रूयते एकं वृणीते द्वौ वृणीत
न इति। तथा प्रतिषेधः न चतुरो वृणीत इति न पंचातिवृणीत इति। न चाप्राप्तस्य प्रतिषेधोवकल्पते तस्मादनार्षेयोप्यधिक्रियेत। एवं प्राप्ते
ब्रूमः। नानार्षेयः सन्नाधिक्रियेत। कुतः। त्रीन्वृणीत इति विशेषवचनात्। विधिमिश्रमाम्नानत्वात्। नन्वेकं वृणीत इत्यपि विशेषवचनमस्ति।
नेत्युच्यते। विध्यधिकारे नाम्नानाभावात्। ननु तस्य तावद्विधास्यते यथा त्रीन्वृणीत इति॥ उच्यते। त्रयाणामेवक्तं तस्मात्रित्वं विधास्यति। ए
कं वृणीत इत्यस्य वचनस्यानुवादोयं त्रयाणामेव। तत्रापि त्रित्वमेव कल्प्यते विधातुं॥ एवं चैकवाक्येनैकं विधानं भविष्यतीति। न चतुरो वृणीतेन
पंचातिवृणीत इति नित्यानुवादो भविष्यति। तस्मादनार्षेयस्याधिकारो नानस्येति सिद्धं॥ ॥ वचनाद्रथकारस्याधानेस्य सर्वशेषत्वात्।
आधाने श्रूयते वर्षासु रथकार आदधीतेति। तत्र संदेहः। किं त्रैवर्णिकानामन्यतमो रथकारः अहोस्वित्त्रैवर्णिक इति। किं प्राप्तं रथकारस्या राम
त्रैवर्णिकस्याधानमेतत्। कुतः। वचनात्। नहि वचनस्यातिभारोस्ति। सर्वशेषत्वात्त्रैवर्णिकस्याधानेन ब्राह्मणराजन्यविशामुक्त १५
माधाने परिशेषादत्रैवर्णिको रथकारः स्यात्॥ ॥ न्याय्यो वा कर्मसंयोगाच्छूद्रस्य प्रतिषिद्धत्वात्॥ न्याय्यो वास्यात्त्रैवर्णिको रथकारः स्य
र्णि

कर्मण्यविशेषेणोच्यते। शूद्रोऽप्यसमर्थत्वात्प्रतिषिद्धः॥ तस्मात्त्रैवर्णिको रथकारः स्यात्॥ ॥ अकर्म्मता तु नैवं स्यात्॥ ॥ नास्ति
त्रैवर्णिको रथकारः। प्रतिषिद्धं हि तस्य शिल्पोपजीवित्वं त्रैवर्णिकत्वे सति तस्माद्वचनप्रामाण्यस्याधास्यते॥ ॥ आनर्थक्यं च सं
योगात्॥ ॥ ब्राह्मणादिषु वसंतादयो नियताः तान्प्रतिबध्यमाना अश्वसंबंधाधानमनर्थकं प्राप्नुयुः। तस्मात्त्रैवर्णिको रथकार इ
ति॥ गुणार्थेनेतिचेत्॥ ॥ एवं चेत्तत्प्रसिनास्ति त्रैवर्णिको रथकारः प्रतिषिद्धत्वाच्छिल्पोपजीवित्वस्येति। गुणार्थत्वेन कश्चित्त्रैविष्य
तिरथकारो वेतन्नानतस्येदमाधानं विज्ञायते॥ ॥ उक्तं निमित्तत्वं॥ उक्तमेतदस्माभिः न निमित्तार्थान्येतानि श्रवणानीति। किमतो यदि
न निमित्तार्थानि एतदतो भवति। आप्रकाणीति। प्राप्तितत्वात्तेषामाधानस्य पुनः श्रवणमनर्थकं तेन यस्याप्राप्तं तस्य भविष्यतीति।
अप्राप्ये तेनैतदेकं निमित्तार्थं भविष्यतीति। नैतदेवमवकल्पते। वसंतादिसंयुक्तं तत्कथमिव वर्षाभिः संबध्येत। अपिच प्रापकं पदे
आधाने विधीयते। अतो निमित्तपक्षे पुनर्वर्षा विधातव्यास्तावदेतन्नश्रुतिः अश्रुवाक्यादकलीयसीति। तस्मादत्रैवर्णिकस्येदमाधानमिति।
सौधन्वनानां हीनत्वान्मंत्रवर्णात्प्रतीयेरन्॥ ॥ न तु सर्वेषां त्रैवर्णिको रथकारः सौधन्वनेद्द्रमेष जातिवचनः शब्दः सौधन्वना नू
मजातिरभिधीयते। हीनत्वात् किंचित्त्रैवर्णिकेभ्यो जात्यंतरेणानुश्रुतान वैरूपानत्त्रविद्यातेषामिदमाधानं। कथमवगम्यते। प्रसिद्धं मंत्र

वार्षिक्यः। मंत्रवर्णो हि भवति सौधन्वना ऋभवः सूरचक्षस इति। ऋभूणां त्वेति रथकारस्याधानमंत्रः। तस्मात्सौधन्वना ऋभव उ-
ति। ऋभवश्च रथकाराः। अपि च नेमिं नयंति ऋभवो यथेति। ये नेमिं नयंति ते ऋभव इत्युच्यंते। रथकाराश्च नेमिं नयंति तस्मादत्रैवर्णिका-
नामसूत्राणामेतदाधानमिति॥ ॥१२॥ ॥स्थपतिर्निषादः स्याच्छब्दसामर्थ्यात्॥ वास्तुमध्ये रौद्रं निर्वपेत्। यत्र रुद्रः प्रजाः शमय-
तीत्येतामिष्टिं प्रकृत्योच्यते। एतया निषादस्थपतिं याजयेदिति। निमित्तार्थः विकल्पस्मिन् षादस्थपतौ प्रति संदेहः। किमधिकृतानामन्य-
तम उतान्य एवेति किं प्राप्तं॥ अन्यतम इति ब्रूमः। सा हि समर्था। विद्वत्त्वादग्निमत्त्वाच्च तेभ्योऽन्यस्याविद्वत्त्वादनग्नित्वाच्चासमर्थ इति। ननु निष-
दस्थपतिश्रवणं तत्र नोपपद्यते। उच्यते न नोपपद्यते निषादानां स्थपतिरिति षष्ठीसमासो भविष्यति श्रेष्ठो निषादानां तस्मादधिकृता-
धिकारमेतच्छास्त्रमिति। एवं प्राप्ते ब्रूमः। स्थपतिर्निषादः स्यात्शब्दसामर्थ्यात्। निषादस्थपतिर्निषादं वक्तुमर्हति कस्मात्शब्दसामर्थ्यात्। एव
निषादं हि निषादशब्दः शक्नोति वदितुं श्रवणेनैव निषादानां तु स्थपतिं लक्षणया ब्रूयात्। श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या न राम
लक्षणा। अपोद्यते नैष दोषः निषादशब्दो निषादवचन एव षष्ठी संबंधस्य वाचिकेति तत्र षष्ठ्या अश्रवणात्। नात्र षष्ठीं शृणुमः। अ- १६
हलोपसामर्थ्यात्षष्ठ्यर्थोऽवगम्यत इति। सत्यं गम्यते न तु लोपेन। केन तर्हि निषादशब्दसामर्थ्येन लक्षणया॥ तस्मात्प्रदेवत्यमि

त्पुरुं। समानाधिकरणे समासस्त्वबलीयान्। तत्र हि स्वार्थे शब्दौ द्वौ भवतः॥ द्वितीयाविभक्तिस्तु त्रेणे नान्यां संबं
ध्नते। तेन द्वितीयानिर्दिष्टो निषादो गम्यते तत्र षष्ठ्यर्थे कल्प्यमाने लक्षणा तेन बलीयान्। तस्मान्निषाद एव स्थपतिः स्यात्॥
लिंगदर्शनाच्च॥ लिंगं च दृश्यते कूटं दक्षिणेति निषादस्य द्रव्यं ददातीति। कूटं हि निषादानामेवोपकारकं नार्याणामेवं स्वमे
[illegible] वत[illegible]भिति॥ ॥ इति शाबरे मीमांसाभाष्ये षष्ठाध्यायस्य प्रथमः पादः समाप्तः॥ ॥ ॥ पुरुषार्थैकसिद्धित्वात्तस्य तस्याधिकारः स्या
त्॥ शास्त्रा॥ द्वेनयजा कामं याजयेत॥ तथा ऋद्धिकामा उपेयुः तथा तत्र तत्रैव कामाः सत्रमुपेयुः॥ सप्तदशावरा। चतुर्विंशा
तिपरमाः सत्रमासीरन्निति। तेषु संदेहः। किं तस्य तस्य स्वेन फलेनार्थिनः सर्वेऽधिकारः। उत पर्षदोऽर्थिन्या अधिकार इति।
आह ननु अर्थिनाव ऊर्ध्वसंख्या विशिष्टा निर्दिश्यन्ते कथमेकाकमेकैकस्याधिकारो भविष्यतीति। उच्यते। ऋद्धिकामा उपेव
वस्तेषु मादिभिर्विधीयमानमृद्धिलक्षितेषु समस्तेषु नपाकेन्तरा कांवकृत वचनेन विशेषं वक्ष्यापयितुं। तेन तानमधिकृत्यैव पर्षदं
भिभवतीति संदेहः। किं प्राप्तिरेकैकानन्तरमथ्योवच्छक्लेकं सत्रेऽपि रथि तु यथेष्टं त्वकर्त्री मर्थिनीमेवावगच्छामः। नवा कर्तुः फलमव
गानवैकः कर्तोयते। तस्मात्समस्तानां फले एकैकस्य फलाव गवोमध्यकैकस्या कृत्स्नं फलमित्येवं प्राप्ते ब्रूमः। तस्य तस्या

र्थिनः कृत्स्नं फलं सत्रात् भिर्वर्तते। अतः पुरुषार्थस्य एकस्य सिद्धिर्यतो भवति सह क्रियमाणे सर्व एकैकः पुरुषार्थं साधय
ति तंत्रेण कृत्स्नेन स्वफलेन भवति। एकैकस्यास्य तत्र कर्त्ता। आह। नन्वेतदुक्तं एकैको न शक्नोति वक्तुं एकैकं कर्तुमिति। उच्यते। शक्नोत्येकैक
स्य त्यागं तत्र विवक्षायां। यदेकः स्यात् तंत्रेण प्रवर्त्तेत तदा मा नसंख्यानिर्देशस्य पर्थं सामादिभिः प्रमोक्ष्यते। एवमेकैकः पुरुषार्थं सा घ
यति। इतराणि तरस्य तेन सर्वे कर्त्तारः संपद्यामा भविष्यंति। सर्वे च कर्त्तारः पृथक् पृथगेव फलेन संभन्त्स्यंते॥ अपि चोत्पत्तिसंयोगा
द्यथा स्यात् सत्त्वदर्शनं तथा भावो विभागः स्यात्॥ अपि च नैतद्विरुद्धं यत् एकं कर्म बहुभिः क्रियत इति। यदुच्यते विरुद्धमेकेन कर्मणा
कृते द्वितीयः किं कुर्यादिति। अत्रोच्यते। पर्यायेण क्रियायामेव दोषः तंत्रेण तु क्रियायां भवति कर्मविशेषं तत्र यथा स्यात् सत्त्वदर्शनं
तथा भावो विभागः स्यात्। यथैकैकस्य सत्त्वस्य हस्तिनो घटस्य वा दर्शनमेकैकेन कृत्स्नमभिनिर्वर्त्यते एवमेव सत्रे तंत्रभावो भवेत्॥
सर्वेषामध्यकं द्रव्यं मध्य कस्याहवनीयस्योपस्थेयद्युस्य विधयतित सर्वे कर्त्तारस्तंत्रेण भवंति न वाभ्यासेन संयोगः उत्पत्तेव
तु संख्यया कर्म्मसंयुज्यते यदि सत्यमेवं संयुज्येत ततो नैकस्य संबंधार्थमिति वचनं गम्यते। उत्पत्तिसंयोगाच्चैतत्र लक्षितं। तस्मादेकैक
स्य कृत्स्नेन फलेनाभिसंबंध इति। १॥ प्रयोगे पुरुषश्रुतेर्यथाकामी प्रयोगे स्यात्॥ ॥दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इ

त २

राम
१७

ष्टोमेनस्वर्गकामोयजेतेतिश्रूयते।अत्रसंदेहः।किमनियमेनएको।द्वौबहवोवायजेरन्नुताथवाएकएवय[...]तेति
।नतृतीयउक्तेशास्त्रफलंप्रयोक्तरीति।यदाचप्रयोक्तरितस्यविवक्षितमेकत्वंयथातथाक्रमः।इहतुतदेवा[...]तेतु
नश्चनिर्णीयतइति।किंप्राप्तंयथाकामीकि।[...]किंप्राप्तंयथाकामीप्रयोगेस्यात्।कुतःपुरुषश्रुतेः।पुरुषःश्रूयतेपुरुषयाग
मावयित्वाकृतार्थः।आह।एकस्यद्वयो[...]र्वाबहूनांवायागंनवारयति।नासौपुरुषोयागमभूपतेयागमभिनिर्वर्त्तयिष्यागो
नवाफलमभिनिर्वर्त्तयेदिति।[...]यदाहियागेनफलंप्राप्नुयादितियागस्यवाफलनिर्वृत्तेर्वानेतुंपुरुषःयदिह्ययंयागम[...]वध्यात
यागफलनिर्वृत्तौवातदासंख्यागुणभूतातदंगंपुरुषपरिच्छिंद्यात्।अथपुनरनेना[...]तेपुरुषंप्रकाशयल्लघुत्वा[...]नेवपु
रुषमभिसंबध्येत।नतुएववचनंतथातत्र[...]विवक्षितंसंख्यावचनेनायावाल्समर्थः।अपीवतंसर्वमपिकृत्येतदुच्यमानंनशक्य
तेएकवचनेनविशेषयितुं।कथंनपुरुषप्राधान्यं।नफलोपलत्या।किंचित्प्रयोजनमस्तिनवायागोपलत्या।आत्मातुफलस्यबहु
सर्वस्येष्टः।नस्वर्गकर्मभिर्वत्वमभिनस्थाउच्यमानमपिनक्रियेत।तत्रवचनानर्थकंस्यात्।तस्माद्यथाकामीस्यात्।एको
द्वौबहवोवायजेरन्निति।तथाचदर्शयति।युवंहिस्थःस्वः[...]पतीइतिद्वयोर्यजमानयोःप्रतिपदंकुर्यादिति।एतत्प्राप्तेयथामि

दव इति वक्रुम्भोयजमानेभ्य इति द्वयोर्बहूनां च यागं दर्शयति॥ ॥प्रत्यर्थं श्रुतिभाव इति चेत्॥ ॥इति चेदेवं [illegible]पसि
प्रत्यर्थं श्रुतिभावः स्यात्। यागमभिनिर्वर्त्तयेत तस्य फलं प्राप्नुयादिति। कुत एतत्। उभयं ह्येतत्समाख्यायते। कतरदत्र जहीम
इति [illegible]प्रत्यवस्यामः। तस्मादुभयमपि प्रत्येतव्यं। आह। नन्वनेकार्थवचनता न्याय्येति। उच्यते। यदवगम्यते तन्न्याय्यं उ
भयं च प्रतीयते तस्मादुभयार्थवचनतैव न्याय्या। यागं प्रति च गुणभावाद्विवक्षितमेकवचनं॥ ॥तादर्थ्येन गुणार्थता
नुक्तेः अर्थान्तरत्वात् कर्तुः प्रधानभूतत्वात्। नैतदेवं तादर्थ्ये पुरुषप्राधान्ये सति नाम भूतः पुरुषः प्रतीयते। अन्[illegible] हि न्य
यन प्रतीमः अर्थान्तरं यतो गुणभावात्प्रधानभावः॥ प्रधानभूतश्चात्र कर्त्ता वचनस्यार्थवत्वात्। अतो न गुणभावः कर्त्तुरेव क
ल्प्यते॥ ॥चोदनैकत्वात्॥ एका विधायिका चोदना साबादिफला यत्रिंक यागोत्पत्तिं वा विधत्ते तदा कर्त्ता न स्वार्थेन। यदा पुनः
स्वार्थेन कर्त्ता तदा यागः फलं दाता द्रव्येन। न चैतद्यौगपद्येन भवति। स्वार्थ एव स्वदर्थ इतरो वैपरीत्येन वेति। [illegible]
म्यां वा कुम्भा मिष्टं न सपति देवदत्त इति गम्यते न यौगपद्येन यदा दक्षिणे नास्पृशति तदा समेन वत्तुः स्पृष्टेन [illegible] तेन न य
स्पृशतीति गम्यते। तत्रव्याप्तत्वात्। एवं यदा पुरुषप्राधान्यं तदा यागस्य फलस्य चा गुणभावो वगम्यते। तत्र याज्ञत्वात् न

मपतिन २

यः प्रत्युत्पतो भवति शास्त्रफलं प्रयोक्तरीति ॥ ॥ अनार्थेनाभिसंबंधः ॥ न परस्य स्वर्गकाम इति एवं न यजेत । नाप्यन्यस्य
स्वर्गकामशब्देन वाचक इति । कथं तर्हि फलमेवासौ न प्राप्नोतीति । कथं पुनः फलस्याप्राप्तिः । उपपदविशेषश्रवणाद्यजेतेतीय
ह्यवनेनात्मनेवसंतेष्विमाद्दीनेति तदातु कामस्यैतानुपपदरेवावादर एव । फलकामो निमित्तमिति चेत् । एवं वेद्यावान्मन्यते
न स्वर्गकामशब्देन वाचक इत्यन्यो न यजेत । फलाभावाच्चास्य याग इति । स्वकृवाक्यफलार्थिनताना ह्यभ्यजेत । आत्मात्तमेवं यजमा
नः आयुराशास्त इति प्रयोक्तृथितारं निर्दिश्यति हेत । फलविधिश्च स्वकृवाकेन प्रस्तरं प्रहरतीति विधानाद्धि फलविधिरयं मात्र
वर्णिकः ततः स्वकृवाकेन प्रस्तरः प्रहृतो भवति इतरस्यावा दृष्टं कल्प्येत । तस्मादानुषंगिकफलार्थमन्यस्य स्वर्गकामोन्यो यजेतेति
न नियमत्वात् । नैतदस्ति । यस्यैव प्रधानकर्म्मफलं तस्यैवानुषंगिकं भवितुमर्हति । एवंचार्थेना प्राधान्ये नेदृतं भवति न ह्यप्राधान्यस्य
र्थतायामस्ति विशेषः प्रधानफलं वानुषंगिकं वा सर्वमेवाधीतारि समवेतुमर्हति । नित्यकाम्यता च विरुध्येत । प्रधानस्य दिकामो य
जेत न तर्हि नित्यं दिनिसंनात्पुरादिकामः तस्मान्नावस्थितो न्याय्यः प्रत्युष्क्रियेत । न च पुरुषः प्रधानभूतश्चोद्यते गुणभावस्या
विवक्षितमेकत्वं । तस्मादेक एव यजेत । कर्मतायेतिचेत् ॥ अथ यदुक्तं द्वयोर्बहूनां च यागं दर्शयति । पुर्वं हि स्विष्टः स्वर्ग्याति इति

पि
राम
१९
तं स्वर

बहुयजमानके॰

द्वयोर्यजमानयोः प्रतिपदं कुर्यादिति अस्य यमिदव इति बहुभ्यो यजमानेभ्यः प्रतिपदं कुर्यादिति द्वियजमानकैककर्म्म
णि प्रतिपद्विधानेकर्मतथामुक्तं स्यादिति तत्परिहर्त्तव्यं ॥ ॥ न समवायात् ॥ नैतदेवं समवेतं हि कर्म विधीयते द्वाभ्यां यजमाना
भ्यां बहुभिश्च यजमानैर्वचनेन । यथा तद्विधाहीनाः तेषु प्रतिपद्विधानमर्थवज्जनिष्यतीति । तस्मादेकोपजेतेति ॥ ॥ प्रक्रमा
त्तु नियम्यतारंभस्य क्रियानिमित्तत्वात् ॥ प्रजाकामो यजेतेत्येवमादि कर्म समाम्नायते । तत्र संदेहः किं प्रक्रांतं नियोगतः स
मापनीयं उत छया वीर्यं दृश्यते । किं प्राप्तं । नियोगतः परिसमापयितव्यमिति । कुतः एवं हि श्रूयते इदंकामो यजेतेति तस्याख्या
तस्यार्थमुपदिशति । उपक्रमप्रभृति अपवर्गपर्यंतमाहेति उपक्रमादारभ्य यावत्परिसमाप्तिरिति एतावान्व्यापारविशेषः तस्या
र्थेन यथापाकस्याग इति । तत्र हि पाकादिस्तावान्वे निर्दिश्यते । नारभ्य समापयितव्यमिति । एवं आख्यातार्थे लौकिकाः प्रतिपति
पद्येते । तत्र न नारंभे पुरुषप्रयत्नश्चोद्यत इति गम्यते । यतश्चोदितेन नियोगतः पुनः परिसमापयति तेन नो भ्रारंभपरिसमाप्तिराख्या
र्थः किं तर्हि परिसमाप्तिः शब्दार्थः परिसमाप्यार्थमात्तत्वादारंभस्य । तस्मात्परिसमाप्तिः शब्दार्थ इति गम्यते सा चेष्टाथः सा
कर्त्तव्यतया चोद्यते आरंभेनास्ति कर्त्तव्यता वचनं । तेन न नियोगत आरंभो नियोगतस्तत्समाप्तिः तेनोपक्रांते कर्मणि यदि वीप्सा फले

आरम्भे तेनियोगतः ३

ष्याच्चवाप्नोति वा फलं तस्यामवस्थायां कर्त्तव्यमेवोपक्रांतस्य परिसमापनं। न च यथिनोप्योर्थः सोत्र कर्त्तव्यतयोच्यते नैतदे
वं। काम्यार्थो हि स भवति। यागस्य तु कर्त्तव्यताऽवगम्यते। तस्माद्ग्रामकामेन याग आरब्धः परिसमापनीयः। ग्रामादिकामेन
व च नेनिमित्तत्वेन तदा भवति। निमित्ते चोत्पन्ने यत्कर्त्तव्यमित्युच्यते तद्विनष्टेपि निमित्ते कर्त्तव्यमेव। उपक्रांतस्य समापने कर्त्त
व्यमिति चोद्यते तद्विनष्टेपि निमित्ते कर्त्तव्यं। नहि तद्विनष्टमनुत्पन्नं भवति। उत्पत्तिश्च निमित्तेन भावः। तस्माद्द्वितीयामपि फ
ले छायाम्युपक्रांतं परिसमापयितव्यं। क्रियाया हि निमित्तमारंभः सोपि परिसमाप्तेरिति॥ फलार्थित्वाद्वानियमो यथानुपक्रांते
॥ वा शब्दः पक्षं व्यावर्त्तयति। अनियमो वा कस्मात् फलार्थित्वात् फलार्थिनः फलं चिकीर्षमाणस्य उपायोयं विधीयते। न कर्त्तव्यता साहि
विधीयमाना फलस्य वा यागस्य वा स्यात्। फलस्य न तावदवक्रव्या। नहि यो यत्कामयते तस्य तत्कर्त्तव्यं। यदृष्टव्यापि वेदे वा से
मयैतत्कर्त्तव्यमिति। उपायं तु न वेद तमाकांक्षत उद्दस्तु पच्छिन्नते याग उपाय इति। यागेन क्रियत इति। न च यागस्य कर्त्तव्यता। प्रत
त्वविरोधात्। भस हस्तु लेशोप्यागः। यद्यपि योगेनान्यस्य कर्त्तव्यता तदा न विरोधः। यागकर्त्तव्यता नां फलं कल्प्यं न च कल्प्यमानस्य प्रम रोम
एमस्ति। कर्त्तव्योपदेशाश्च रागादिप्राप्तवर्थस्तु भवति तस्मान्न यागः कर्त्तव्यः फलकामस्य यदिष्टं तत्कर्त्तव्यं अनुपप्रथमानं यागस्य २०

स्थे २

तयोः प्राधान्यमपि गम्यते। तस्मान्न यागे फले वा पुरुषस्य गुणभावः। अतो यथाकामं स्यात् एको द्वौ बहवो वा यजेरन्नि
ति॥ ॥अपि वा कामसंयोगे संबंधात्प्रयोगायोपदिश्येत प्रत्यर्थं हि विधिश्रुतिर्विषाणवत्॥ ॥अपि वेति पक्षव्यावृत्तिः। प्रयोगाय
परिश्येत कर्त्ता न स्वार्थेन। कथं यज्ञेत तस्यार्थः यागं कुर्यान्नु यागेन वा कुर्यादिति सन्न्यावक्तिमात्रं गम्यते न फलस्य कर्त्तारता मि३
स्वर्गकामशब्दः स्वर्गकाममात्रे वर्त्तते न विशेषमवलंबते आत्मनः परस्य वेति। स्वर्गं प्रतीति मात्रे स्वर्गकामशब्दो वर्त्तते। श
ब्दमाणकाम्बवधमीहृद्रो वर्थेषु। कथं तर्हि कामस्यात्मसंबंधो वगम्यते। संबंधात्फलकामो न तु कोपि शब्देन। लन एव फलं कामयते
न परस्य। यत्र तत्र भवति थैव तल्पो भवतः प्रत्यर्थं तत्र विधिः श्रूयते। यथा वत्सविषाणं यावत्कंडूयति तावत्ले वत्सविषाणमास्यती
ति। यत्रैवं द्वेष्कती विधायो भवतः तत्र गुणभावः प्रत्यर्थं च गम्यते। न चैवं द्वे विधायि चेष्टा विधीयेते। गुणभूतस्य पुरुषः श्रूयते
भावयेदिति। तत्र यच्चर्थः करणं कर्मैव। संबंधात् पुरुषभवान्यं न कस्य चित्सुखेनाप्युच्चेन प्रयोजनं सुखसंबंधेनात्मन तु संबं
तं। तस्मात्संबंधात् पुरुषप्राधान्यं गम्यते। नक्रतेः अतो गुणभूतस्य संख्या विवक्षितेति॥ ॥ अत्रास्यादिति चेत्॥ इति चेन्नवान्य
वपति। एवं सति यदि स्वर्गकामः अन्यस्यापि स्वर्गं कामयमानो भवति। अनात्मस्वर्गकामयमानो नापि यजेत तत्र स्वर्गकोन्य

यस्य ब्राह्मणो न जायेत इति प्रायश्चित्तं न यथा दृष्टार्थं न शास्त्रादिति। अथापि प्रसंगपरिहारार्थं ततो व्यावृत्तमेवेतदिति ग
म्यते॥ ॥ अशास्त्रत्वात्तु पसंप्राप्तिः शास्त्रं स्यान्न प्रकल्पकं तस्मादर्थेन गम्येताप्राप्ते शास्त्रमर्थवत्॥ ॥ उत्ताद्ः प्रत्यवायवत्वेन भवति अशास्त्रत्वा
त्तेषामुपसंप्राप्तिरिति मन्यते रस्याः शास्त्रं भवतानुमीयते। न शास्त्रमेतरेण स्मृतिः न वस्मृतिमेतरेण तत्क्षणं अथ उपपद्यतद्
ति। उच्यते। भवतत्त्वस्मृतिः एवमिदं गृहादि कर्मर मणीयं भवति। नास्मत्कर्मणेन दृष्टं किंचिदिति। यावासौ रमणीयता सोतरेण वि
शास्त्रं शक्यं ज्ञातुं। ज्ञात्वा वत्स्यर्थं तत्र नस्मात्स्वत्याः स्मृतेः शास्त्रं प्रकल्प्यं यद्येतरेण शास्त्रं न प्राप्यते। ततः शास्त्रमस्या थ वदतीति प्रकल्प्येत॥
तस्माच्चेदं शास्त्रं स्वके चास्वके च वसामिति तत्पक्षे अस्पर्शे शिष्टा गर्हन्ति। देवताश्रयेव। नन्वत्रापि देवताः परिगृहीताः अस्यां दिशि इयं देव
तायस्ते तस्यामिति यमिति। उच्यते। पुरुषमनुदेवताः शिष्टाः स्मरंति न गृहमनु तस्माददोष इति। प्रतिषेधेष्वकर्मत्वात् क्रियास्यात् प्रति
षिद्धानां विभक्तत्वाद् अकर्मणां॥ ॥ इदं श्रूयते तीर्थे न कलंजं भक्षयितव्यं न लशुनं न गृंजनं चेति। तत्र संदेहः किमेवं जातीयकं फलका राम
मेवं न भक्षयितव्यं निष्कामेनापि। अथवा नियोगतो वर्जयितव्यमेवेति। किं प्राप्तं फलार्थिना न भक्षयितव्यं। अनर्थिनो नियम इति प्र ११
तः नियमो ह्ययमुच्यते इदं न भक्षयितव्यमित्येवमुक्ते इदमापतति यदि वा भक्षणं कर्तव्यमिति अभ्युपगम्यते। ततो भक्षणं अ
पदि वा भक्षणं न कर्तव्यमिति। यदि न अवि शिष्टं भक्षणं कर्तव्यमि १

स्तात्तयो विरुध्यते। ननु भक्षयति विशेषणं। तथा परात्र नञ्कृतमेतया न संबध्यते। अथ न भक्ष्यः कर्तव्यः ततो वाक्येन विधा
नं। भक्षयति श्च नञर्थविशेषणं। श्रुतिश्च वाक्याद्बलीयसी तस्माद् अभक्षणं कर्तव्यमिति निगम्यते। अभक्षणं च भक्षणाभावः न तस्य कर्त्त
व्यता। तस्माद् यस्तत्र मानसो व्यापारः स इह उपदिश्यते येनोपायेन नञ्विशिष्टं भक्षणं भवति। इदं न भक्षयतेः संबंधः ततो विधा भ३
नं। यथा नोद्यन्तमादित्यमीक्षेतेत्येवमादिषु प्रजापतिव्रतेषु [illegible] कुर्वतः फलं अकुर्वतो न फलं न दोषः एवमिहापि विधि
कृत्वाद् अकर्मणां नात्र कर्म प्रतिषिध्यते अकर्मोपदिश्यते अन्यद्धि कर्म भक्षणं प्रतिषिध्यमानं। अन्यच्च कर्म मानसः संकल्प इति॥
शास्त्राणां त्वर्थवत्त्वेन पुरुषार्थो विधीयते तयोरसमवायित्वात् तादर्थ्ये विध्यतिक्रमः॥ ॥ उपवर्णनापरिहारस्तावदुच्यते। युक्तं यत्प्र
जापतिव्रतेषु शास्त्राणामर्थवत्त्वेन पुरुषार्थो विधीयते। तत्र नियमः कर्तव्यतयोपदिश्यते। यश्च कर्तव्यः संकल्पाणोदयायो न कर्तव्यः॥
स पापोदयः कुतः पुनः प्रजापतिव्रतेषु नियमः कर्तव्यतयावघतरस्तु उच्यते। तस्य व्रतमिति प्रकृत्य प्रजापतिव्रतानि समाम्नातानि। व्रतमिति च
मानसं कर्मोच्यते। इदं न करिष्यामीति यः संकल्पः क[illegible]तमतत् व्रतेनोद्यन्तमादित्यमीक्षेतेति यथा तदीक्षणं न भवति तथा मानसो व्यापारः
कर्तव्यः तस्य च पालनं। तस्मात्तत्र पुरुषार्थो लीनाज्ञातव्यो। तत्र चैतान्येव प्रकृत्य अन्येतान्वतानाहैन संयुक्तो भवतीति। एतावता हुतेनायु

ले२

क्रपत्वसाभवतीति। तथेह तयोरसमवायित्वं। इह क्रिया प्रतिषिध्यते नाक्रियोपदिश्यते। नहि कलंजं भक्षयन् प्रतिषेधविधिं नाति
क्रामति। इह पुनरादित्यं पश्यन् नातिक्रामति विधिं। नहि तत्सादर्शनं प्रतिषिद्धं नियमस्तत्रोपदिश्यते यो नियमं करोति स फलेन संबध्यते।
इह तु प्रतिषिध्यते कलंजादि। कथमवगम्यते। नात्र तस्य व्रतमिति प्रकृत्य वचनमस्ति। न च भक्षयितव्यमित्यस्मानसो व्यापारोऽर्थः। भक्षयि
तव्यमिति न भक्षणे कर्तव्यता चोद्यते। नेति तत्प्रतिषिध्यते अस्य च। एवं प्रसिद्धार्थो गृहीतो भवत। इतरथा लक्षणा स्यात्। अतिलक्ष
णविषये च श्रुतिर्न्याय्या। न लक्षणा। तस्मादिह प्रतिषेध उच्यते। आह प्रतिषिद्धं नाम। दोषोऽत्र न श्रूयते। तस्मात्प्रतिषिद्धमप्यनुष्ठातव्यमिति।
दोषः कल्पयिष्यत इति चेत्। न प्रमाणाभावात्। अर्थापत्तिः प्रमाणं उपदेशाद्वैयर्थ्यप्रसंगादिति युज्येत। नैन दैवव्यर्थ्यं निषिद्धाज्ञानात्
भवति। तस्मान्न कल्प्यो दोष इति। उच्यते। न संनकल्पनीयः। किंतु श्रुत एव। अथ मनंतरमेवैनं शिष्टावर्जयेयुः पतितः कर्मफलेभ्य इति
दंतो महांश्चैष दोषो यच्छिष्टावर्जयंति। तस्मान्नियोगतः कलंजादि न भक्षयितव्यमिति। यथा न सर्पायांगुलिं दद्यादिति तत्र दोषद
र्शनान्नियोगतो न सर्पायांगुली दीयते। कंटकेवापादेन नाधिष्ठीयते। एवमिदमपीति॥५॥ तस्मिन्सति शिष्यमाणा निजमनेना
प्रवर्तेरन्॥ ॥ इहस्मार्ताः पदार्थी उदाहरणं संप्रत्युपस्थिते नियमाद्वारः। गुरुरनुगंतव्यो मिता वादयितव्याः। इत्यवयाः

राम 22

यं१

साधनता विधीयते। तेननावश्यं समापनीयं भवति। यथा नुपक्रांतं तत्रावश्योपक्रमितौ। एवमुपक्रांतं तेनावश्यं समापयितव्यं।
यत्तु वाक्यार्थः। श्रुत्वा वाक्यं न तदिति। यत्र श्रुत्यर्थो न संभवति तत्र वाक्यार्थो गृह्यत इत्युत्क्रमेव। तस्मादनियमः॥ ॥ नियमो वा तन्निमि
त्तत्वात्कर्तुस्तत्कारणं स्यात्॥ ॥ आरंभो हि निमित्तं समाप्तेः। कथं तत्कर्तुः कारणं स्यात्। किं कारणं सत्यसंकल्पता। यो ह्यारभमवज्ञाती
यर्कं न समापयति नेन शिष्टा विगर्हते आक्रमितो यमसंव्यवहार्य इति। शिष्टविगर्हणं च दोषः। तस्मादारभ्य समापयितव्यं। आह शिष्टाः
पुनः किमर्थं विगर्हंतस्तन्नि। उच्यते। विगर्हंते तावत्किन्नो विघ्नितेन कारणेनेति। अलोके कर्मणि वेदवतं धिपुरुषज्ञानं। केनचिदुपक्रम्य
पक्रांतं न भवति नाकर्तव्यावावीतास्य फलेच्छा अप्राप्नोति वा फलं। तत्र संदेहः। किं तन्नियमतः परिसमापयितव्यं। उत तच्छया न त्यज्यम
दीति। किंप्राप्तं लोके कर्माणि एवं जातीयका नि उपक्रम्य परिसमापनीयानि। यथैव वैदिकानि तथैव तानि नियोगतः परिसमापनीया
नि। कुतः। न तेषु धिपुरुषज्ञानं न तत्तत्पुरुषज्ञानं भवितुमर्हति। कुतः। शास्त्रात्। आम्नायते हि तत्कर्माण्यासौ। तत्रापि देवता व्यापारोप
क्रियते। पूर्वस्यादिरूपता देवता इतरा स्वं नाम इति। यदि शास्त्रे स्तने देवता व्यापारे उपक्रम्यापरिसमाप्यमाने शिष्टविगर्हणं एवमिहापि
भवितुमर्हति। अपराधयते। शास्त्रातेषां च लौकिका नाम प्रावर्षयितः। तद्वृभिः प्रायश्चित्तमाम्नायते। आरंभस्येदं द्वयोऽस्ति कर्तृवः पा

दर्थाविरुद्धेषु कालेषु होतव्यमिति ॥ न कालेभ्य उपदिश्यन्ते ॥ ॥ नैतदस्ति यदुक्तमर्थाविरुद्धेषु कालेषु सततं होतव्य
मिति। काल एष श्रूयते। प्रदोषमग्निहोत्रं होतव्यं व्युष्टायां प्रातरिति। तथा पौर्णमास्यां पौर्णमासेन यजेत अमावास्यायाम
मावास्येन यजेतेति तस्मान्न सततमिति। आह नन्वेवं गुणस्यापि प्रयोगान्न कालश्चादरणीय इति अत्रोच्यते। न कालो गुणो
दि निमित्तं घटत इत्युक्तं। तस्मादन्येषु कालेष्वविहितत्वात् कृतमप्यकृतं स्यात्। अत एव तत्कालस्यावश्यं प्रयोग इति। दर्श
नाकालिंगान्नाकालेऽभिधाने। लिंगमपि भवति। अयं वा एष स्वर्ग्यो लोकाच्छिद्यते यो दर्शपूर्णमासीयाजी सन् पौर्णमासीम
मावास्यां वातिपातयेदिति। यदि सर्वस्मिन् काले होमः तदाकस्यातिपत्तिः स्यात्। तस्मादपि न सततमभ्यासः ॥ ॥ तेषामौ
त्पत्तिकत्वादागमेन प्रवर्त्तेत ॥ ॥ प्रदोषे अग्निहोत्रं होतव्यं व्युष्टायां प्रातरिति। तथा पौर्णमास्यां पौर्णमासेन यजेत अमावास्या
याममावास्येन यजेतेति ॥ ॥ तत्र संदेहः। किं सकृत्प्रदोषे होतव्यं उत प्रदोषे प्रदोष इति। तथा किं सकृद्व्युष्टायां प्रातः उत व्युष्टायां
व्युष्टायामिति। तथा किं सकृद्व्युष्टायां प्रातः उत व्युष्टायां व्युष्टायामिति। तथा किं सकृत्पौर्णमास्याममावास्यायां वा उत आग राम
ते आगते काल इति। किं प्राप्तं। सकृत्कृतार्थः शास्त्रेण नियमः पौनःपुन्य इत्येवं प्राप्ते ब्रूमः। आगमेन प्रवर्त्तेत आगते आ २३

गते काले प्रयोगः कर्त्तव्यः इति। कुतः। तेषामौत्पत्तिकत्वात्। उत्पद्यमानं कर्म कालसंयुक्तमेवोत्पद्यते। तद्युक्तं नियमा
र्थः कालश्चोदनाय इति। निमित्ते च संप्राप्ते नैमित्तिकोऽर्थः कर्त्तव्यो भवति ॥ तस्मादागते आगते काले प्रयोगः कर्त्तव्यः ॥ तथा हि लिं
व३ गदर्शनं ॥ अयं वा एष स्वर्ग्यो लोकाच्छिद्यते यो दर्शपूर्णमासयाजी सन् पौर्णमासीममावास्यामतिपातयेदिति। आगते आगते
काले प्रयोगं दर्शयतीति ॥ ॥ ॥ तथातः क्रतुप्रयुक्तानि। निमित्ते तु हेतिस्मृते तु होमीति दर्शपूर्णमासयोः श्रूयते। तत्र सं
देहः। किं सकृत्कृते निष्पन्ने कृतार्थः उत प्रत्येकमेव नैमित्तिकं भवतीति। तत्राधिकरणमिति देशायं। यः पूर्वं च पूर्वः पक्षः स
कृत्कृते य उत्तरः। सकृत्कृत इति सकृत्कृते कृतार्थ इति पूर्वः पक्षः। निमित्तत्वादागते निमित्ते पुनः प्रयोग इत्युत्तरः ॥ ॥ ॥ आ
चाराद्गृह्यमाणेषु तथा स्यात् पुरुषार्थत्वात्। गुरुरनुगन्तव्योऽभिवादयितव्यश्च इत्येवमादयः प्रत्युपस्थेयः सेमान्यश्चेति तत्र संदे
हः किमागते गुरौ एवमयमिति यदुक्तं तत्तत्कर्त्तव्यं उत सकृत्कृते कृतार्थ इति। आचाराद्गृह्यमाणेषु तथा स्यात् पुरुषार्थत्वादिति अधिकर
णमिति देशः। तत्र यः पूर्वः पक्षः स पूर्वः य उत्तरः स उत्तरः सकृत्कृतात् कृतार्थ इति पूर्वः पक्षः। निमित्तत्वात् पुनः प्रयोग इत्युत्तरः ॥ १० ॥ ॥
ब्राह्मणस्य तु सोमविद्याप्रजमृणवाक्येन संयोगात् ॥ ॥ इदं श्रूयते सोमेन यजेत गार्हस्थ्यमेधमेव ब्राह्मणस्तु पनयीत प्रजा

सउत्तरः २ यन्

मुत्पादयेदिति। तत्र संदेहः किं नित्यान्येतानि उतानित्यानीति। किं प्राप्तं कामसंयोगादनित्यानीति प्राप्त उच्यते॥ ब्राह्मणादी
नां सोमादीनि नित्यानीति। कुतः ऋणवाक्येन संयोगात् ऋणवाक्येन हि संयोगो भवति। जायमानो ह वै ब्राह्मणस्त्रिभिर्ऋ
णवा जायते यज्ञेन देवेभ्यो ब्रह्मचर्येण ऋषिभ्यः प्रजया पितृभ्य इति सर्वे तत्र हि न ऋणापाकरणाय ब्रह्मचारी प्रजावानिति। ऋणा
स्तवोवश्यकर्तव्यतानां भवति। तस्मान्नित्यानीति। ननु लिंगमसाधकं न्याय उच्यतां यस्यैतद्द्योतकमिति। उच्यते। अकामसंयुक्तान्य
यं पृथक्कृतान्यनिमवंति वसंते वसंते ज्योतिषा यजेत तथा यावज्जीवमग्निहोत्रं जुहोति यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति। त
थाविद्याम ज्ञीयीत तस्या प्रजा उत्पादयितव्येति। एवं निष्पत्तौ प्रापयाउद्दलिंगं भवतीति। अथवायमनोर्थः॥ ॥ ब्राह्मणस्य तु सो
६ पाः मविद्याप्रजमृणवाक्येन संयोगात्॥ ॥ सोमादयो नियताः किं ब्राह्मणस्यैव राजन्यवैश्ययोरनियताः उत सर्वेषां नियता इ
न ३ ति। किं प्राप्तं ब्राह्मणस्यैव नियता तरयोरिति। कुतः एवं हि श्रूयते जायमानो वै ब्राह्मण इति ब्राह्मणस्य नियमो दृश्यते। ने
तरयोर्ब्राह्मणसंकीर्तनात् एवं प्राप्ते ब्रूमः सर्वेषां नियमः कुतः अविशेषेण हि नियमविधानं यत्तदकामसंयुक्तं वचनं नि राम
यामकं तत्र दविशिष्टं सर्वेषां तस्मात्सर्वेषां नियम इति। ननु यो जायमानो ह वै ब्राह्मण इति ब्राह्मणसंकीर्तनं नोपपद्यते। म २७

प्रत्युपस्थेयः संमंतव्यश्चेति। तत्र संदेहः किं जातमात्राणामिमे पदार्था उतोपनीतानामिति। किं प्राप्तं अविशेषोपदे
शाज्जातमात्राणां। कुतः पुरुषे ते विधीयंते जातमात्रश्च पुरुषः पुरुषो भवति तस्माज्जातमात्राणामिमे पदार्था इत्येवं प्राप्ते ब्रू
मः॥ ॥ अपि वा वेदतुल्यत्वादुपायेन प्रवर्तेरन्। अपि वेति पक्षव्यावृत्तिः उपायेन सह प्रवर्तेरन् वेदतुल्यत्वात् वेदतुल्या हि स्मृ
तिः वैदिका एव पदार्थाः स्मर्यंते इत्युक्तं वैदिकाश्च पदार्था उपनयोत्तरकाले समाम्नाताः स्मार्ताः श्रौतवैदिका एव। तस्मादु
पनयनोत्तरकालीना इति॥ ॥ अभ्यासोऽकर्मशेषत्वात्पुरुषार्थो विधीयते॥ ॥ इदमामनंति यावज्जीवमग्निहोत्रं जुहोति
यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति पुरुषार्थिप्रयोगो विधीयते तेनायमभ्यासः कर्मशेष इत्युक्तं इहेदानीं संदिह्यते किं सात
त्येन होतव्यं उतानसातत्येनेति। किं प्राप्तं पुरुषं प्रत्युपस्थितत्वात्सातत्येनायं पुरुष इति सातत्येनानुष्ठातव्यं। ननु प्रदोषमग्निहो
त्रं होतव्यमुषस्यां प्रातरिति श्रूयते पौर्णमास्यां पौर्णमासेन यजेतामावास्यायाममावास्येन यजेतेति। नैष सर्वांगो
पसंहारेण प्रयोगः। अतः कालमात्रे हीनेपि न दोषः॥ ॥ तस्मिन्नसंभवन्नर्थात्॥ नैतदस्ति यदुक्तं अधीत्य वरूपत
व्यमिति। यथा शक्नोति तथा जुहुयादित्युच्यते। न च सातत्येन शक्यते होतुं। अवश्यमनेनाहारविहारादयः कर्तव्याः तस्मा

नांगानां दर्शपूर्णमासशब्दः कोऽसि होत्रशब्दः कस्य प्रधानपदार्थान्यानि अंगानि तदर्थानीति

इति जैमिनिर्मन्यते स्म ॥ ॥ अपिवाप्येकदेशेऽस्यात्प्रधाने ह्यर्थनिर्वृत्तिर्गुणमात्रमितरत्तदर्थत्वात् ॥ ॥ अपि वेति पक्षव्यावृत्तिः
अप्येकदेशेंगानां स्याद्दर्शप्रयोगः सांगस्याप्यनंगस्यापि प्रयुज्यमानस्य प्रधानादेवाथमर्थो निष्पद्यते गुणमात्रं सर्वांगप्रयोगेण
भवति । कोऽगुणः सांगाः स्वर्गाभिनिर्वृत्तिः प्रधानमात्रादिदमन्यत्फलं तस्मात्सर्वांगाप्रयोगे संपूर्णं न करिष्यामीत्यास्थं यदिकानि वि
दंगानि न शक्नोति कर्तुं तथाप्यस्मादेकदेशोऽपि गुणेषु क्रान्तप्रधानात्फलं भविष्यति । तस्मात्प्रधानमात्रस्य प्रयोगमाहुः कर्माणि
वदोषस्तस्मान्नतेषि शेषः स्यात्प्रधानेनाभिसंबंधात् ॥ ॥ प्रधानातिक्रमे दोषः श्रूयते तत्र यत्राप्यस्य स्वर्गस्त्रोकाच्छिद्यते योऽदर्शपूर्ण
मासयाजी सन्पौर्णमासीममावास्यां वातिपातयेदिति प्रधानातिक्रमे दोषं [illegible] वंतस्य निस्सतोदर्शयति न [illegible] जैमिनिः ॥
प्रयोगवृत्तेनैव कृत्वात्सर्वेषामुपदेशः स्यात् ॥ ॥ इति यदुक्तं नास्तिनेदः प्रधानसंगानि प्रधानानीति प्रयोगवचनेन कृत्वादिति जैमिनिराह समानि ३
स्म सर्वेषामुपदेशः । पौर्णमासीं पौर्णमास्याय जेतामावास्यायाममावास्यया यजेतेति ॥ ॥ अर्थस्य व्यपवर्गित्वादेकस्यापिप राम
योगेस्यात्पृथक्त्वं तरेषु ॥ ॥ एकांगप्रयोगेपि स्याद्विगुणादपि फलमित्यर्थः । कुतो यस्य व्यपवर्गित्वात्प्रयोगः ॥ प्रयो २५
नेऽन्यवहितासंततादर्शपूर्णमाससंज्ञकाद्यफलमिह भवति । तद्विकर्तव्यतयोपदिश्यते यत्पौर्णमास्याप्युपदिष्टं सा पौर्णमा
ने । अग्निहोत्रसंततादर्शपूर्णमाससंज्ञकाद्यफलमिह भवति ।

सीयदमावास्यायां सामावास्या ॥ यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां वाच्युतो भवतीति तदस्मादग्नये पुरोडा
शः अग्नीषोमीयाद । आज्यं वा नीषोमादिभिः पौर्णमास्यामाग्नेयसान्नाय्यादीनाममावास्यायां । यदुक्तं पौर्णमास्यां पौर्णमा वास्या
स्याय जेतममावास्ययाय जेतेति सांगस्य विधानात्सांगं दर्शपूर्णमासशब्देनाभिधीयते इति । नैतदेवं सिद्धेदिदर्शपौर्णमा स्या ४
सार्थं देसांगफलं विधीयते । तस्मान्न सांगमग्निहोत्रपदवाच्यं दर्शपूर्णमासपदवाच्यं वा । यद्यग्निहोत्रं तदिह [illegible] कर्त
व्यतयापि दर्शपूर्णमासौ ॥ तस्माद्विगुणमपि कर्तव्यमेवापि एतं दर्शपूर्णमासौ वा । यथा कालान्तरे पुमहत्त्रिंशुद्धिहृतिषुप
रस्य धर्माः परस्य न भवंति । एवं न कामसंयुक्तस्य धर्मा नित्यस्य भवितुमर्हति ॥ ॥ विध्यपराधे च दर्शनात्समाप्तेः ॥ ८ ॥ ॥ समाप्तिः ४
विध्यपराधेषु च समाप्तिं दर्शयति तदेवयाह [illegible] तस्मिन्निति विगुणस्य दर्शयति ॥ ॥ प्रायश्चित्तविधानाच्च ॥ ॥ विध्यपरा
धेषु प्रायश्चित्तानि विधीयंते भिन्ने कर्मांगे भूते । यथा भिन्ने जुहोतीति । विगुणे निष्फले सति कुत्सांगभूते प्रयोजनं स्यात् । त
स्माद्विगुणमपि प्रयोगः कर्तव्य इति ॥ ९ ॥ काम्येषु चैवमर्थित्वात् । ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः सौर्यं चरुं नि
र्वपेद्ब्रह्मवर्चसकामः वैश्वदेवं सांग्रहायणीं निर्वपेद्ग्रामकाम इत्येवमादिषु संदेहः । किं विगुणमपि कर्मफलं वदुतादि विगुणमेव फ

पे०

वत्वाद्विगुणमेव फलवदिति किं प्राप्तं काम्येषु चैवं स्यात्। विगुणमपि फलवदिति। कुतः। आर्थित्वात्। यदि विगुणमपि
फलवदेवमर्थिमात्रमधिकृतं भविष्यति। अन्यथा सामान्यशब्दोऽन्तरेण कारणं विशेषे व्यवस्थापितो भविष्यति। असमर्थत्वान्ना- धे:
धिकृत इति चेत्। सांगं न समर्थः कर्तुं प्रधानमात्रं तु शक्नोति। अतः प्रधानमात्रेऽधिकरिष्यति॥ ॥असंयोगात्तु नैवं स्याद्विधेः
शब्दप्रमाणत्वात्॥ उक्तात्पक्षो विपरिवर्तते। नैवं स्याद्यदुक्तं विगुणमपि फलवदिति। असंयोगात्प्रधानमात्रस्य फलेन।
सांगो हि फलेनाभिसंबध्यते न प्रधानमात्रं। न केवलं ... संयोगेन। तेन यद्यपि केवलं शक्नुयात्तथापि नैवंजातीयकं तत्कुर्यात्। न केवल-
स्य फलेन संयोग इति। शब्दप्रमाणकश्चायमर्थो विधीयते। शब्दश्च सांगात्फललाभं दर्शितवान्। तस्मान्न विगुणं कर्म कर्तव्यमे-
वंजातीयकमिति॥ अकर्मणि चाप्रत्यवायात्॥ न चाप्रधानमात्रस्याकर्मणि प्रत्यवायः। उच्यते। यथा दर्शपूर्णमासयोः राम
। तस्मादपि न विगुणमेवंलक्षणकं कर्म प्रयोक्तव्यमिति॥ २॥ ॥क्रियाणामाश्रितत्वाद्द्रव्यान्तरे विभागः स्यात्॥ दर्शपूर्णमास- २६
योर्यागः पुरोडाशेनोक्तः। स च पुरोडाशो व्रीहिमयः कर्तव्य इति श्रूयते। तच्चैतद्विंसते। यदि नीवारमयेन पुरोडाशेन यागः क्रिय-
ते किं स एव यागः स्यात् उतान्य इति। किं प्राप्तं। द्रव्यान्तरे विभागः स्यात्। अन्यो यागः। कुतः। आश्रितत्वात्॥ आश्रयभेदाद्धि भिद्यते विशे-

कै

यस्मिन्वचने ब्राह्मणसंकीर्तनं न तद्वचनं नियमस्य विधायकं। एतैरकामसंयुक्तैर्वचनैर्विहितस्य नियमस्यानुवादो
व यं ग्रहणं दानस्य स्तुत्यर्थः। तस्मात्तत्र ब्राह्मणसंकीर्तनेन राजन्यस्य वैश्यस्य वा नियमो विज्ञायते। ब्राह्मणग्रहणं तु प्रदर्शनार्थं। जा-
यमानो ब्राह्मणो राजन्यो वैश्यो वेति। तथा जायमानो ह वा इति॥ ॥११॥ ॥इति श्री शाबरे भाष्ये षष्ठाध्यायस्य द्वितीयः पादः॥
सर्वशक्तौ प्रवृत्तिः स्यात्तथाभूतोपदेशात्॥ ॥एवं च ब्राह्मणे श्रूयते। यावज्जीवमग्निहोत्रं जुहोति यावज्जीवं दर्शपूर्णमासाभ्यां य-
जेतेति नित्यमग्निहोत्रं नित्यौ च दर्शपूर्णमासौ। तत्र यदेतत्काममश्रवणं दन्त्यदकामसंयुक्तश्रवणं द्वितीयं। तत्र संदेहः। किं यः कार्त्स्न्येन
विधिमुपसंहर्तुं शक्नोति तस्यैवाधिकारः। उत विगुणमपि तत्प्रयोक्तव्यमिति। कामसंयुक्ते प्रथमश्रवणे चिन्तयिष्यते। यो गे
ऽहनि त्वश्रवणे द्वितीय इति। किं प्राप्तं। सर्वशक्तौ प्रवृत्तिः स्यात्तथाभूतोपदेशात्। यः कार्त्स्न्येन विधिमुपसंहर्तुं शक्नोति तस्यैवानु-
ष्ठानं तथाभूतोपदेशात्। यथाभूतं हि तत्कामसंयुक्ते कर्म तथाभूतमेव नित्यमप्युपदिश्यते। तस्मात्सर्वांगोपसंहारेण प्रयोगः।
कर्तव्यः। दर्शपूर्णमासयोश्च सांगस्यैव वचनात्। कथं पौर्णमास्याममावास्यायां वा सांगो विधीयते। यच्च पौर्णमास्यां विहितं सा च पौर्ण-
मासी। यदमावास्यायां विहितं सामावास्येति। सांगममावास्यायां विहितं पौर्णमास्यां च। तस्मात्सांगे दर्शपूर्णमासशब्दो नित्य

५३

तेनापि चोदितमेव कृतं चोदितं च कर्त्तव्यमीप्सितं भवति। नापूर्वकृतं नामधेयं च दर्शयति। दर्श इति वा पूर्णमास इति वात
५२ स्यैव सामान्यस्य। यथा च्छत्रिषु सामान्यस्य नामधेयं न व्यक्तीनां। किं प्रयोजनं चिंतायाः उत्तरेऽधिकरणे नैतद्विचारयिते।। ।।अ
भिधीयमाणत्वाच्छिष्टत्वाच्च नागमान्यस्याशिष्टत्वात्।। ।।अग्निहोत्रादीनि नित्यानि कर्माण्युदाहरणं। तेषु श्रौद्रव्यापचारे संदेहः। एव
किं प्रतिनिधिमुपादाय प्रयोगः कर्त्तव्यः उत तदेतत्कर्मोत्स्रष्टव्यमिति। किं प्राप्तं। शिष्टस्याभावे नागमान्यस्य। तदेतत्कर्मोत्स्रष्टव्यं।। कु
तः।। अशिष्टत्वाद्द्रव्यस्य व्रीहियवगुणं कर्म्मफलवत्तच्च नीवारगुणके क्रियमाणमफलं भवति। तस्मात्तदेतदेवोत्स्रष्टव्यमिति।। ।।अ
विद्यमानात्।। कथं व्रीहिर्विधीयते यदि सोमं न विंदेत् पूतीकानभिषुणुयादिति।। यदि च प्रतिनिधिमुपादाय प्रयोगः कर्त्तव्यः स्यात्
न विधीयते। विधीयते तु तस्मात्तत्र न विधीयते तेन तत्र नीवारमतिनिधिप्रेरति। आगमावाचोदनार्थाविशेषात्।। ।।आगमेच
प्रतिनिधेयस्य द्रव्यस्य। कुतः चोदनार्थाविशेषात् यजतीति चोदनाचोदितोऽर्थः यागो न विशिष्यते व्रीहिभिर्नीवारैर्वा क्रिय
माणो। यागश्चावश्यकः तेष्वेव नित्येषु अनित्येषु च प्रारब्धेषु।। नियमार्थः क्वचिद्विधिः।। ।।अथ यदुक्तं कथं व्रीहीन्यागादिति।। उच्य राम
ते।। नियमार्थः क्वचिद्विधिः सोमाभावे बहुषु सदृशेषु प्राप्तेषु नियमः क्रियते पूतीकानेवाभिषुणुयादिति। तस्मात्प्रतिनि ५७

धिमुपादाय प्रयोगः कर्त्तव्य इति।। ।।तन्नित्यं तच्चिकीर्षा हि।। ।।कथं पुनरिदमवगम्यते नियमार्थमेव तद्वचनमि
ति। उच्यते। यतः प्राप्ताः पूतीकाः।। कथं च ते प्राप्ताः तच्चिकीर्षा हि तत्र सा द्रव्यचिकीर्षेत्यतः तत्सामान्य। तच्चिकीर्षया च प्राप्ताः पूती
काः तस्मात्तन्नित्यं च वचनं नियमार्थमित्यवगम्यते।। ।।७।। ।।न देवताग्निशब्दक्रियमन्यार्थसंयोगात्।। ।।देवताग्नि
रग्नेयोऽष्टाकपाल इत्येवमाद्यः अग्निर्यदाहवनीये जुहोति। तेन सोऽस्याभीष्टः प्रीतो भवति। शब्दो मंत्रः बर्हिर्देवसदनं दामी
त्येवमादिः क्रियाः समिधो यजति तनूनपातं यजति इत्येवमाद्याः। तत्र संदेहः। देवताग्निशब्दक्रियाणामपचारे प्रतिनिधि रूपा
देयः उत नेति। किं प्राप्तं।। पूर्वाधिकरणन्यायेन प्रतिनिधायान्यत् प्रयोगः कर्त्तव्य इत्येवं प्राप्ते ब्रूमः। न देवताग्निशब्दक्रियाणामप
चारे प्रतिनिधिनाभवितव्यमिति। कुतः अन्यार्थसंयोगात् प्रतिनिधीयमानमन्यदेतस्य अन्यश्चैतेषामर्थं न शक्नुयात्कर्त्तुं कथ ते
षामर्थः। देवता तावदुद्देशेनार्थं साधयति। अग्निमुद्दिश्याष्टाकपालः पौर्णमास्याममावास्यायां च परित्यज्यते। यश्चान्येषु हवि
ष्षु विहितानि तेतोदर्शपूर्णमासौ भवतः। तत्रान्यो द्विरूपमानानवाग्नेयत्वाद्देवतायाः अर्थं कुर्यात्। न ह्यन्यस्याग्नेद्दिश्यमानायां द
र्शपूर्णमासौ भवतः। तस्मान्न देवता प्रतिनिधीयते। तथाहवनीये जुहोतीति हवनीयाद्यपचारे नान्योग्निः प्रतिनिधीयत
त्या

यातै

यः। अन्यच्चाहवनीयमिति। कुतः। अन्यार्थसंयोगात्॥ प्रतिनिषिध्यमानमाहवनीयकार्ये न वर्त्तेत। कथं। यमाहवनीयस्य
कार्यमाहवनीयस्योपरि लुप्यमाने यद्भवति न तदन्यस्योपरि। न हि यज्ञतिशब्देन सामर्थ्यात्प्रकृतस्य तस्योपरि लुप्यते लिप्युपरि
लुप्यते न त्वपरि लुप्यमानस्य देशः। किं चिदुपकरोति। तस्मान्नाग्नेः प्रतिनिषेधः। तथा मंत्रापचारेणान्यो मंत्रः प्रतिनिषिध्यते। मंत्रस्य हि
तत्स्थाने नैयरस्मात् क्रियायां साधनं वा असति स्मरणेन क्रिया संवर्त्तेत। तदपचारितमंत्रे यदि तस्यार्थेन्यो मंत्रश्च उच्चारयति स्वे
स्थानेऽर्थप्रतीतेर्थवादमनुच्चारयन् शब्देनार्थं प्रतीयात्॥ अथ प्रतीतमपि पुनः प्रतिनिषिद्धाच्छब्दोच्चारणेन प्रतीयात्प्रतीतिं कुर्यात्
द्वेतं प्रतिनिषिद्धाच्छब्दोच्चारणान्तरीयः। नर्थकः स्यात्॥ न हि शब्देन प्रत्यायितव्यमिति किंचित्कर्माण्यस्ति। यत्तत्तितद्विशेष
केवा। तेन शब्देन वा हिंसादिनं सर्वं तत्तदभावेऽप्यादृतानुरोधानर्थकः स्यात्॥ तस्मान्नाग्नेरस्य प्रतिनिषेधः क्रियापवारेण क्रि
यांतरं अन्यार्थसंयोगात् मिश्रयजिभंतो दर्शपूर्णमासौ क्रतव्यौ तावन्न सांक्रियायां क्रियमाणयोर्नान्तर्द्रव्यं ते भवतः। तस्मा
न्न क्रियायाः प्रतिनिषेधः। देवतायां न तदर्थत्वात्। देवतायामयमपरो विशेषो येन प्रतिनिषिध्यते। देवतानामयदर्थोर्थ राम
विशेष्यते तस्यैव साक्षान्न्या। तच्छब्देन प्रतिनिषिध्यमानो देवतामवर्त्तिनो वादितास्वं विशब्दश्रेयं वायदर्थो वा यतेसातस्यैव १८

स्याः१ नः१ चादित्वाहि देवतान्तवति१

न२

षः। अयमन्यो नीवारः अयो व्रीह्याग्रयणादिति आग्रयणे दस्तावद्विस्पष्ट एष॥ तन्नेदानूपमपि भिन्नं गम्यते। तस्मादन्नो
यागोद्व्यांतर इति॥ ॥ अपि वा व्यतिरेकाद्रूपशब्दाविभागाद्गोत्ववदैककर्म्यं स्यान्नामधेयं यथा पृथक्सत्व वत्॥ ॥ अपि वेति पद
व्यावृत्तिः। एककर्म्यं स्यात् द्रव्यांतरेपि। यदा क्रिया भवति वलनेपतनं वा तदा पितावाने व सोर्थः। न तत्र कश्चित्तद्व्यतिरिक्तो विशे
षाहीनोवा। नाखल्वप्यन्यदेवरूपं न तच्छब्दांतरं वा वक्तुं। नन्वयमरो विस्पष्टः॥ उच्यते भिन्नमेव वयमाश्रयं प्रतिजानी
महे न तु तच्छब्दाश्रितस्य भेदात्स्यात्। न हि स्त्रिलिवासस्विवाभिन्ने तच्छब्दापुरुषभेदो गम्यते। सोपितस्याश्लाभिन्नो गम्यत
इति वेत्। नैव देवं। विशेषमनुपलभमानैरेवं शक्यं वक्तुं। न चास्य विशेष उपलभ्यते। नन्वयमेव विशेषो यदेको विनष्टः एको वि
द्यमानो वर्त्तते न विनष्ट इति यद्युच्यते। तन्न। प्रागस्योपलंभनाद्भूतप्रमाणं नास्ति। तस्मान्नष्टेन न वर्त्तमानमिव ज्ञायते न तद्व्याप्ति
रिक्तो भेदात्पूर्वं लभनात्॥ कथं तर्हि वलतीति प्रत्यय इति वेत्॥ उच्यते देशान्तरे संप्रतिपत्तिदर्शनात् तद्दर्शनात् रामागच्छ
गुर्वलती सुध्यते। तत्र गता पि भ्रत्यत्तद्देशांतरमपि तेन गत इति वा व्यात इं वर्ति आगत इति वोच्यते। सत्यं विनष्टाद्विनष्ट
ो विन्नसावन्यः सो पियजतिशब्दवाच्य एव। यजतिसामान्येन निघतेन तच्छब्देन नोच्यते। तस्माद्यापि नीवारैर्यागं कुर्वीत।

पुरुस्मिंश्च स्वामिन्यपवरतिष्ठवतिसंशयः किं तत्त्वायः प्रतिनिधातव्य उत नेति किं प्राप्तं न स्वामिनः प्रतिनिधिरित्येवं प्रा
प्तरूमः॥ बहूनां यजमानानां प्रवृत्ते कर्मण्यपवरिते कस्मिंश्चित्स्वामिन्यन्यमागमयेत्। उक्तः॥ एवमवैगुण्यं भवतीति। स्वामि
गतासमस्तद्रव्यादिसंख्यातत्र्यापांतपाविनाविगुण्यक्रमत संस्कारनायान्य आगमयितव्यः। ननु स्वामिगता संख्या न वा गम्य
मानः स्वामीतिवद्दस्वामः तेनात्राकैव संख्योपादानमिति। उच्यते। स्वामिगतान भविष्यति। नहि साद्राकाकाकर्तुमिति। इदं तु शक्यं
इह (कर्तुमिति।) कर्तव्ये स्वामिनोपरार्धप्राप्तेऽसमदृशाव्दरैः कर्तव्याः एताव उपपादितं नविधिप्रमिति। तस्मात्प्रतिनिधातव्यं तं चेति। सत्वा
मीस्यान्नसंयोगात्॥ तस्मिन्नागाम्यइदानींसंदेहः। किमसौ स्वामी उत कर्मकर इति किं प्राप्तं स स्वामी स्यात्कुतः संयोगात्त्रेन स्वामि
स्याने त्वेनसंयोगात्॥ योह्यसावनीयते स स्वामी क्रियते स्वामिन्यपवरिते अन्यो यदि स्वामी क्रियते स ततः प्रतिनिधिः स्तेन भवति तस्मा
त्स्वामीति॥ ॥कर्मकरो वा क्रीतत्वात्॥ कर्मकरो वा सो स्यात्। कुतः क्रीतत्वात्। क्रीतो ह्यसौ ते; प्रसुक्तः परिक्रियमाणो हि न स्वामी भ राम
वतीतियः फलं प्राप्नोति स स्वामी यः परस्योपकारे वर्तते स कर्मकरः। न वासौ फलं प्राप्नोति। कुतः। यो ह्यारभ्यपरिसमाप्यते स फ १८
लवान्। एषह्याख्यातार्थः सद्युपक्रमप्रभृत्यसपवर्गपर्यंतं तमाह नन्वसौ तेऽपि तत्त्वविगुण्यं कुर्वंति। स्वामिनोऽसमस्तस्यानामभा

म्तत्वान् ३

लात्तस्मात्तेऽपि न स्वामिनः सोऽपि स्वामिनः फलं न प्राप्नुवंतीति। उच्यते। न शब्दद्वारावराः फलसमवायेऽभवेयुरिति श्रूयते। न संख्या
फलपरियत्तैर्गम्यूता। किं तर्हि पदार्थेषु कर्तव्येषु समस्तद्रव्यावरैर्यजमानाः पदार्था कर्तव्या इति। ते च प्रतिनिहिते न क्रियंते। अफलत्वे
पि न। समस्तसंकल्पं कर्तुमन्यमानयेति। आनीयमानस्यैनं तेन प्रयोजनं॥ ॥तस्मिंश्च फलदर्शनात्॥ तस्मिंश्च द्विदृष्टं गते गते फलं दर्श
ब३ यति। यः सैवायं द्विहितोनां यो मीयतापि नस्य फलमिति। तस्मादपि कर्मकरः॥ ॥३९॥ ॥ स तद्धर्मा स्यात्कर्मसंयोगात्। बहूनां क
स्मिंश्चिदपवरिते प्रतिनिधेयोऽन्य इत्येतत्समधिगतं। इदमिदानीं तत्र संदिग्धं किमसौ स्वामिधर्मा स्यादुत त्विग्धर्मेति। किं प्राप्तं। त्व
त्विग्धर्मेति। कुतः परार्थं सदक्षिणीयश्च परार्थय इति सत्त्विविगित्येवं प्राप्ते ब्रूमः। स तद्धर्मा स्यात्स्वामिधर्मा स्यादित्यर्थः। तस्य हि
कार्ये श्रूयते। यश्चायस्य कः यमनुतिष्ठति सास्तत धर्मैः संबध्यते यथा स्वकर्यधर्मैः स्वामिवरिति॥ ॥४०॥ ॥सामान्यं तद्विकीर्षा हि॥
अतेश्चापवरिते प्रतिनिधिस्तु पादायप्रयोक्तव्यमिति निश्चितं। तत्र संदेहः। किं यत्किंचिद्द्रव्यमुपादाय प्रयोगः कर्तव्य उत सदृशमिति।
किं प्राप्तं। यत्किंचिदुपादाय सर्वं प्राप्ते ब्रूमः। सामान्यं यत्तद्गत स ततदुपादातव्यं सदृशमिति॥ कुतः सर्वेषां कृतिवचनाः शब्दा आरंभत श्रु
यापंगभावेन श्रूयते। तथापि न स्वद्रव्यत्रस्थाः क्रियाप्रसंगभावः। यत्तु क्रियासाधनद्रव्यमर्थेनागृहीतभावि तस्य रिक्षिं दत्तीश्च पाप

यो

मंगभावंयाति व्यक्तेश्चाकृत्या विशेषाः परिच्छिद्यंते ते विशेषा अंगभूताः। अथ तस्याभावे कृतावपवरितायामर्थप्राप्तं किं विद्
अपरिग्रहीतव्यमेव। यस्मिन्सुसदृशे ग्रहमाणे तेषां विशेषाणां केचित्संग्रहीता भवंति। सतत्त्वंतोऽवलभ्यत इति। तत्सदृशं द्रव्यमुप
सतव्यं भवति। तस्माद्व्रीहीणामपचारे नीवाराः प्रतिनिधातव्या इति॥ ॥११॥ ॥ निर्देशात्तु विकल्पे यत्प्रवृत्तं॥ ॥ अस्ति ज्योतिष्टो
मे पशुरग्नीषोमीयो दीक्षितीयः दग्नीषोमीयं पशुमालभत इति॥ तत्र श्रूयते। खादिरे पशुं बध्नाति पालाशे वा बध्नाति रोहितके वा
बध्नातीति॥ तत्र कदाचित्खादिरयूपालाभेन प्रयोग आरब्धे खदिरो नष्टः। तत्र संदेहः। किं वैकल्पिकस्योपादानं उत खादिरस्य सदृश
स्येति किं प्राप्तं। वैकल्पिकस्येति। कुतः। सदृशः खदिरसदृशो न श्रूयते तस्माद्वैकल्पिकस्योपादानमित्येवं प्राप्ते ब्रूमः। विकल्पे
यत्प्रवृत्तं तत्सदृशमुपादेयं। कुतः। यस्य प्रवृत्तं वैकल्पिकं यस्मिन्प्रयोगे तस्मिन्प्रयोगे तन्निर्दिष्टं … दंगभूतं वैकल्पिकमनंगभूतं तमा
श्रितखदिरप्रयोगे पलाशरोहितकौ अनंगभूतौ न शक्नोते यदा खदिरस्तदैव कर्त्तुं मेष काले वाश्रितं तस्मादाश्रितखदिरप्रयोगेऽ न४
तरो नोपादेयो अनंगत्वात्॥ खदिरस्य सदृशमन्वेषितव्यं॥ अन्नाद्यमिति वत्॥ इति नेय ५ अपसि। खदिरसदृशमुपादेयमिति। राम
अशदृमेवं कृतं भवति। तस्माद्देवतादिकाल्पिकमनुपादेयं। नानंगत्वात्॥ नेतदेवमनंगं तस्मिन्प्रयोगे वैकल्पिकमाश्रित खदि ३०

संवधिश्रष्टा

देवतानामन्यदेवतेति न जातिशब्दः तस्मादपि न देवतायाः प्रतिनिधिः॥ प्रतिषिद्धं वा विशेषेणाहितश्रुतिः॥ अथ यत्प्रतिषि
द्धं मयज्ञिया वै वरकाः कोद्रवा अयज्ञिया वै माषा इति। तत्किं कृतं द्रव्यापचारे प्रतिनिधातव्यमुत नेति॥ किं प्राप्तं॥ प्रतिनिधेयमि
ति कुतः आगमो वा चोदनार्थविशेषादित्येवं प्राप्ते ब्रूमः॥ प्रतिषिद्धं न प्रतिनिधातव्यमिति॥ अतिशयेन ह्येतदुच्यते न यज्ञार्हाः
माषा वरकाः कोद्रवाश्चेति यत्तु सर्वं यस्य प्रतिषिध्यते। नैते यज्ञांगभावेन नता इति प्रतिनिधीयमानाश्चांगभावं नीताः स्युः न
स्मान्नैते प्रतिनिधातव्या इति॥ ॥६॥ ॥ तथा स्वामिनः फलसमवायात्फलस्य कर्मयोगित्वात्॥ अग्निहोत्रादौ तु दोहरणं॥ निरुम्पा
देषु स्वामिन्यपचरिते संदेहः॥ किमन्यः प्रतिनिधातव्यो नेति। किं प्राप्तं प्रतिनिधातव्य इति। कुतः। आगमो वा चोदनार्थविशे
षादित्येवं प्राप्ते ब्रूमः। तथा स्वामिनः स्यात्। कोऽर्थः। न प्रतिनिधिरिति। कुतः। फलसमवायात्। योऽर्थी स ऋत्विजः स्वत्यागेन परिक्री रि
णीतः स्वप्रदेयं यत्तस्य तत्स स्वामी॥ यदि स प्रतिनिधीयते। अयं तु स्वामिनः कर्त्तव्यं तत्सर्वं कुर्यात्। तत्सर्वं कुर्वंस्तस्वामी वा स्यात्। न
प्रतिनिधिः स एव हि फलेन संबध्यते। यदुत्सर्गं करोति सफलवान्भवति। तदुक्तं ज्यास्त्वफले प्रयोक्तरीति। तस्मान्न स्वामिनः प्रति
निधिरिति। ॥७॥ ॥ बहूनां तु प्रवृत्तेऽन्यमागमयेदवैगुण्यात्। अत्र सत्राण्युदाहरणं सप्तदशावराः सत्रमासीरन्निति। ते

अल्पसादृश्यमप्राप्तं तद्विधानार्थमनुवादः। प्रयोजनं पक्षोक्तं। प्रतिनिधिपक्षे सोमसदृशस्योपादानं पूतीकविनाशेऽप्य
न्यतरविधौ पूतीकसदृशमुपादेयं॥ ॥१३॥ ॥ न प्रतिनिधौ समत्वात्॥ इदं विचार्यते श्रुते द्रव्ये उपात्ते अपचरिते प्रतिनिधिमुपा
दाय प्रयोगः प्रारब्धः यदा सोऽपि विनष्टः प्रतिनिहितस्तदा किं प्रतिनिधिसदृशमुपादेयं उत तोपात्तस्य विनष्टस्येति॥ किं प्राप्तं प्रति
निधिहितविनष्टतत्सदृशमुपादेयं दृष्टेरिति न्यायेन। एवं प्राप्ते ब्रूमः प्रतिनिधौ न स्यात्प्रतिनिधिरिति। कुतः समत्वात्। यथैव स
र्वैः प्रतिनिहितः श्रुतावकीर्णं यथा एवमयमपि श्रुतविकीर्ण्य। तस्मान्न प्रतिनिधिसदृशमुपादेयं। उपात्तनष्टस्यैव सदृश
मन्वेषितव्यमिति॥ ॥१४॥ ॥ स्याच्छ्रुतिलक्षणे नियतत्वात्॥ अथ श्रुतिलक्षणे कथं। यथा यदि सोमं न विन्देत पूतीकानभिषुणुया
दिति। पूतीकेषु विनष्टेषु किं पूतीकसदृशमुपादेयं उत सोमसदृशमिति। किं प्राप्तं। श्रुतिलक्षणे प्रतिनिधौ प्रतिनिधिसदृश
स्योपादानं नित्यं सोमाभावे पूतीका वचनेन विहिताः सर्वाङ्गश्रुतः सोमाभावः तस्मात्पूतीकसदृशमुपादेयमिति॥ नैतदेव
हि नैतदेवं न हि पूतीकद्रव्यं नामेप्सा। पूतीकेषु ये सोमसादृश्यं तन्नियम्यते। तथा हि पूतीकविधानं दृष्टार्थं। असदृशविधाने
दृष्टकल्पना। अतो यस्मिन्सदृशे पूतीकसदृशापि द्रव्ये न भवति तद्धि ... न हि पूतीकसादृश्यमाद्रियते इति॥ ॥१५॥ ॥ मुख्याधिग

राम
३१

मोहितदभावात्। अथ यत्र विनष्टे श्रुते प्रतिनिधिमुपादातुं प्रस्थितो मुख्यमेवोपलभेत तत्र किं प्रतिनिधिमेवोपाददीत
उत तमेव मुख्यमिति। किं तावत्प्राप्तं प्रतिनिधिरुपादातव्य इति। एवं संकल्पितवान् सोऽप्रतिनिधिमुपाददान एव सत्यसंकल्पो भव
ति। तस्मात्प्रतिनिधातव्यमित्येवं प्राप्ते ब्रूमः मुख्याधिगते तमेवोपाददीत। अभावे हि श्रुतस्यानुकल्पः प्रतिनिधिः श्रुते हि सकलाव
यवः प्रतिनिधिर्विकलः॥ अथ यदुक्तं संकल्पभेददोष इति। श्रुते स सो शिष्टविगर्हणीया वा॥ १६॥ ॥ प्रवृत्तेऽपीति चेत्॥ ॥
अथाग्निहोत्रादिषु कर्मसु प्रवृत्तेष्वपचारे प्रतिनिधावुपात्ते कृतेषु केषुचित्संस्कारेषु यदि तद्द्रव्यं श्रुतमुपलभ्येत तर्हि श्रुतमुपादीय
त उत तेनैव प्रतिनिहितेन समापयितव्यमिति। किं प्राप्तं। श्रुतमुपादीयेत प्रवृत्तेऽपि। तदुक्तं मुख्यागमो हि तदभावादिति। तस्मान्न प्रति
निधातव्यमिति॥ ॥ नानर्थकत्वात्॥ नैतदेवं। येन हि खदिराभावे कदरेण यूपे नियुक्तो भवति। अथ खदिरमुपलभेत तर्हि किं
खदिरेण कुर्यात्। अर्थो हि खदिरोपादाने नानाखदिरोपादानार्थमेव। तस्माच्छ्रुतमुपादीयेत॥ ॥१७॥ ॥ द्रव्यसंस्कारविरो
धे द्रव्यं तदर्थत्वात्॥ प्रवृत्ते पशुकर्मणि यूपकाले महत्कदरद्रव्यं तत्र दिसंस्कारस्य मंत्र खदिरद्रव्यमनेवोज्ज्वलितमकृतत्त्व
दिमुपादेयमिति। संस्काराणां परिलोपः स्यात् इति कदरं उपादीयेत इति। एवं प्राप्ते ब्रूमः द्रव्यसंस्कारविरोधे द्रव्यं प्रस्तादियेत न संस्

ल ३

स्कारात्॥ कुतः॥ तदर्थत्वात्संस्कारा हि द्रव्यं कर्मयोग्यं कुर्वंति। तत्र संस्कारपरिलोपे द्रव्यमपि तावद् दृश्यते द्रव्याभावेन द्रव्यं न
संस्काराः॥ द्रव्यं तेषां द्वारं वृवनप्रामात्यात तदभावेन द्वारानाद्वर्वगच्छेयुः॥ तस्मात्खदिरमुपाददीरन्॥ ॥१८॥ ॥ अर्थद्रव्यवि
रोधेर्थो द्रव्याभावे तदुत्पत्ते द्रव्याणामर्थशेषत्वात्॥ अस्ति यूपकाले खदिरलतापर्णोरप्रासङ्गेन समर्था। कदरद्रव्यं तु समर्थं त
त्र संदेहः॥ किमुपादेयं खदिरद्रव्यमुत कदरद्रव्यमिति। खदिरद्रव्यमिति साहतं हि श्रुतं ततुपादानं शास्त्रविहितं करोति। प्रतिनि
धावश्रुतं करिष्यात॥ तस्मान्न प्रतिनिधातव्यमित्येवं प्राप्ते ब्रूमः॥ अर्थद्रव्यविरोधेऽर्थो प्रत्यादर्तव्यम्॥ तदर्थं हि द्रव्योपादानं नि
योजनादप्रागस्त्वोपत्रोभविष्यतीति। न द्रव्यमेवोपादीयते इति। कथं खदिरमुपाददानो द्रव्यश्रुतिं बाधते अर्थत्वं न गृह्णाति। खदिरमु
पाददानः अर्थं बाधते। तस्मात्कदरद्रव्यमुपादेयं। द्रव्याभावे हि तदुत्पत्तिः प्रतिनिधेरुत्पत्तिरुक्ता। द्रव्याणामर्थं प्रति शेषभूतानि
॥ ॥१९॥ ॥ विधिरप्येकदेशे स्यात्। संनिधी ह्यपः शावंतोऽघवदानमात्रेण निर्वर्त्यं इति यार्थसतिनीवाराः शेषकार्याणामपि राम
प्रतीसतस्तु किमुपादेयमिति। किं प्राप्तं॥ अप्येकदेशे शावदानमात्रे प्रतिनिर्वर्त्यमाने प्रतिनिधिरुपादेयः एकं कारणं शेषका
र्याणां संपत्तिर्भविष्यतीति। अपि वार्थस्य शक्यत्वादेकदेशेन निर्वर्तेतार्थानामविभक्तत्वाद्गुणमात्रमितरत्तदर्थत्वात्। अपि वेति ३२

त्रिमितेऽश्र २

रात्रिसप्रयोगो योनिर्दिष्टः॥ तस्य निर्दिष्टत्वादितरावश्रुतौ। ननु निर्दिष्टाभावे ऽभावविरोधः॥ तेन श्रुतावितिः। किमतो
यद्येवं मदोपरतस्याभावः तदाश्रवणं। नैतदेवं नैमित्तिकं हि तथा प्रतिज्ञायेते॥ सति निमित्ते वचने सति खदिरे इतरो श्रुतावि
ति। तत्र कोदोषः स एवापेक्षितो न पक्षितः श्रुतिविरोधो भवेत्। संस्कारा श्रवखदिरस्य कर्तव्याः॥ खदिरसदृशे तद्गुणगृह्यमाणे श्र
४ बुध्या तैरुता भवति। वैकल्पिकेन चश्रुतेनासंबंधः॥ तस्मादुपात्तसदृशो ग्राह्य इति॥ ॥१२॥ ॥ वचनाच्चान्याय्यमभावे तत्सामान्येन
प्रतिनिधिरभावादितरस्य। इदमाम्नायते। यदि सोमं न विंदेत् पूतीकानभिषुणुयादिति। तत्र संदेहः किमयमभावे निमित्ते विधि
[illegible] प्रतिनिधिनियमश्रुति॥ किं प्राप्तम्भावे विधिरिति॥ कुतः विधानात्। नहि प्रतिनिधिर्विधीयते। साध्यसिद्ध्ये साधनेस्य यत्ने
आदीयते। इदं तु विधीयते तत्कल्पांतर पक्षेः अर्थवद्भवति। तस्मादप्रतिनिधिरित्येवं प्राप्ते ब्रूमः। प्रतिनिधिः स्यात्। कुतः। विनष्टे हि
साधने साध्यसिद्ध्यर्थं साधनं तरस्मुपादीयते अतस्याभावात् न न्यायाः पूतीकाः अन्यद्धि सदृशान्तरमस्तीति तदुपात्तेवचनात्स दृ
शोपात्तेव द्रुतुवासदृशो पूतीकाः अन्यसदृशा नियम्यंते। कथं। नद्विप्रकृतं कर्मादि दृश्यं कर्तव्यं॥ तस्मादवस्थायामंतरेणैव वचनं
प्रतिनिधेयः स्यादितरे प्राप्तमेव। प्राप्तेवचने न विधिरिति नियम्य तयासनुवादो भवितुमर्हति। किमर्थमनुवाद इति चेत्। उच्यते।

पद्यमाहृतिः एकदेशेन व्रीहीणां प्रधानमात्रं निर्वर्त्तयितव्यं। कुतः अर्थस्याशक्यत्वात्॥ ५ यो ह्यर्थो येन कार्यं तत्तावत्
न्निर्वर्त्त्यते। शेषकार्याणि यदि न शक्यानि न तान्यादर्त्तव्यानि। नांगानुरोधेन प्रधानस्य गुणो बाधितव्यः। तदंगं प्रत्यवा
नस्योपकरोति न यदुपकारे वर्त्तते। तच्चैव शेषकार्याणि क्रियमाणे निःप्रधाने व्रीहित्वं विहन्युः। व्रीहित्वं च प्रधानेषाद्धादं
गाभूतं श्रूयते व्रीहिभिर्यजेतेति। तस्मान्न तेषामनुरोधः कार्य इति। असति संगप्रधानविभागे एतदेवं स्यात्। अस्ति त्वसौ। तस्मा
न्नप्रतिनिधिरिति। तथा वाक्यार्थदर्शनमपि भवति तदेवं याहृत्वा दुह्रेतव्यमिति॥ ॥राम॥ ॥इति श्री शाबरभाष्ये षष्ठ
स्याध्यायस्य तृतीयः पादः॥ ॥६॥ ॥ ॥शेषाद्द्व्यवदाननाशः स्यात्तत्प्रधानत्वात्॥ दर्शपूर्णमासयोः श्रूयते यदाग्नेयो
ष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवतीति। तत्र यदि द्व्यवदानमात्रमुद्धृतं व्यापद्यते किं शेषात्पुनरवदेयं नेति भवति सं
शयः॥ किं प्राप्तं द्व्यवदाननाशे शेषात्पुनरवदेयं। कुतः। तदर्थत्वात्। अस्मार्थं हि तद्धविः॥ अस्य च यागो निर्वर्त्तयितव्य इति। तदव
दाने विनष्टे यागः कर्तव्य एवावतिष्ठते। अयो ज नेव यागेन। स वान्येन न क्रियमाणः अत एवाभिनिर्वर्त्तितो भवतीति दिक्षि
तिन क्रियेत। तस्माच्छेषादवदातव्यमिति॥ निर्देशाद्वान्यदागमयेत्॥ अथ वान्यद्धविरागमयेन्न शेषादवदातव्यं॥ कुतः नि

पु२

देशान्निर्दिष्टो दिनवतिमध्यात्पूर्वार्धादवदेयमिति। अवदानं च होमसंबद्धं अवदानं जुहोतीति। तत्रान्यच्छिष्टं मध्यस्यपू
र्वार्धस्य विशेषणार्थं। यद्यतद्धोमसंस्कृतं छिन्नं तच्छेषेणक्रियमाणममध्येनापूर्वार्धेन च कृतं स्यात्। नन्वत्रैव यच्छिष्टं ततो मध्या
त्पूर्वार्धाच्च होष्यते। उच्यते। हुतस्य यन्नाम अंशप्रपूर्वार्धं तच्छेषोदितं नेतरस्य। अथवा निर्दिष्टा इति विनष्टे यन्न्य द्रव्यं निर्दिश्यते सर्वा
णि रूपाणि नष्टे पुरोडाशे पूर्वार्धादिषु रूपेषु वा आग्नेयनता देवता: परिसंख्याय पञ्चेरक्षिति हविषो नाशो आद्यं प्राप्तं। तेन न-२ शेष
द्रवदातव्यमिति। अपरस्त्वाह शेषनिर्दिष्टादिति। निर्दिश्यते हि तच्छिष्टमपरस्मै शेषकार्येभ्य इति। तन्नोपपद्यते। न हि तानि शेषका
र्याणि रूपं वा विधिप्रयोजकानि। न ह्यानि हैत्र प्रयोजनं हविरन्तर्गतानि प्रतिपाद्यं। तस्मात्स्यान्न्यायसमर्थ:॥१॥ ॥ अपि वा शेषभाज्जांस्याद्विशि
ष्टकारणत्वात्॥ अथ स्विष्टकृदर्थमवत्तं यदि विनश्यति तत्र शेषाद्वा अवदेयमुत नेति। किं प्राप्तं पुन: शेषादवदेयमिति। कुत:। न
ष्टत्वेन स्विष्टकृदादवदीयते। कस्य तर्हि सन्निहितस्य। सति हि प्रयोजने सन्निहितस्यावदेयमिति॥ तस्मादवदीयमाने प्राप्त
कृतं भवति। तस्मात्स्यात्छेषादवदेयमिति। एवं प्राप्ते ब्रूम:॥ शेषभाज्जांस्याच्छेष:॥ विशिष्टकारणत्वात्। विशिष्टकारणत्वं तस्या राम
वदानकथं प्रतिपाद्यनेति॥ प्रतिपत्तिश्च विविक्तकारणाय प्रतिपाद्यमानस्य नियमे पौर्विष्टकृते ... ने प्रतिपादयितव्य: तथा ३२

कुत:२

हि स प्रतिपादितो भवति। यद्यपि होमाद्यो हुते विपर्यये तत्तेनैव विवेकेनैर्थ्यग्रहणं प्रयोजयेत्। प्रतिपाद्यमानमप्रसिद्धं होमेन भवति
पादयित्वमसन्निप्रतिपाद्यमानवाक्यापप्रवाक्यविशेषकृतः स्यात्॥ प्रधाने हुते विशिष्टेतर सर्वशेषकार्यसाधारणं। तत्रैवास्याहुतो विशिष्टम
न्यच्च प्रतिपादनीयं॥ ॥२॥ ॥ निर्दिष्टाश्चेष मन्त्रा न्यैः प्रदानवत्। सोदर्शपूर्णमासेत च मन्त्राः प्राशित्रावकृद्धवकरणसंयुवाकमाला
तेषु संस्कृ॥ किमन्यएव तेषां मन्त्रविनियोग उत प्रकरणगतः २ इति। किंस्वातं शेषमन्त्रान्यैरप्रकरणस्थैः कृतैः॥ कुतः। निर्दिष्टत्वात्। नि
र्दिष्टं तेषु यद्यपि प्रत्यक्षमन्त्रैर्यजमानं प्रवमाइडुउपह्वयंतीति। सर्वेषु नह्यपिच पुरुषांतेषु परिसंख्यानार्थो निर्दिष्टाः। कृपतेरडा मैवं
तएवमन्त्रपेयुरिति यथाग्नेयोष्टाकपाल इति सर्वस्मिन्नवयविनियोगानियमे प्राप्तेऽवदानमात्रेऽप्येते विधिर्वा न प्राप्तत्वाच्च
उपादानेनैवकल्पत्वात्परिसंख्यानार्थवत्वाय। एवमेषा परिसंख्येति। अपि च यदि प्रकृताएवमन्त्रपेयुरप्रयुक्तमेये दोषः स्यादकृत्वा
न्नदागणां मन्त्रयंतो म्रियेरन्। सर्वैर्वा समवायात्स्यात्॥ सर्वैर्वा प्रकृतेरेवमस्येत। तस्मिन्मन्त्रणं पुरुषान्कुर्यात्॥ र्थपुरुषाः संस्कृताः॥
प्रवरिष्यंतीति। तेषु विनिगमनाया अभावात्। प्रकरणे समवेतास्ते सर्वे नह्वयेयुरिति॥ निर्दिष्टास्यगुणार्थत्वं। अथय
ड्उत्तौ निर्दिष्टाः स्विगुणार्थाः स॥ अन्यकर्मेदकरत्वादेव प्रकाशकत्वाद्यजमानस्तेषां पंचमोवचनान्निर्दिश्यते। यत्वात्सर्वर्थैवेदं वचनं त

तोनपरिसंख्या। प्रधानेश्रुतिलक्षणं॥ यत्तु अवदानमात्रं प्रधानेनिर्दिश्यते तद्वचनप्रामाण्यात्परिसंख्या नार्थात् नहि
तत्रकस्यचिदपूर्वस्यविधिः इज्यमानोविधीयते। विधिपरिसंख्यासंज्ञायेवविधिर्ज्ञापकः। तत्रस्वार्थेप्रादः परिसंख्यायां
त्रयोदोषाः॥ स्वार्थहानमस्वार्थपरिग्रहः प्राप्तबाधश्चेति। तस्मात्प्रतीता एवंभक्षयेयुरिति। अर्थवदितिचेत्। अयमप्युक्तमश्वमेधे
अविरोधः स्याद्बहुत्वाज्जातीनामितितत्परिहर्तव्यं। नवेदनाविरोधात्॥ अश्वमेधेनसर्वंभक्षयिष्यन्ति॥ अर्थात्सर्वंनभक्षयन्तोअश्वमेधं
नसमापयेयुः॥ तत्राश्वमेधश्रुतिः प्रत्यक्षातोविरुध्यमानोवेदकः प्रायश्चित्तंससर्वंभक्षणंवायतोप्रकृतौ तु नविरोधः तस्मात्सर्वंभक्ष
तामक्षयेयुरिति॥ ॥३॥ अर्थसमवायात्प्रायश्चित्तमेकदेशेपि। सोदर्शपूर्णमासे तत्राग्नेःक्षिभिन्ने जुहोतिस्कन्नेजुहोतीति
तत्रसंदेहः किंकृत्स्नेभिन्नेस्कन्नेवाप्रायश्चित्तंस्यात् उतैकदेशेभिन्नेवेति। किंपुनः सर्वभिन्नेकिमेकदेशाभिन्नेमिति। यत्तु पुरोडाशम
योरपिप्रयोजनायतइत्युक्तमभिन्नं। यश्चकलेऽधिगतेपिप्रयोजनसमर्थंतदेकदेशाभिन्नमिति। किंप्राप्तं। एकदेशाभिन्नेपिप्रायश्चि राम
त्तं कस्मात्। अर्थसमवायात्। समवेतंतत्रभेदनं। एकदेशाभिन्नमपिकृत्स्नभिन्नमपिभिन्नमेव। एवंप्राप्तेनिमित्तेनैमित्तिकंक ३४
र्त्तव्यमिति। नत्वशेषैर्गुणानुतरर्थंहि। उक्तं ८ दृः पद्धंभावर्तयति। नत्वशेषभिन्नेप्रायश्चित्तंस्यात्। विनष्टसंस्कारार्थंहि

कथं तस्योपकारकं भवेत्

प्रायश्चित्तं । कुत एतत् । भेदनवता प्रयोजनमस्ति न होमेन तेन संस्कृतेन प्रयोगः करिष्यत इति प्रायश्चित्तं क्रियते । न च
तेन चूर्णीकृतेन प्रयोगः शक्यते कर्तुं । तस्मान्न तत्प्रायश्चित्तमनर्थकं । एकदेशे भिन्ने न तु संस्कृतेन यथाकृतेन प्रयोगः तस्मादेकु
देशभिन्ने प्रायश्चित्तं स्यादिति । स्याद्वा प्राप्तनिमित्तत्वात् तद्धर्मो नित्यसंयोगान्न हि तस्य गुणार्थेनार्थि निमित्तत्वात् । स्याद्वा प्राय
श्चित्तं रुक्मभिन्नेऽपि । कुतः प्राप्तनिमित्तत्वात् । प्राप्तं हि निमित्तं भेदनं । प्राप्ते च निमित्ते नैमित्तिकं कर्तव्यं । यत्त्वोक्तं व्यापन्नसंस्का
रार्थं प्रायश्चित्तमिति । नायं तस्य धर्मः कुतः नित्यसंयोगात् । नित्यवद्धोमः श्रुतिनित्यं भेदनं । न हि नित्यमनित्यस्योपकर्तुं वोढ्य हि
ते । यद्धि नित्यं दर्शपूर्णमासयोरंगं न तन्नित्यस्योपकारायकुतः ॥ कदाचिद्भिन्नं नैव स्यात् ॥ तत्र कथं तस्योपकारकं भवेत् ॥ तत्र
को दोषः न प्राकृतं नित्येनोपकर्तुं । तेनानित्यमुपकुर्यादिति वचनं प्रमाणमेव । अथ नैमित्तिकं न दोषो भवति । तस्मादस्य तद्धर्म एव ।
अस्मिन्पक्षे यदाभिन्नं तदा होमाय दानभिन्ने तदा होमो नैव विधीयते । भवदीयपक्षे न च तिदोषः नित्यानित्ययोर्नास्ति संब
धइति ॥ तस्माद्भिन्ने मा भूत्प्रायश्चित्तमिति ॥ गुणानां च परार्थत्वाद्वचनाद्व्यपाश्रयः स्यात् । श्रुतेति वचनेनानुलोम्यगुणार्थेऽभि
तुमर्हति । प्रकरणतः सर्वप्रधानार्थं भिन्नेऽमपि होमोऽपि । न च भिन्नमाधारत्वेनोपदिष्टं पतेभिन्नस्याधारत्वेऽपि च न होमान्तरं वि

धीयेत। प्रधानस्यैव हि तदा भिन्नं गुण इति गम्यते। तत्राहवनीयसंयोगो बाध्येत॥ वचनाद्विकल्प इति चेत्। नो निमित्तत्वेन
संभवात्॥ होमस्य च श्रुत्या विहितत्वात्। यदा होमो विधीयते तदा श्रुत्या यदा भिन्नो गुणः तदा वाक्येन। तस्मादाघारो भिन्नः॥
यद्युच्येत निमित्तपक्षेऽपि न होमान्तरं प्रसज्यते तस्यैव होमस्य निमित्तं विधीयते इति। तन्न। अनुपादीयमानं हि निमित्तमित्युच्यते। यदि
हि विधीयेत निमित्तमेव तन्न स्यात्। यदि च यस्यापि निमित्तं सोऽप्युद्दिश्येत तत उद्देश्ययोरुद्दिश्यमानयोः संबंध एव न स्यात्। न चात्र भेद
नं रूपादिवद्विधीयते। भेदने निर्दिष्टे यदन्यद्रूपं तेनाविधीयते॥ ॥भेदार्थमिति चेत्॥ अथोच्येत एवमुपायं तत्कपालं संधीयते।
गायत्र्या त्वाङ्गिरस्वत्(?) यासंदधीनेति तत्कपालं संदध्यामिति। तत्र च वक्ष्यामः॥ नात्रोपयुक्तत्वात्॥ न भेदनस्य चोपभूतिमुपपतेन लेन
संधानं क्रियते होमे न मंत्रेण वा। मृदापि वा संधीयमानस्य भिन्नबुद्धिर्नैवापयात्॥ अनर्थकं वत्सर्वं नाशे स्यात्। सर्वनाशे च पुन्य
यते भिन्नकपालमप्सु प्रवर्हतीति॥ तत्रानर्थकः संस्कारः। मंत्रनु तत्र कृत्वोपधापयिष्यते। नेति ब्रूमः। अन्यदुपदध्यातीति स्यान्नेति त
स्मा नैमित्तिकं कर्म भिन्ने जुहोतीति। नामैव सर्वदाहस्यादेकदेशस्यावर्जनीयत्वात्॥ दर्शपूर्णमासयोः श्रूयते यस्य पुरोडाशौ राम
क्षायतस्तं यज्ञं वरुणो गृह्णाति यदा तद्धविः संतिष्ठेताथ तदेव हविर्निर्वपेत्। यज्ञो हि यज्ञस्य प्रायश्चित्तिरिति। तत्र संदेहः। किमेक ३५

जुत देशेक्षामेप्रायश्चित्तंरु सर्वक्षाममरुति।किमापन्नशापन्ननिमित्तत्वात् सत्वेवैकदेशोवेत्येवं प्राप्तेब्रूमः॥क्षामेतुसर्वदाहेस्यादि
ति।पुरोडाशःपत्न्यावर्तयति॥क्षामेसर्वदाहेप्रायश्चित्तंस्यात्।कुतः॥एकदेशस्यावर्जनीयत्वान्नशक्यतएकदेशक्षाममतोवर्जयि
तुं।नियतमग्निसंयोगाद्धविषएकदेशस्त्रैवपरः।क्षायते।तथाहिपृथुचक्रपालेष्वधःपाकार्थंपुरोडाशोधिश्रीयते।उपरिचास्यांगारा
अभ्युह्यंते॥तदवर्जनीयनिमित्तत्वेनापिक्षूयमाणंनित्यमेवस्यात्।तत्रयस्येतिनिमित्तश्रवणमविवक्षितंभवेत्॥तस्मात्सर्व
क्षामेप्रायश्चित्तमिति॥दर्शनाच्चैकदेशेस्यात्॥नवैतदस्ति।यस्यसर्वदाहेप्रायश्चित्तमिति॥एकदेशक्षामापत्तिनवित्तुमर्हतीति॥नि
मित्तंत्युपलक्षणंक्षामंनाम।एकदेशक्षामेऽपिक्षाममेवंतत्रक्षामेऽपिक्षाममेव।यदितत्रनक्रियतेकृतेनक्रियते
नवैतद्युक्तं।अपिचदर्शयति॥यदातद्धविःसंतिष्ठेतअथतद्देवहविर्निर्वपेदिति।तेनैवहविषासंस्थानंदर्शयति।तत्सर्वदा
हेतावकल्पते।तस्मादेकदेशक्षामएवक्षामेप्रायश्चित्तमिति।अन्येनवैतच्छास्त्राद्धिकारणप्राप्तिः॥पुरोडाशःपत्न्यावर्तयति
ना नवैतदस्ति।यउक्तमेकदेशक्षामायतिप्रायश्चित्तमिति।किंतर्हिसर्वक्षामएवप्रायश्चित्तमुपदेशनिमित्तं।यदास्यैकदेशेपुरोडा
शोक्षायतइतिकल्पोऽपिनिर्वाचयतस्य।नचैकदेशक्षामता।तस्मादवर्जनीयत्वात्।अथयदुक्तं।क्षामेनहविषासमाप्तिंदर्शयते।य

शरत्हविः संतिष्ठेतेति। उच्यते। संस्थाने निमित्तं प्रायश्चित्तं यदा पर्यन्येनापि हविषा तत्संस्थाप्यते तदापि प्रायश्चित्तमिति न
शेषः हविः शाद्वात्रेति वेत। एवं चेदुच्यते त्वन्येन हविषा यदा संस्थाप्यत इति। नैवं तद्धविः शाद्वात् हविः शाद्वं न भवति। यदा तद्धविः सं
तिष्ठेतेति। तदान्येन हविषा संस्थाप्यमानेन तद्धविः शाद्वेन वकल्पेतेति। स्यादित्यपि हविः शाद्रस्तल्लिङ्गसंयोगात्॥ स्यादिति। तुशब्दः पूर्व दन्याय
हविः शाद्रस्तद्धविः संतिष्ठेतेति तद्धविष्कं कर्म संतिष्ठेतेति। ननु मुख्याभावे गौणो गृह्यते नान्यथेति। उच्यते। मुख्याभावमेवायं कथं त्वो ४
यदा संतिष्ठेत तत्कर्मैतेन हविषेति वाक्यमभिधेत॥ अवाचकं तु स्यात्। यस्मात्कर्मैव संतिष्ठते न हविः। तेन संस्थानं निमित्तं। तदेवेति
स्मनुवादे। नुवादस्य दन्यहविष्केपि कर्मणि संस्थिते प्रायश्चित्तमित्यवगम्यते। कथं पुनर्हविः शाद्रः कर्मणि वर्तेत इति। तल्लिङ्गसंयो
गात् हविः संबद्धं कर्म हविः शब्देन हविः संबद्धं युक्तिसंयोगादवगम्यते। यथा धूमसहचारितया देवदत्तस्य व वृक्षादवगम्यते। तस्मात्कृत्स्न
स्यामेव प्रायश्चित्तमिति। यथाश्रुति निवेत॥ दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति श्रूयते। तत्रेदमस्तीव चतुर्णां यस्योभयं हविरार्तिमा राम
र्छेत् ऐन्द्रं पंचशरावमोदनं निर्वपेदिति। तत्र संदेहः। किमुभयस्यार्तौ पंचशरावो निर्वप्तव्य उतान्यतरस्यापीति। किं प्राप्तं। इति वेत्पदस्य ३६
स्विदं वजातीयके [illegible] इति। तत्र ब्रूमः। उभयोरिति। कुतः। यथाश्रुतिमनतिवर्तमहे। इति यच्छ्रुत्या तदवगम्यते। उभयो[illegible]स्य
स्यान्यर्तिमि
श्चार्तौ श्रूयते।

माणं वविवक्षितुं न्याय्यं। उतरथा यावदेव हविरिति तावदुभयं हविरिति स्यात्॥ तस्मादुभयोरार्व्यपं वसरावदृति॥ तद्वे न॰
दापत्ता उपपातेरि कारणम्॥ नैतदेवं। उपपातोह्यात्रिसंबद्धं द्रव्यं तत्कारणं। तस्य लक्षणं हविरार्त्तिर्न घस्तं समस्तं चनिमित्तं न ह्युभय
चाद्वेन तार्को विशाष्टुं विशेष्य माणे हि वाक्यमभिधेयं त। हविष आर्त्तिपंचत्वाराव॥ सचोभयस्य हविष इति॥ आहुर्यदि विशेषणं नष्टुष्यते। ह
विषापि तेविशेषणं नेप्राप्नोति। तदभिधीयते मृष्यामहे हविषा विशेषणं॥ अविशेष्यमाणेन थैवं स्यात्। यस्यार्त्तिमान्छिद्यति अविशे
षाद्यत्किंचिद्रूष्येत तत्र सर्वस्यैव यत्किंचिदार्त्तिमच्छति। अतत उभारितं निमित्तं। तत्र यस्य नित्यत्वं एवं वचनेनित्यत्वनुपपन्नं गम्यते। तस्मा निमित्त
द्रवद्रूपमार्त्तिविशेष्यासाव हविषा विशेष्यते। तथा हविरार्त्तिसंबंधनिर्दिष्टं निमित्तं पंचशरावस्य साक्षान्निर्दिष्टत्वात्संबंधं वक्तुं। हवि
षोरुभयसंबंधो वाच्यो न स्यात् उद्देशत्वेन वाक्यं श्रुते॥ ननु हविरार्त्तिसंबंधोऽपि वाक्ये नैव [illegible] उच्यते॥ आर्त्तिनिर्दिष्टत्वेन श्रूयत एव गम्यते
सावयवस्यात् हविरुभयसंबंधो संतत्र निर्दिश्यते॥ तस्मान्न तत्संबंधो निर्दिश्यमानो निर्दिश्यत इति। कथं तर्हि उभयशब्दः॥ उभय
मतिनिरालातुवादः॥ एकस्मिन्नेपानेऽपरस्मिन्नपि। तस्माद्युक्तं यस्योभयं हविरार्त्तिमाच्छिद्यति। अथ कस्मान्न पदद्वयविशिष्टं निमि
त्तं प्रतीयत इति॥ यस्योभयमुभयं विशिष्टं हविरार्त्तिमाच्छिद्यति। अत्रोच्यते। कथं तावद्रूपान्नन्यते विशिष्टेनार्थेन विशिष्ट आर्त्ति

र्थो

निमित्तमाह विशिष्टस्यार्थस्य संनिधानात्स विशिष्टोऽर्थः संनिहित इति । किं पुनः स्याद्यद्येवं न भवेत् । ननूभयपदार्थैर्विशिष्टोऽर्थोऽभि
र्निमित्तमिति गम्येत । अत्रोच्यते इदं तावद्देवानांप्रियः प्रष्टव्यः यस्यापि हि विशिष्टो योऽर्थः संनिहितो न भवति किं तस्यापि विशिष्टो दंडे
पराणुद्यत इति । किमतो यन्न पराणुद्यते । एतदतो भवति । अविशिष्टार्थगताप्याप्तिर्निमित्तं पंचशरावस्य भवति । ननूभयपदार्थो हविर्वि
शेष्यति । नाहविः पाठेनासंवध्यमानस्यांशं शक्नोति विशेष्टुं । आनंतर्यात्संमतस्यैते तर्हि तथापि न समर्थः । न ह्यसौ निवृत्तिं प्रयोज
यति । आह विशेषणवचनत्वात्तत्र वर्तको भविष्यति । यथा शुक्लां गोरानीयतामित्यभिहिते न कृष्णामानयंति शुक्लामपाहृष्ट एवं गां न
व्याङ्क्षिभ्यो व्यावर्तयति । उच्यते । विषम उपन्यासः ॥ न तत्र गवा कृत्यादर्वलक्षितमित्वात्तस्यानयनमुच्यते । तत्रापि वेदेवमभविष्यत् पतां
न्नैवैनां शुक्लां शब्दश्चेत्स्यात् । उभयविशेषणविशिष्टं तु तत्रानयनं प्रधानमुच्यते । इह पुनरार्थिरुद्विष्टलक्षिते द्रव्ये पंचशरावः
किं पुनः कारणं । प्रधानभूते आख्यातार्थे संसृष्टविशेषणं भवति परार्थेषु न विप्रयुज्येति । तदुच्यते । प्रधानभूते आख्याते उपयोगवाक्ये
वेधार्थे सदृशोऽर्पते । तत्रोभयविशेषणविशिष्टएकस्माद्वाक्यादवगम्यते । तद्विशिष्टं वशरावाद्रतीभवति । अन्यतरविशिष्टं तु पूर्वं न स्म राम
तेऽत्रुपति । यत्र पुनरार्थितलक्षिते द्रव्ये आरभ्यार्थः संकीर्णेनेतत्र सर्वेषु तज्जातीयेषु प्राप्तो भवति । न तत्रैकस्मिन्निर्दिष्टे कृतमन्येन ३७

ता

शेषत्वं भवति। अथोच्यते। आर्त्तिविशिष्टेन हविषा उभयस्य संबन्ध इति। तदपि नोपपद्यते। न ह्यार्त्तिमा[illegible]दिति हविर्विशे-
षणत्वेनोपादीयते किं तर्हि पंचशरावस्य निमित्तत्वेन हविरार्त्तेरुभयपंचशरावसंबंधे योगपद्येन। अनुपगम्यमाने वाक्यं भिद्य-
ते। अथ हविरार्त्तिलक्षितेन संबध्यते आर्छेदिति पुनर्हविर्विशिष्टेनोभयशब्देन संबध्यते तथापि वाक्यं भिद्यते। तस्मादुभयविशे-
षणार्त्तिर्निमित्तं। आह यद्येवाख्यातार्थप्राधान्ये उभयविशिष्ट उच्यत इति नान्यतरविशिष्टो निमित्तं गम्यते। एवमितरस्मिन्नपि प-
क्षे उभयविशेषणविशिष्टो सैच्यत इति। यद्यपि स्वेनात्मना विशिष्टस्तथाप्यन्यतरविशिष्टमचंति। न निमित्तं भवितुमर्हती-
त्युभयोरविशेष इति। तदभिधीयते मत्स्यल्लो उपादेयत्वेन विशेषणद्वयं त्वत्स्यद्वेपुनर्लक्षणत्वेन। आह किमतो यल्लक्षणत्वेनो-
च्यते एतदतो भवति। हविरार्त्तेर्लक्षणत्वेनोच्यते तस्य किंचिद्रूपमिति तदलक्षितमस्तु यमानेन विज्ञायेत कस्यास्मादिति। अथवास-
र्वस्यैव रूपस्येति गम्येत। तस्मिन्नुनयस्मिन्नपि विशिष्टे सति तुल्यार्थं लक्षयितुं हविरार्त्तिः उच्यते। तत्र द्वयमापतति यद्धविरार्त्ति-
रुक्तं तदा निमित्तमपेक्षितं ततो हविरार्त्तिरुभयमनुभयं वा निमित्तं गम्यते। अथ यद्धविरार्त्तिरुक्तं तदुभयमिति ततो नार्त्तिर्हवि- राम ३८
षा विशेष्यते। हविषाविशिष्यमाणया मात्रा उभयशब्दे हविर्विशेष्यते इति नैतदवकल्पते। कथमिति। एवं किन्तु विशे-
ले

ष्योभयस्य हविरार्त्तिरुभयमितिति तच्च पुनर्बलवं यद्धविरार्त्तिरुभयं तच्चेदा निमित्तीक्रियते न विशिष्टेनार्त्तिः संबध्यते इति।
…र्थोभय हविःशब्दावार्त्तिविशेषणार्थमुच्चार्येयातां। अथ पुनरुच्चारणं न क्रियते तथापि यद्यपि हविःशब्दः तेनैव तुभयाश्रय-
…णार्थेनोच्चार्यते। तथापि च विशिष्टमार्त्तेर्लक्षणं स्यात्। अविशिष्टमुभयस्य विशिष्टं रूपं पुनरुच्चारणं क्रियते तत्र वाक्य-
भेदः। एवमुभयशब्दो यथाष्ठिति नासंबध्यते न हविर्विशिष्टं स्यात्। तत्राविशिष्टस्य हविष आर्त्तिर्निमित्तं स्यात्। अथ हविःश-
ब्दः संबध्यते पुनरार्त्तिसंबंधार्थं हविःशब्दसहितमुच्चार्येत ततः चैतदितिवा सर्वनाम्ना निर्दिश्यते तत्र स एव वाक्यभेदः। उपादे-
यत्वे पुनर्नान्यतरविशेषणत्वेन श्रूयाज्ञानं द्वयमप्यार्त्तिविशेषणमुच्चार्येत तत्रान्यतरविशिष्टार्त्तिर्निमित्तं भविष्यति। लक्षणत्वे- ना ६
…र विशिष्टा भवतीत्येष विशेषः। अपि च समर्थस्यैव पदस्य पदान्तरसंबंधे सति वचनाद्यदिते … न पदेन सत्यां गतौ सन्नि- ती १
तेनापि संबंधो न युक्तः॥ न ह्यभवति भार्या राज्ञः पुरुषो देवदत्तस्येत्यत्र राज्ञा पुरुषविशेषणं असत्यां गतौ उपादेयस्यानेकस्य-
…प्रधानेन संबंधो वकल्पते व्यवहितेनापि प्रधानादर्थो बलीयानिति॥ लक्षणत्वे तु लक्षणद्वय सन्निपाते … र्यहे येन्यतमा-
स्मिन्नपि सहितो पुरोगा वा हातव्यो भवति॥ ॥६॥ ॥ हिमाभिषवमहत्त्वं तत्र। ज्योतिष्टोमे श्रूयते हविर्द्धाने ग्रावभिरभिषुत्याह- गा

हवनीयं कृत्वाप्रत्यं वा। परेतस्य सदसि भक्षान्भक्षयंतीति। तत्रान्येन वचनेनाभिषवहोमः॥ यजतिना होमः। तौ ता वत्र विधी
यते न वतयोः क्रमोऽर्थादेव हि सिद्धः प्राप्तः॥ तस्मादेव होमाभिषवाभ्यां भक्षणं विधीयते। अग्निहोत्रे होमे भक्षणं क शि
र्तव्यमिति। नत्वेष संदेहः किंतु भक्षयेयं उतान्यतरेणापि भक्षणमिति। किं प्राप्तं होमाभिषवभक्षणं वक्तव्यं॥ तद
द्वयस्यात विधानानि। कथं नैतदेवं संबध्येत अभिषुत्य ततो हुत्वा ततो भक्षयेदिति नानेनाभिषवस्य होमस्य च क्रमः कीर्त्यते॥
अभिषुत्य वेतु हुतेति हुत्वा भक्षयंतीति वाक्यं एव विधीयते। अभिषुत्य भक्षयेति हुत्वा च भक्षयंतीति। तस्माद्धोमाभिषवयोः प
रस्परेण संबंधो नास्तीति एकेनापि भक्षणं संबध्येत अपरेणापि अभिषुत्य भक्षयति हुत्वा भक्षयंतीति॥ तस्मादन्यतरेणापि निमित्ते
न भक्षणं भवतीति॥ ॥ उभाभ्यां वा न हि तयोर्धर्मशास्त्र॥ उभाभ्यां वा निमित्ताभ्यां भक्षयेत्। न भक्षणं होमाभिषवयोर्धर्मो विधीय
ते। किं हि स्यात् होमाभिषवौ प्रधानमिति भक्षणं गुणः प्रतिप्रधानं भिद्येत। अथ पुनरुभाभ्यां निमित्ताभ्यां राम
भक्षणं विधीयते तस्मिन् विहिते एकार्थो विधिर्भवति। तेनैकवाक्यं तदेवं भवति पर्यवसितं भवति। अभिषुत्य हुत्वा भक्षयंतीति। तत्रै ३९
तदेवं तत्र वाक्यं कृत्वा भक्षयंतीति। न च भक्षणवाक्यस्य स्वांतरवाक्यप्रमाणं भवति। एवं तत्र वाधनात्। यथा नोद्यंतमादित्यमीक्षे

ठ २

अपरस्मिन्नपि यथा तिलक्षिते तदुक्तमेवैतत्। क्रमप्रतिषिद्धं च किमिति न क्रियेत। व्याख्यातार्थं पुनः प्रधानेनैतस्या
तिलक्षितेन संबंधः। तच्च तदानतिक्रांतरेवानुपसंक्रियमाणे पितृतमेवं प्रधानम्। सगुणं च प्रधानं भवति। न च किंचिदप्युतं ही
यतेति॥ तस्मात्तद्विशेषणं गुणः। ननु हुतयोर्हुतयोरेकविरात्रीति तस्य वशाराय उक्तं। तत्र शाकं विशेषणेन प्रति
षेधस्यावाचकेन निवर्त्तयितुं। अपि च उभयशब्देन हविषां संबध्यमानेऽपि नैवोभयविशिष्टानि प्रतीयंते। तत्किं कारणं हविष
उभयशब्दः संबध्यते न निर्माणविशेष्यत्वेन पदेन। तत्र संनिहितेषु उभयशब्देन हविःशब्दस्य यावानर्थस्तावत्तौ वाक्यैः संबध्यते। अवि
शिष्टश्च तत्रार्थः। तस्मान्नोभयविशिष्टानि निरिष्टिः। अथ यावदुभयविभक्तिरूपो उभयशब्दस्य अभयविशिष्टानि इत्युच्यते। तन्न विभक्ति गा ६
संयोगो हविर्विशेषणं अभयशब्दश्रुत्या क्रतुसमभिव्याहारात्त्रिविशेषणं। न ह्येषां हविर्विशिष्टस्य समभिव्याहारे
क्षि। अथो अतः असत्यपि समभिव्याहारे अविशिष्टसंनिधानात् विशिष्टैर्वाक्यैः प्रतीयत इति। तत्र असत्यपि प्रकांतं प्रयोगसन्नि
धानमकारणं भवति यथा भार्गवो यज्ञः पुरस्तादेव दर्शयति। एकवाक्यगतत्वात् विशिष्टं गम्यतरमिति चेत्। नैतदेवं एवमस्मिन्नपि
वाक्ये तदयवयत् तस्यानपेक्षितस्यैव भवति। संबंधः। यथा स्वेन प्रकृतिशेषेन यदेना तद्दितिना न पेक्षितस्य से वि

तेतिप्रतिषेधोवगम्यतेमहावाक्यादवांतरवाक्यादीक्षणविधानंतस्मादन्यतरनिमित्तंप्रक्षणमयुक्तंमहावाक्यादिदमवगम्य
तेद्वन्निमित्तंप्रक्षणस्येति। प्रक्षणंवान्यथानुपपन्नमुक्तंपरित्यज्येत। तस्मादुभाभ्यांप्रक्षणमिति॥ ॥पुनराधेयमोदनवत्। अग्निहोत्रे
हूयतेयस्योभावनुगतौ अग्नीअभिनिम्लोचेत्यस्यवाभ्युदियात्पुनराधेयमेवतस्यप्रायश्चित्तिरितितत्रसंदेहः। किमन्यतरानु
गमनेपुनराधेयंउतोभयानुगमनइति। किंप्राप्तंपुनराधेयमोदनवत्स्यात्॥ यथापंचशरावोन्यतरस्याप्तौभवतिएवंपुनराधेय
मन्यतरानुगतौभवितुमर्हतिवाक्यभेदप्रसंगादिति। यथाउदयास्तमयहस्तशतंवरिष्यामीत्यनेनमेवतस्मिन्नितइति॥ द्व्योतत्त्वैभयोः १ द्वौ
पुरा.धे. स्यात्। द्व्येविनष्टेतस्यैवरूपस्याग्नित्रयस्यप्रायश्चित्तं। तस्यांहष्टंमयोजननेकथंद्वयोर्भवेदितिपुनराधानंक्रियतेतत्रैवधर्मेणावनी
सहोपघातेनएष्यहेन। तत्रान्यतरानुगतौतत्राकारणत्वकआधानं। विपुराणंहिस्यात्। अथद्वितीयमप्याहवनीयस्यद्वितावदाहवनी
यः तत्राहवनीयोनाहोमार्थीस्त्येवेतिनसहोमार्थःस्यात्। यत्रहोमाःपिंडसघातेसआहवनीयः यतएषसंस्कारशब्दः संस्कारशब्द
स्यैकेनापिसंस्कारेणविनानभवति। एकोपिवसंस्कारायहोमार्थतां यदाहवनीयेजुह्वतीतिश्रूयते। तदेकस्मिन्ननुगतय
स्मिन्नाधीयमानेवैगुण्यंद्वयोरपिवैगुण्यमेव। तस्मादेकस्मिन्ननुगतेपुनराधेयमग्न्यपन्नादिति॥ ॥७॥ ॥पंचशरावस्तुद्रव्य

श्रुतेः प्रतिनिधिः स्यात्॥ दर्शपूर्णमासयोः श्रूयते यस्योभयं हविरार्तिमार्छेदैन्द्रं पंचशरावमोदनं निर्वपेदिति। तत्र संदेहः॥
किं हविरार्त्यै पंचशरावः प्रतिनिधिरुत निमित्तकर्मांतरमिति। कथं प्रतिनिधिः कथं वा कर्मांतरमिति। यद्येवमभिसंबंधो भवति
ऐंद्रं पंचशरावं निर्वपेत्। उभयादिति ततः सान्नाय्यस्य कार्ये पंचशरावः प्रतिनिधिः। अथ पंचशरावो देवतया संबध्यते पंचशरावमैं
द्रं उभयार्छितं ततो निमित्ते यजतिर्विधीयते। किं प्राप्तं। पंचशरावस्य द्रव्यश्रुतेः प्रतिनिधिः स्यात्। पंचशरावः सान्नाय्यप्रतिनिधिः
उक्तः॥ द्रव्यश्रुतेः ~~उक्तः द्रव्यश्रुतेः~~ द्रव्यस्य निर्वापे श्रवणे नैंद्रसंबंधः कृतः। एवं निर्वापविधिर्भविष्यति। तत्र श्रुतिर्विध्यधिका। द्वार
त्वाद्द्रव्यदेवतासंबंधवाक्यं स्यात्तत्र दुर्बलं श्रुतेः तस्मात्प्रतिनिधिरिति। चोदना वा द्रव्यदेवताविधिरवाच्ये हि। निमित्ते वा पञ्चतिः क
र्मांतरं द्रव्यदेवताविधिः द्रव्यदेवताभिः हि श्रूयते पंचशरावमैंद्रं उभयार्छिति। इतरथा ह्यैंद्रमिति प्रमादपाठो वा गम्येत। ऐंद्रमाहुरपो
[illegible] यथापि पाद ऐंद्रमिति स्यात्। अवाच्ये हि ते देवते। इंद्राग्नी देवन रेंद्रो महेंद्र [illegible] वदित्तुं विशेषणे लेवाक्यभेदः। किंतु
[illegible] निर्बलीयसी तु [illegible] समये वं [illegible] तरस्मिन्प्रद्वेवा घ्यते तरां श्रुतिः ऐंद्रमाहस्यातं चेत्तात्॥ ॥ ७ ॥ समस्तामभेतस्या राम
[illegible]रः सरुषनैमित्तिको यागः किममावास्याप्रत्याम्नेत्येति। किं प्राप्तं। समस्तामैंतस्मान्नात्। सरुषयागः आमावास्यायो ८०

ने

प्रत्याम्नातुमर्हति। उक्त: स्थानात्। यागेनैव यागएव श्रूयमाण: यदि न विनष्टस्यांगं ततो ध्रुवान्न भवति। अथ यागं
नि: प्रयोजनस्यार्थं क्रियमाणं नि: प्रयोजनमेव भवितुमर्हति॥ विगुणेन वनि: प्रयोजनं विनष्टमवास्य मितिप्रत्यूहं इदम
पि कर्तव्यमितिचान्द्रं। यदि न ष्टंतन्नि: फलमिति न कर्तव्यमिदं च कर्तव्यमिति प्रत्याम्नायो वगम्यते। अथ विधिर्वा निमित्तसंयो
गात्। अंगवैतद्विधीयते॥ हविषआर्त्तौ निमित्ते याग: श्रूयते। तत्र त्रयमापतति। यद्वा निमित्ते सति त्रैकल्प्यं फलं। यद्वाम
वास्यायायत्तोर्थ्यं तदस्य। यद्वा तस्यांगमिति। स्वप्रधानता वन्न। कल्प्यत्वादेव फलस्यानामावास्याकार्यद्वि कारणमश्रवणा
त्। नैवं श्रूयते तस्या: कार्यं वर्त्तत इति। कर्तव्योपदेशादपिनान्यतमा अवसानं त्रिष्वपि पक्षेषु। तेषु वैपक्षेषु विर्वान्हितेषुकर्त्त
ब व्यतोपदेशो वकल्पते। नन्वेवमभिसंबंधो भविष्यति यस्यामयं हविरार्त्तिमार्छति स एतेन यागेन साधयेत यत्तद्धि पितुकामो यपितुका
य दमावास्याया: फलमिति। अत्रोच्यते फलपदेन संबंधाभावान्न तत्तं वक्तव्यविधायकेवाक्यं श्रुत्वा न यागकर्तव्यता विधीय म:किंया
यते सा वचाक्रा इलीमसी। तस्मान्न तत्कार्यं वर्त्तत इति। किं तर्हि प्रयोजनं तस्या अमावास्यायां अंग। नन्वेतदपि नाक्षितस्या अ सोसा। ४
गमिति। अत्रोच्यते। तस्मिन्निधिसमाम्नानात्। न्त्यप्रयोगवचने नगच्छते दर्शपूर्णमासाभ्यां फलं साधयेत्स वैरंगै: सहत्रयस्या वा

गु ३

तविषयागइतिकर्त्तव्यतेति। तस्मादेतदवगम्यते विनष्टेहविषिद्रव्याभावास्यांशुभ्रन्नराङ्कोतिस्वकार्यकर्त्तव्यतदनयेति
कर्त्तव्यतयासहितंशङ्कोतीति। तस्मान्निमित्तेकर्मणामिति॥ ॥९॥ ॥विश्वजित्त्वप्रवृत्तेभावः कर्मणिस्यात्‌। एतदा दू २
म्नायते सर्वेभ्यो वा एष देवताभ्यः सर्वेभ्यः पृष्ठेभ्यः आत्मानमारंतेयः सत्रायागुरते विश्वजितातिरात्रेणएस वपृष्ठेन सर्ववेदस
दक्षिणेन यजेत सर्वाभ्यस्त्वदेवताभ्यः सर्वेभ्यः पृष्ठेभ्य आत्मानं निःक्रिणीत इति सत्रायागोरणेनिमित्ते विश्वजिदाम्नायते त
त्रसंदेहः किंसत्रायामूर्प्रथयः सत्रेप्रयुक्ते तस्य विश्वजितुतयो न प्रयुक्तस्येति। किंप्राप्तं॥ यत्रप्रयुक्तेयत्नेनत्वविशेषादय
वाप्रयुंजानस्येति। कुतः निमित्तेकर्मणामेवंजातीयकमभियुक्तेतदप्रयुज्यमानस्यकथमंगंस्यात्‌। इत्येवंप्राप्तेब्रूमः। विश्वजि
वि ४ त्वप्रवृत्तेभवेत्‌। सत्रस्यक्रियायाञ्जनावैश्वजित्किंकारणमेवंहिश्रूयते। यः सत्रायागुरतेस विश्वजितातिरात्रेणयजे
तेति यः सत्रंकरिष्यामीत्येवमागुरतेस विश्वजिद्यागेन साधयेत्‌॥ यदर्थमसौसत्रंकर्त्तुमिच्छति तदर्थमितिगम्यते। कथं राम
सत्रागुरतेतेसतेनयजेतयागेननिवर्त्तयेदितिवाक्यार्थोवगम्यते। नयागंनिर्वर्त्तयेदिति। कुतः यागस्यगुणत्वेनश्रवणा ४१ पं
त्तस्यगुणत्वेत्ततीयानिर्देशात्प्राधान्येहिफलंकल्प्येत। इतरस्मिन्नुपपन्नेप्रत्यक्षात्‌द्वापात्फलावगमः॥ ॥निष्क्रयवादाच्च॥ ए

न्यो बा

तंत्रश्रूयते सर्वाभ्य एव देवताभ्यः सर्वेभ्यः पृष्ठेभ्य आत्मानं निष्क्रीणीतइतिनित्यः। अयद्वारेण च संप्लवः। प्रवृत्तेन तु उत्पन्ने तेनतस्या
दपवृत्ते विश्वजिदिति। अथ कस्मान्नैव मासि संबंधः क्रियते आग्रयणसत्राय विश्वजिता यजेतेति विश्वजितः सत्रस्य च संबंधो विज्ञा
यते आगोरणवेलायामिति। नैव मागोरणविज्ञापणहि सत्रे। सत्रायेति सत्रविश्वजित्संबंधे व्यवहितकल्पना स्यात्॥ अतिथ्रपु
रुषेण विश्वजितं संबंधयति विश्वजिता यजेत पुरुषपरिताने सत्रेण। सत्रस्य विश्वजिद्यागाइति। आगूर्येति वेत्थं च वचनमर्थवद्भवति॥
प सत्रांगलेवर्थप्राप्तं न वक्तव्यं। नैव नवागूर्य जेतस्यागोरणं नंतर्यं शक्यं विधातुं। अप्राप्तौ वोर्ध्वं हितयाध्यीयत समानवृत्तदृता हिरा
हृवतीपूर्वकालभाव स्यवा यं प्राप्नुवान्न वक्तव्यता। तस्मादागूर्येत्सत्रेव विश्वजिता भि संबंधः सर्वतोपि आगूर्य सत्रेण न यजेत तस्य वे
विश्वजिदिति॥ ॥१०॥ ॥ वत्ससंयोगे व्रतचोदनास्यात्। दर्शपूर्णमासयोः श्रूयते बर्हिषा पूर्णमासे व्रतमुपयंति वत्सैरमावास्या
यामिति। तत्र संदेहः। किं वत्ससाधनकं विधीयते उत व्रतस्य कालः। अथ वत्सो व्रतांगमिति। किं प्राप्तं। वत्ससाधनकं व्रतं विधीयते। अ
मावास्यायां वत्सैर्व्रतं कुर्यादिति। वत्सैः संयोगो त्र पूर्वो विधीयते। तस्मिंश्च विधीयमाने उभयमपि विहितं भवति वत्सो व्रतं च॥ का
लो वा तत्र संयोगाद्यथोक्तस्या। यथोक्तस्यैव वनांतरेण प्राप्तस्य व्रतस्य कालो विधीयते। कुतः। उत्पन्नसंयोगायं व्रतस्य नोत्पत्तिसं

योगोः कथं॥ अमावास्यमांसं वत्सपिच्छि व्रतं व्रतयंतीति विहितं प्रज्ञातं अप्रज्ञातस्तु कालस्तस्मात् कालविधिरिति। अर्थापत्ति
माणञ्च। नशाकोऽत्रार्थः परिमातुं वत्सेन व्रतमुपयंतीति किं वत्सो च व्रतयितव्यः एवं वत्सेन व्रतमुपेतं भवति किं वत्सेन हस्तस्थाली नीय
न व्रतयितव्यं। एवं तदुपेतं भवति उत वत्सं संनियाय्यानुपेयादिति नैव व्यवतिष्ठेत तत्रास्यार्थः॥ कारणं ह्येतन्निर्दिष्टं नेति कर्तव्यता॥
एतावदुक्तं वत्ससाधनं व्रतं कुर्यात् कथमित्येतद्विशेषाकांक्षमेवावतिष्ठते नैवार्थः परिच्छिद्यते। व्रतं किं च वत्सेन क्रियत इति। अथवाप
ह्यात इति। तथा वत्सो व्रतेन संबध्यमानः स्यादपरार्थमापद्येत परार्थता वास्य द्योतयति विभक्तिः तृतीया॥ सा च कृतमेहिसा भवति
तितस्मादपि कालार्थः संयोगः वत्सकृष्णतिसंयोगात् दंगस्यात्। यदुक्तं विहितत्वात् तस्यानुवाद इति सत्यमेतत्। यत्र तु काल विधानार्थ
इति तन्न॥ वत्सः स्वदंगत्वे न विधीयते। कुतः श्रुतिसंयोगात्। वत्संगो विधीयमाने श्रुतिर्निमित्तं काले लक्षणया दः स्यात् श्रुति
लक्षणाविषये वा श्रुतिर्न्यायान लक्षणा तस्मादेगव स इति। कालस्तु तस्यादेवादनात्। कालस्त्वेष निर्दिश्यते। न वत्सोऽयं विधीय
ते नैषावादना वर्हिषा वै पूर्णमासे व्रतमुपयंति वत्सैरमावास्यायामिति। कथमवगम्यते। विधिनैव वाक्यत्वात्। पुरस्ताच्च विधिराम्ना
यते। पुरा वत्सानामपाकर्तोर्दंपती अश्नीयातामिति य एष विधिः साक्षात् कर्मणि श्रुत। अन्तु वादः कथं तथा भूतस्यार्थस्य भवति। नवव

घत

राम
४२

सांगतामात्रस्य कालस्य इति। अनर्थकश्च कर्मसंयोगे॥ नवमाकृते वत्से अप्रतिपित्सु कर्मसंयोगे वत्सेन वा नार्थः शक्य
ते कश्चित्कर्तुं तस्मादपि न वत्सांगं॥ अवचनाच्च स्वशब्दस्य॥ न चैतदुच्यते वित्सस्य अपि तं व्रतयितव्यमिति नास्यार्थस्य स्वशब्दः
श्रूयते। वत्स इत्यादि तु विशदः न मासे वर्तते। तस्मादपि काल इति॥ कालश्चेत्संनयत्सूपदेशः तल्लिंगसंयोगात्॥ कालार्थः संयोग इत्ये
२ तत्समधिगतमिदानीं संदेहः किं संनयत एवैष कालः उतासंनयतोऽपि। किं प्राप्तं संनयत एष कालः अपाकरणं लिंगमिति
कालार्थत्वादुभयोः प्रतीयेत॥ वाशब्दः पक्षं व्यावर्तयति। न संनयत एव। असंनयतोऽप्येष कालः स्यात्। कुतः कालार्थत्वान्न व
त्सापाकरणेन प्रते किंचिदस्योपाजनमस्ति। कालेन तूभयोर्जननं संलक्ष्यते। कथं तु न वत्सापाकरणं कालार्थमिति परार्थत्वात्॥ पय
से हि तदपाक्रियते। तथा हि दृष्टार्थता भवति। इतरथा अदृष्टार्थता स्यात्। तस्मादुपादेयत्वेन वत्सापाकरणं श्रूयते इति। यत्तु तल्लिं
गसंयोगात्संनयत एवेति। तन्न। असंनयत्स्वपि कालाहानात्। यस्यापि न सांनाय्यं। तस्यापि वत्सापाकरणमेव न स्यात्।
न तु वत्सापाकरणं कालोऽपि। कालेन वनः प्रयोजनं न वत्सापाकरणेन। यथा शाखावेलायामागंतव्यमिति यस्मिन्नपि ग्रामे शाखा न
ध्मायते तस्मिन्नपि शाखाध्मानकालोऽस्तीति नागमनं परिहास्यते॥ एवमिहाप्यसत्यपि वत्सापाकरणे तत्काले विद्यमाने व्रतत

स्मिन्कालेनपरिहास्यतइति॥ ॥१४॥ ॥प्रस्तरेणैवशाखाश्रयएवतारः दर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेति।तत्रश्रूयते
सहशाखयाप्रस्तरंप्रहरतीति।तत्रसंदेहः।किंशाखाप्रस्तरस्यगुणभूता अंगप्रयोजनसंबंधस्तयोः। अथकालार्थःसंबंधः॥प्र
स्तरप्रहरणकालेशाखाप्रहर्तव्येतिकिंप्राप्तं।प्रस्तरेणशाखाश्रयएवतः।प्रस्तरस्यांगभूताशाखा।कुतः सहशाखयाप्रस्तरं
प्रहरतीतिसहयुक्तेऽप्रधानेतृतीयाविभक्तिर्भवति।साचशाखायांतृतीया।तस्मात्प्रस्तरेशाखागुणभूता।प्रस्तरेचद्वितीया।तयोः
सहयोगोवृत्तीयासाचगुणतः।द्वितीयावप्रधानतः।ननुशाखयाप्रस्तरस्यनकश्चिदुपकारः क्रियते।सत्यं।दृष्टनक्रियते।अयए
वतृपथापयसामैत्रावरुणंश्रीणातीतिद्वितीयातृतीयासंयोगादवंदृष्टोपकारोगम्यते।एवमिहापीति॥कालविधिर्वोभयोर्वि
द्यमानत्वात्।कालविधिर्वास्यात्।कुतः।उभयोर्विद्यमानत्वात्प्रस्तरस्यावतस्कधारणार्थः।शाखोविद्यतेतस्यप्रहरणमपिविशिष्टका
३० श्रौ लांतरेणविहितंततः।शाखायाःप्रतिपादनार्थंतस्येतत्पुनर्वचनमुच्यते।भवतुप्रस्तरस्यपुनर्वचनंशाखालचविधीयतइति। राम ४३
उच्यते।उभयोरपिविद्यमानत्वाच्छाखायाःसर्वविहितत्वात्साप्रकरणार्था।इदानींपुनःकिंगुणभूताचोद्यते॥उतप्रतिपाद्यइति।प्रतिप तः
द्यमानायांदृष्टंप्रयोजनंदर्शयितायोगात्परिवर्तितुमेवकाशः।स्यात्यावयावतीमात्रा॥दर्शांतरसंयोगस्यनदृष्टंकिंचिदस्ति।तस्मा

ग्रहणे प्रतिपत्तिस्तस्याः तस्मात्परतः प्रयोजनाभावात्कालनियमः॥ क्रियते। ननु तृतीया च प्रधाने भवति सा च शाख
यां॥ ॥अत्रोच्यते॥ ॥यासौ शाखायां तृतीया सा द्वितीयार्थे यच्च प्रस्तरे द्वितीया सा तृतीयार्था कथमवगम्यते। सह योग
एव एकस्मिन्काले उभयमपि प्रहर्तव्यमिति। तत्र यस्य निर्ज्ञातः कालः तस्यानुवादः यस्य न निर्ज्ञातः तस्य विधिः शाखायाश्च
निर्ज्ञातः प्रस्तरस्य निर्ज्ञातः तस्य पुनरुच्चारणं च निर्ज्ञातार्थं तत्र प्रधानमितरस्योच्चारणं प्रधाने। प्राधान्यं च द्वितीयार्थः तत्र
तृतीया पारार्थ्यमपि तृतीयार्थः। तत्र द्वितीया तस्माद्यथार्थं विभक्तिवचनं॥ ॥ अतः संस्कारार्थत्वाच्च॥ ॥ न च शाख २
या प्रस्तरस्योपकारो दृष्टः क्रियते। काष्ठं दह्यमानस्य तृणस्य नोपकारे वर्तते तृणं तु काष्ठस्योपकुरुते। तस्मान्न शाखा प्रस्तरा
र्था॥ तस्माच्च विप्रयोगः स्यात्। किं भवति प्रयोजनं यदि प्रस्तरस्य गुणभूता अथापि प्रस्तरकाले शाखा प्रतिपाद्यत इति। उच्यते यदि प्र
प्र स्तरस्य प्रह्रियमाणस्याङ्गभूता शाखा ततो विना प्रस्तरेण न प्रहर्तव्या भवति अथ प्रधानं भूता ततो विनापि प्रस्तरेण प्रहर्तव्या अस्मा
भिस्तु केवलं प्रस्तरकाले प्रहर्तव्येति। तस्माच्च विप्रयोगः स्यात्। तस्मादेव कारणात् प्रस्तरविप्रयोगेऽपि शाखायाः प्रहरणं स्यादिति॥
उपवेषश्च पक्षे स्यात्॥ यथा पूर्वः पक्षः तथा सति सन्नापेक्ष्य असति च शाखा विधीयत इति। उपवेषोऽपि सति चासति च स्यात्। यथा तु

सिद्धांतः तथा सान्नाय्यप्रदेशा आग्रायस्य सती हि जनिता घततउतिततैव चोपवेषेणान्यत्रेति ॥ ॥५६॥ ॥ इत्याचार्यशबरस्वामिकृतौ
मीमांसाभाष्ये षष्ठस्याध्यायस्य चतुर्थः पादः ॥ ॥ ॥ अभ्युदये कालापराधादिज्याचोदनास्याद्यथापंचशरावे ॥ ॥ इदमा
मनंति विवा एनं प्रजया पशुभिरर्द्धयति वर्द्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चंद्रमा अभ्युदेति त्रेधा तंडुलान्विभजेद्ये म
ध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेद्ये स्थविष्ठास्तानिंद्राय प्रदात्रे दधंश्चरुं ये क्षोदिष्ठास्तान्विष्णवे शिपि
विष्टाय शृते चरुमिति। तत्र संदेहः किं कालापराधे यागांतरमिदं चोद्यते उत तेष्वेव प्रकृतेषु कर्मसु निमित्ते देवतापनय इति ॥
किं प्राप्तं। अभ्युदये यः कालापराधस्तत्रेज्याचोदना स्यात्। कथं पुरोडाशमग्नये दात्रे मध्यमान्कुर्यात्स्थविष्ठांस्तानिंद्राय प्र
दात्रे दधनि चरुं कुर्यात्क्षोदिष्ठान्विष्णवे शिपिविष्टाय शृते चरुमिति। यत्र नितांत्र्य फलमोत्र संयोगादिति यागविधानं ग
म्यते। यथा पंचशरावे द्रव्यदेवतासंबंधेन कर्मांतरं गम्यते। यथा च पशुकामेष्ट्यां पशुकामः स्यात्सोमावास्यामिष्ट्वा वत्सा
नपाकुर्वीत। ये स्थविष्ठास्तानग्नये सनिमित्तेष्टाकपालं निर्वपेद्ये मध्यमास्तान्विष्णवे शिपिविष्टाय शृते चरुं ये क्षोदिष्ठास्तानिं
द्राय प्रदात्रे दधंश्चरुमिति सेवमिहापीति। अपि वा न प्रकृते द्रव्यदेवताश्रूयते शृते चरुमिति हि तत्र अपनीतवचनं न वाभ्युदयकृ

राम
५५

ऽम्रपणं कृतमस्ति तस्मात्कर्मांतरं ॥ ॥ अपनयो वा विद्यमानत्वात् ॥ देवतापनयो वा ॥ कुतः विद्यमानत्वात् । विद्यंते हि त
स्मिन्नपि कृतानि तेषु विद्यमानेषु पुनर्देवतासंबंधो हविषां नोपद्यते । पयस्यान्तु पयस्यायाः कल्पितत्तस्माच्च यागांतरं तेत्र वह
धिषु देवतांतराणि विधीयंते ॥ एतत्कृपत्वाद्ब्राह्मणानां । देवतापनयसरूपा आमीक्षादा भवंति ॥ यमध्यमास्तेषां देवतांतरं
विधीयते । तत्र रूपं प्राप्तमप्राप्ता देवता विधीयते । कथं पुनर्देवताविधानार्थेनानेन गुणविधानदोषमिज्ञायेतेति । उच्यते ॥ नैव
ज्ञानको गुणो विधीयते । कस्मिंश्चित्काले ॥ तंडुलान्विभज्यैजदितः ज्ञातावद्भिमागमात्रे विधीयते अन्यच्च सर्वमनूद्यते तस्माद
दोषः यमध्यमास्तेषामग्निर्देवता विधीयते अनात् पुरोडाशाद्यनूद्यते यस्य विष्ठास्तेषां दधिसहितानामिंद्रो देवतास्मिन्वा कथे
विधीयते । तत्रार्थप्राप्तमपनयस्तिवनुतास हस समर्थनेवास्मि न्वाक्यः नूद्यते । यद्वोदिष्टास्तेषां भृतसहितानां विस्मृ ॥
क्षिप्रक्षिप्रादेवता विधीयते अन्यत्सर्वमनूद्यते । तस्माददोषः आतंत्रनाभ्यासस्यदर्शनात् ॥ ॥ आतंत्रनाभ्यासेदर्शना स्य
नैः कथमेवं श्रूयते यादि बिभीयाद्भिमोदष्यति भिमहारान्नेहवीषि निर्वपेत्फलीकृतेतंडुलेरुपासीत अर्द्धं दधि हविरातंत्र
नार्थमिदमात् अर्द्धं नय घम्पुद्धियादनेनातंच्च प्रवरेत यं घुनश्चात्मलं भोजयेदिति । यदिकर्मांतरमुपादेयत्वेन तदा तंडुल
था तंत्रनाम्ना संवदर्शयति ।२।

लेऽप्यपर्णेऽकृतमस्ति तस्मात्कर्मांतरं ॥ ॥ अपनयो वा विद्यमानत्वात् ॥ देवतापनयो वा ॥ कुतः विद्यमानत्वात् । विद्यंते हि त
स्मीन्नपि कृतानि तेषु विद्यमानेषु पुनर्देवतासंबंधो हविषो नोपपद्यते । पश्वात्तु पपत्त्यापायाः कल्प्यंते तस्मात्त्रयाणां तरं तेष्वेव ह
विःषु देवतांतराणि विधीयंते ॥ एतत्कृपत्वाङ्गराद्दानां । देवतापनयसरूपा [illegible] मीज्ञाद्वा भवंति ॥ ये मध्यमास्तेषां देवतांतरं
विधीयते । तत्र कृत्वं भागतमप्राप्ता देवता विधीयते । कथं पुनर्देवताविधानार्थेनो [illegible] विधानदोषं मेज्ञायेतेति । उच्यते ॥ नैव
ज्ञानको दुःगुणोऽपि वीयते । कस्मिंश्चिद्वाक्ये ॥ तं दुल्लान्विमर्जयेजेदितय त्तावद्क्षिमागोमात्रे विधीयते अन्यच्च सर्वमनूद्यते तस्माद
दोषः ये मध्यमास्तेषामग्निर्देवता विधीयते अन्नात्पुरोडाशाद्यनूद्यते येस्थविष्ठास्तेषां दधिसहितानां मिंद्रो देवता स्मिन्वा क्ये
विधीयते तत्रार्थमामेष्वपलेस्मति वरुतास हसममर्थ्यपात्रे नैवास्मि न्वाक्ये नूद्यते । यच्चो दिष्टास्तेषां घृतसहितानां विस्रुः ॥
शिपिविष्टो देवता विधीयते अन्यात्सर्वमनूद्यते । तस्माददोषः आतंचनाभ्यासस्य च दर्शनात् ॥ ॥ आतंचनाभ्यासं च दर्शयति स्य
मैः कृपमिवं श्रूयते यादि भीयादभिमो दध्यतीभिमहारात्रे हवींषि निर्वपेत्फलीकृतैस्तंडुलैरूपासीत अर्द्धं दधि हविरातंच
नार्थं निदध्यात् । अर्द्धं नयपम्पुदियादनेनातंच्य प्रवरेतयं पुनश्चारम्णं भोजयेदिति । यदि कर्मांतरमुपादेयत्वेन तदा तंडुला
आतंचनाभ्यासं च दर्शयति । २ ।

दधिप्रतंच। तस्माल्लौकिकान्युपादेयानि। नह्येषु तदामकृतानां व्यापारः तत्रापि विनष्टे द्रव्यान्यपरेद्युरामावास्ये क्रियमाणे विध
तेरथीतिनानंतवनमावर्तेत। तस्यामेवाभ्युदितेष्टौ दधिविधतेउ तिनातं तवनस्यात्॥ अथानिमित्ते देवतापनयः ततस्तस्मिन्स्व नि
२ रु: वृत्तेः रुतस्रतिपुनरमावास्यादोहश्च। तत्र नेनेन कार्यं। एवमानंतरनाम्नामस्य दर्शनं देवताविधानेयुज्यत इति॥ ॥अपूर्वत्वाद्वि
धानंस्यात्॥ अथ पशुकं यथा पशुकामेष्ट्यां कर्मांतरेयः पशुकामः स्यात्सोमावास्यामिष्ट्वा वत्सानपाकुर्यादिति तत्परिहरन्नेवं। अत्रे
ज्यते। युक्तं तत्र कर्मांतरविधानं। कुतः। अपूर्वत्वात्। न तत्र कश्चिन्नष्टस्य प्रतियागो विधते सोमावास्यामिष्ट्वेति हि परिसमाप्त
तस्मिन्निदमारभ्यते। तत्र द्रव्यदेवतासंयुक्तो निर्वपतिवाक्यैर्नांतरेणोत्सर्गेऽद्रव्यदेवतयोः संबंधो विधत इति यज्ञलिंगमयति।
नात्वहैवं। इह हियागः प्रकृतो गम्यते। तस्मिन्नेव विधमानस्य द्रव्यस्य देवतासंबंधमात्रं विधीयत इति न दोषो भवति॥ ॥पयोदोष
संवत्सरावेक्षुष्टरीतरन्न। अथ यत्पुपरदिति यथा संवत्सरावेकर्मांतरं विधीयते एवमिहापीति तत्परिहरन्नेवमिति। अत्रे
ज्यते। युक्तं यत्संवत्सरादेः कर्मांतरं दुष्टेति त्र द्रव्यं यस्य देवतादिविधीयेत॥ तत्रापूर्वस्य द्रव्यस्योपादेयत्वेन चोदयितव्यं तस्मिंस्तु राम
पादीयमाने देवतांतरे चापूर्वसंबंधो विधीयते। तद्यागांतरं भवतीति। इतरत्विह द्रव्यमदुष्टत्वेन चेत् प्रकृतयागे देवताविधि ४५

शा०टी

यत्तेस्मुक्तं तस्माददोष इति। सा त्वाग्नेये पिपिततत्वेति चेत्। एवं चेत् सप्तसि सन्नाय्येपि दोषः तदपि ह्यभ्युदये तत्कालापभ्रंशात्
दुष्टमिति॥ ॥न तस्या दुष्टत्वाद्विशिष्टहविःकारणं। नैतदेवं पञ्चशरावे हि दुष्टद्रव्यं। इह तु दध्यामेवावतिष्ठते। ननु कालापभ्रंशेन
दुष्टेन दुष्टत्वविशिष्टहविःकारणमभ्युदयेष्टायां विहितविधानं दुष्टेष्वुपपद्यते कालापराधे च अदुष्टे पि तत्कालेप्यभिप्रवृत्तस्य श्र
यते देवताविधानं न तु दिन दृष्टस्येति लक्षणार्थं श्रुतत्वाति। अथ यदुक्तं न प्रदातव्ये देवता श्रूयते। श्रूयते च तु मितिपृतत्वमभ्य
ति च च नूनं च अभ्युदयकाले अपर्णेन्द्र तमसीति। तत्परित्यक्तव्यं॥ अत्रोच्यते। लक्षणार्थं श्रुतत्वाति: धर्मलक्षणार्थाः श्रुतेर्न सह ५८
रितधर्मकृत्स्नत्वं॥ ॥१॥ उपांशुयाजेवचनात्तथाप्रकृति॥ ॥तस्मिन्नेवाभ्युदये सन्नाय्यः किमुपांशुयाजेपि देवतापनयो भवेन्ने
ति। किं प्राप्तं। उपांशुयाजे यथाप्रकृति स्यात् कस्माद्वचनात्। यथा मीषु वचने समाम्नानाम भयेदानेपुरोडाशः स्वविधानं। मिंद्राय
प्रदात्रे दधिनिर्वपन् चोदिष्टानां। विष्णवे शिपिविष्टाय शृते चरुरिति। नैतदुपांशुयाजे स्तितस्मात्स्मास्याय यथादेवतं स्यात्॥ ॥अप
[illegible] वापल्लायर्थेन रेष्वे। वाद्वाह एतस्माच्च तयति उपांशुयाजस्यापनयः येन कारणेन प्रवृत्तः। अकालेनं च प्रवृत्तौ देवतापन
[illegible] करणं कुतः न ह्यत्राभ्युदये सानि तंडुलादिविभागो पांशुयाजे यतः किन्त हविरभ्युदितस्य हविषो विभाग उच्यते। अभ्युदये न परा द्वौ

त्रा।

न्२

स्येति गम्यते। कथमवगम्यते यस्याभ्युदियादिति विशेषाश्रवणात् सर्वस्यैव ह्यपराधेनाभ्युदेति। अपराधश्चाकाले तंत्रप्रवृत्तिः ए
वं सति न त द्विवित्वं [illegible] दुलैः प्राक् विपोढुं। तस्मादुपांश्वयाजस्यापि विभागोऽस्त्येव घातं दुलौ विभजेदिति घनेन वाक्येन देवतापन
नयः क्रियते। विशिष्टं हि विभजेदिति विभागं कुर्यादित्यर्थः। कथमिति विभागे विशेषपराण्युत्तराणि वाक्यानि। इदमिदं च इत्यमस्यै दे
वतायै इदमिदं चास्या इति यस्य द्रव्यस्य विशेषविभागो नास्ति तस्यापि विभजेदिति सामान्यविभागः। तस्माद्यथैवेतरेषां विभागः एवमु
पांश्वयाजस्यापीति। अथ वोपांश्वयाज इत्यात्पूर्वेण वाक्येनापनीता देवतानन्तरतः परेण वाक्येन देवतान्तरे संयोजितं तस्मात्
हीणमेव तत्॥ ॥२॥ ॥ निरुप्ते स्यात् तत्संयोगात्॥ ॥ अस्मिन्नेवोदाहरणे संन्यायः। किं यदि निरुप्तेऽभ्युदयोऽवगम्यते। ततोऽभ्युदितेष्टि
अपराधश्चाकाले तंत्रप्रवृत्तिः। एवं सति न त द्विवित्वेष्टि इति [illegible] उतानिरुप्तेऽपि। किं प्राप्तं। निरुप्तेऽवगतेऽभ्युदितेष्टिः स्यात्।
कुतः तत्संयोगात्। निर्वापसंयोगो हि भवति यस्य हविर्निरुप्तमिति। तस्मान्निरुप्ते नैतद्विधानमिति॥ ॥ प्रवृत्तत्वात् प्रयाजवन्निमि राम
त्तस्य। बाहाद्य पक्षं प्राचक्षते यति। अकाले तंत्रप्रवृत्तिमात्रस्यादेतद्विधानं। प्राक्संहितादर्शेवनिमित्तं। यस्य हविरभ्युदेतीति विहि ४६
र्यं हएंल लक्षणत्वेन। यस्य हविरभ्युदेतीति हविर्लक्षित उदयो निमित्तं। प्रवृत्ते हि विस्तृते क्षयति नोदासीनं। तस्माद्धविरभ्युदेतीत्युच्य

माने प्रचरन्तं हविरभ्युदेतीति गम्यते न हि तन्निरुप्तमित्येतेन वाक्यं विरोधापत्तेरभिधेर्तं हितं दावाक्यं। यस्य हविर्निरुप्तं मान
रुप्तमित्येवमपेक्षमाणे हविरभ्युदेतीति नत्राकांते विधात्तु तस्मादनिरुप्तेपी हविरिति॥ ॥ लक्षणमात्रमितरत्॥ अथ यदुक्तं
निरुप्तसंयोगो भवति यस्य हविर्निरुप्तमिति। लक्षणमात्रमेतन्निरुप्तमिति कस्मिंश्चित्सर्व-दार्यतस्य प्रभृतस्तदर्थ॥ ॥ तथाच
मार्यदर्शनं॥ ॥ अन्यार्थोपि वणतमर्थं दर्शयति। स यद्यगृहीतं हविरभ्युदियादप्यज्ञातमेव तं दे[illegible]वैव्रतं चर्यायस्य हर्वेषु दुग्धं ह व ४
विरातं चनं तत्कुर्वंति प्रतिप्रभुंवंति वत्सान्नुतान्येवतत्पुनरयाकुर्वंति तानपराह्णे पर्णशाखया पाकरोति तदथैवादः पुरस्तानम
मावास्यं हविरेवमेव व्रतं घृतव्रतं चर्यं चानोदासे शतगृहीतं वा हविरभ्युदियादितरथा तर्हि कुर्यादितानेव तंदुलान्सर्वान्कालीच्च
तानि निगृह्णीति हविष्यन्यांश्चैवमेव तनूरुहीतेप्यनिरुप्ते वाभ्युदये प्रायश्चित्तं दर्शयति॥ ॥३॥ अनिरुप्तेभ्युदिते प्राकृतीभ्यो नि
र्वपेदित्याश्मरथ्यस्तंदुलभूतेष्वपनयात्॥ ॥ प्रवृत्तिमात्रे निमित्तमिति च्छितं नैमित्तिकस्तु देवतापनये देवतांतरसंयोगश्च
ऽ निर्वापोत्तरकालं तंदुलावस्थे हविषि कर्तव्यो निर्वाप स्त्रौ[illegible]तीभ्य एव स्यात्। ज्ञाते भ्युदये तु तवैकृतीभ्य एवेति संशयः किं
प्राह्यौमाश्म। अनिरुप्ते भ्युदिते प्राकृतीभ्यो निर्वपेदित्याश्मरथ्य आचार्यो मन्यते स्मकृतः तंदुलभूतेष्वपनयात्। तंदुलभूते

...या तंदुलानां विभजेदित्यत्र भ्युदयावगमात् नैनरंतं तंदुलविभागमात्रं दृश्यो: तंदुलभूतेषु नावकल्पते। तस्मा
दनिरूते तंदुलानां भावादनपनीता देवता: प्राकृत्यैर्दिति तीः

धपनयात्।। तंदुलस्य अपनयः श्रूयते। यस्य हविर्निरुप्तं पुरस्ताच्चंद्रमा अभ्युदेति [illegible] प्राकृतीभ्य एव निर्वपेदिति।। ।। कूर्चमाग्र
तंदुलालेखनस्तत्कारितत्वाद्देवतापनयस्य।। ।। तुशब्दः पक्षं व्यावर्त्तयति।। कूर्च्चं याभजेत कर्म्मता भ्यो निर्वपेदित्यालेखन आचार्य
मन्यते स्म। कुतः तत्कारितत्वाद्देवतापनयस्य यस्मादकाले तत्र प्रवृत्तिकारित्वेनो देवतापनयः तस्मादपनीता देवता इति कूर्चभा
भ्यो निर्वप्तव्या:।।४।। विनिरुप्तेन मुष्टीनापनयस्तद्गुणत्वात्।। ।। अथ यदारब्धे चतुर्मुष्टिन्निर्वापे अपरिसमाप्ते च वर्त्तिसंशयः यद्भिरु
प्तं तन्निरुप्तमेव शिष्टं किं प्राकृतीभ्यो निर्वप्तव्यं किं वैकृतीभ्य उदैतन्नूत्नमेवेति। किं प्राप्तं।। विनिरुप्ते सामित्विरुप्ते इत्यर्थः नतत्र देवता
पनयः स्यात्। तद्गुणत्वान्निर्वापस्य गुणे देवतानमुष्टीनां सर्व निर्वापः तद्देवताकः कुतः कुतः संख्यापूरणार्थत्वादभ्यासमात्रं च
तेष्वं। तत्राभ्यासमात्रं पुनः क्रियते पूर्वमेव कृते तस्मिन्निर्वापेन देवतापनीता सएवायं पुनः क्रियते पुनरपि क्रियमाणस्यान
पनीतैव देवता भवितुमर्हतीति प्राकृतीभ्य एव निर्वप्तव्यं। नवोत्तरो मुष्टिः पृथक्प्रदार्थो येन देवतापनयो भवेत्। कृतस्य निर्वापस्य
संख्यापूरणमेतत् क्रियते तस्माद नयनय इति।। ।। अप्राकृतेन हि संयोगः तत्स्थानीयत्वात्। नप्राकृतीभ्यो निर्वप्तव्यं का भ्यस्त राम
हि वैकृतीभ्यः कुतः अप्राकृतेन देवताविशेषणसंयोगः श्रूयते नाधिकृते न चैषा तंदुलान् विभजेदिति प्राकृतीभ्य आश्विषये कृती ४७

स्योनिर्वपणो विधीयते ता इदानीं तत्स्थानीयाः तस्मात्तस्माद्धि निरूप्ते निर्दैवता देवता अन्या अप्युपजातास्तस्माद्दैवतीनां संयो
गेन निर्वापश्चाषः कर्तव्य इति॥ ॥ अभावाच्चेतरस्य स्यात्॥ अभावादितरस्यार्थस्य देवतासंयुक्तस्य न निर्वापो भवति। देवतासं
युक्तो यद्धि निर्वापो ऽर्थान्तरस्य देवत्यार्थ्यपि न स्यैव देवता यैवैनेव निर्वाप इतरदेवताको ऽपारित तदितरदेवताको वा। तस्मात्स्त्रीभवति
र्वे भवत्यं अवयवरूपमन्यतरत्त्वसंकल्पस्य भेदो भवति॥ ॥५॥ ॥७॥ ॥ ॥ सान्नायसंयोगान्नासंनयतः स्यात्। अभ्युदितेष्टि
र्वोदाहरणं। तत्र श्रूयते। दधनि चरुं स्यात्तेव तदपि ति। तत्र संदेहो भवति। किं सन्नयतो भवति अभ्युदयेष्टिप्रायश्चित्तं उताविशेषेणेति
किंमार्थं। सन्नयतो ऽभ्युदयेष्टिप्रायश्चित्तं। कुतः। सान्नायसंयोगात्। सान्नाय्यसंयोगो हि भवति। शृतं ते वरं दधनि चरुमिति। शृतताद्यमा
वन्नासंनयतो भवितुमर्हति। वैगुण्ये हि तथा स्यात्। विघसंयोगाद्वैभयोः स्यात्॥ ॥ वाऽत्राहुः पक्षं व्यावर्तयति। उभयोरपि स
तन केवलस्यसन्नयतः। कुतः। पुषधसंयोगात्। यमध्यमायेत्थ विधापन्दे दिघाऽतिम वलैषधसंयोगः सर्वशक्यासन्नयतोपीति।
तस्मान्नासन्निकारणे ऽसन्नयतो निवर्तेत। अपितु उभयोरपि पक्षयोः प्रायश्चित्तमिति॥ ॥ वैगुण्यान्नेति चेत्। इति चेत्पश्यउच्यते असन्न
यतो दध्नः घृतस्य वा भावात् द्रव्यविकरणतानास्ति तस्माद्वैगुण्यं तस्मिन्नप्यस्तु इति तत्परिहर्तव्यमिति। नातत्संस्कारत्वात्। नेतदेवं

हेऽधिकरणेऽवरोधः प्रपणेऽपूर्यते किंतु पयास्थ विधाइ जायमानं एवं दध्यपि देवतासंबंधार्थं विधीयते न तु संबंधा
भिधानहितथा वाक्यांस्थ विष्ठाऽस्वतायै दध्यभिवते कर्त्तव्यमिति। सप्तमी संयोगमप्रत्यासन्नेऽर्थेऽनुवादः तस्मादविवक्षितं तेषां साहित्यं।
हणेन हि तेऽपूर्यंते इति। नहि पयो दधि वा नामिक्षा विष्ठानां न देवतापनयो भवती समस्त यतोऽप्यर्थाद्वस्तु अपयिष्यत इति।
॥ ६॥ ॥ साम्युत्थाने विश्वजित् क्रीते विभागसंयोगात्। इदमामनंति। यदि सत्राय दीक्षिताः साम्युत्तिष्ठेरन् सोममपभज्य
विश्वजितातिरात्रेण सर्ववेदसेन सर्वपृष्ठेन सर्ववेदसदक्षिणेन यजेरन्निति। तत्र संदेहः। किं क्रीते राजन्सोत्थाने विश्वजि
दुत प्रवृत्तमात्रस्येति। किं प्राप्तं। साम्युत्थाने विश्वजित् क्रीते सोमे स्यात्। कुतः विभागसंयोगात्। सोममपभज्य विश्वजिता यजेरन्नि
ति। अपक्रीते राजनि उत्तिष्ठंति तेषां सोमविभागाभावादनुपपत्तिः स्यात्। तस्मात् क्रीते राजनि उत्तिष्ठतो विश्वजितं कुर्युः॥ प्रवृत्ते वा
प्रापणान्निमित्तस्य। वाशब्दः पक्षं व्यावर्त्तयति। प्रवृत्तमात्रस्योत्थाने स्यात्। कुतः प्रापणान्निमित्तस्य। साम्युत्थानं निमित्तं
विश्वजितः तत्प्राप्तं। विशेषविहितं न वततस्य शाक्यं क्रीते य दि साम्युत्थानमिति। आदेशार्थेतरा श्रुतिः॥ ॥ अथ यदुक्तं क्री राम
ते राजन्युत्तिष्ठतो विभागाभावादनुपपत्तिः कर्त्तव्यमिति॥ तत्परिहर्त्तव्यं। अत्रोच्यते। न विभागो विधीयते सिद्धेन हितथा वा ४८

कंसास्पुच्छानेविश्वजितायजेरन्सोमस्यलपभागंकृत्वेति। तेनापभज्जेत्यनुवादः। कथंप्राप्तिरितिचेत्। अर्पादुनिष्ठितंवि
भागोभवतियुनस्यसोयंसर्वद्रव्याणांविभागः। सोमविभागेनलक्ष्यतेसोमंविभज्यान्यानिद्रव्याणीत्यादेशाच्छेदतराक्रतिर्भव
ति।तस्माच्छीर्षाच्छीतेवराजन्युनिष्ठतांविश्वजिदिति। ॥ दीक्षापरिमाणेयथाकाम्यविशेषात्॥ ॥ज्योतिष्टोमंप्रकृत्यश्रूयते
एकादीक्षातिस्रउपसदःपंचमीप्रसुत्याइति। तिस्रोदीक्षाद्वादशदीक्षाइतिचबहूनिदीक्षापरिमाणान्याम्नातानि। तेषुसंदेहः। कि
मनियमोपघातद्यापरिमाणमुपादेयं। उतद्वादशदीक्षाइति। किंप्राप्तं। दीक्षापरिमाणेयथाकामीस्यात्नास्तिनियमः। कुतः।
अविशेषात्। नहिकश्चनविशेषउपादीयते। तस्माद्यत्किंचिदेतत्परिमाणमुपादेयमिति॥ ॥ द्वादशाहस्तुलिंगात्स्यात्॥ ॥
द्वादशाहएवपरिमाणमुपादीयते। कुतः। लिंगात्सामर्थ्यादित्यर्थः। किंतत्सामर्थ्यं द्वादशरात्रीर्दीक्षितोभृतिंविचिन्वीतेतिनित्य
वदाम्नायतेनपाक्षिकं। तदेतन्नित्यंत्रवीत्याह्नौत्पन्नत्परिमाणमुपादातुं। तस्माद्वादशाहएवपरिमाणमेनियम्यते। अन्यानि
परिमाणानिविकृतौभविष्यंतीतिनैषामानर्थक्यमिति॥ ८॥ पौर्णमास्यामनियमोविशेषात्॥ ॥ गवामयनेश्रूयते। पुरस्तात्पौ
र्णमास्याश्चतुरहेदीक्षेरन्निति। तत्रसंदेहः। कस्याःपौर्णमास्याइति। किंप्राप्तं। पौर्णमास्यामस्त्यनियमइति। कुतः। अवि

शा०भ० अ०६ ५०

शेषात्तेनात्र कश्चिद्विशेषवचनः शब्द उपादीयते ॥ आनंतर्यात्तु चैत्री स्यात् ॥ उदाहृतः पक्षो व्यावर्त्यते । नैतदनियम
इति । चैत्री पौर्णमासी तु भवेत् । कुतः । आनंतर्यात् पौर्णमासी स्या आनंतर्यं वाक्यशेषे चैत्री संकीर्त्यते । पुरस्तात्पौर्णमास्याश्चतुरहे
दीक्षेरन्नित्युक्त्वा एषा वै पौर्णमासी संवत्सरस्य या वै चैत्री पौर्णमासीति । अतः संदिग्धेषु वाक्यशेषाद्दितीते चैत्री नियम्यते । माघी वे
काष्टकाश्रुते ॥ नात्राहः पक्षो व्यावर्त्यते । नैतदस्ति चैत्रीति ॥ किं तर्हि माघी स्यात् । कुतः । एकाष्टकाम्नाते । त्र्यहे ह्येकाष्टका भवंति
भवंति । तेषामेकाष्टकायां त्र्यहः संपद्यत इति । तस्मान्माघ्याः पुरस्ताच्चतुरहे दीक्षितस्यैकाष्टकायां त्र्यहः प्राकृतक्रतुर्न चैत्र्याः । तदे
तत्सामर्थ्यं नाम लिंगं । तद्वाक्यस्य बाधकं भवति । तस्मान्माघी पौर्णमासीति ॥ ॥ अन्यास्वपीति चेत् ॥ इति चेत्पश्यसि माघी पौर्णमासी
ति एवमेकाष्टकायां त्र्यहः संपत्स्यत इति । तन्न सर्वा अपि ह्यष्टम्योष्टका द्वादश चैकाष्टका इति । तेन न दोषः ॥ न भक्तित्वादेषा हि लोके ॥
न्यत्फलंप्रकल्प्यंतत्प्रमाणाभावात्वचनस्यान्यदपिप्रयोजनमस्ति। नचानेनवाक्येनचाकृतेनाहिताग्नेःक्रतुःकल्पयि
तुंतस्मादक्रतुशेषाणामयंधर्मइति॥ ॥ उपायोवानग्निसंयोगात्॥ ॥ वाशब्दात्पक्षोविपरिवर्त्तते। नासंस्कृतेऽग्निषुए
वंजातीयकाहोमाःस्युः। कुतः आधानस्यसर्वशेषत्वात्। ननुवचनंइदमेवानाहिताग्नेरिष्टिरिति। नेतिब्रूमः। अ
र्थवादएषभविष्यति। यत्तुपरूपाः तेषामर्थवादेनसर्वेषांचतुर्होतृणामेवंमदाहवनीयेजुहोतीत्येवमादीनांवच
नानामर्थवत्ताभविष्यति॥ ॥ इष्टित्वेनतुसंस्तुतेहोमःस्यादनारभ्याग्निसंयोगादितरेषामवाच्यत्वात्॥ ॥ यदुक्तमे

षावा अनाहिताग्नेः क्रियाइष्टिस्तु लप्स्यते तिज्ञपानामेषवादइतीतात्रानैषा ववनव्यक्तिर्यैषा अनाहिताग्नेः क्रियास
इष्टिस्तु लप्स्यति।। किंकारणं। साद्द्रूपमात्राद नुवादोऽनर्थकः स्यात इतरस्मिन्पक्षे विधिरर्थवान्नयमिष्टिरपानाहि
ताग्नेरितितद्दिक्षिसंस्तवाद्यमानामेववादः॥ कथं। इष्टिर्यागा स एवासेवनाधिको होमः यदुक्तं। सर्वहोमार्थआहव
नीयइति। तत्रवतुर्होतृनेवाधिरूत्सोऽयते किंतु अविशेषेण होमानू सवतुर्होतृष्वसंभवादन्येष्वपि भविष्यति। वतुर्हो
तृषुवानाहिताग्नेरूय्यमानेष्वाहवनीयोऽनंगामिति। नदर्थैनैव सव कर्त्तव्यो भवतीति। उभयोः पितृयज्ञवत्। नैतदस्त
नाहिताग्नेरेववतुर्होतार इति। उभयोः स्युः पितृयज्ञवत्। पितृयज्ञश्चाहिताग्नेरनाहिताग्नेश्च एवं वतुर्होतारोऽपि। क
थमवगम्यते वर्णितमेतद्यदानुवादपक्षः तदाहिताग्नेः यदाविधिपक्षः तदानाहिताग्नेः उभयथा ववनव्यक्तिः प्रती
यते नवप्रतीयमानोऽर्थः शक्यते पक्षो तुं तस्मादुभयोश्चतुर्होतार इति।। ।।निर्द्देशाद्वानाहिताग्नेरनारभ्याग्निसंयोगा राम
त्।। ।।नचैतदस्ति उभयोश्चतुर्होतारो भवेयुरिति।। कथमेषसनाहिताग्निनिर्द्देशः एषा वा इष्टिरनाहिताग्नेरितिव ७०
वनेनाहिताग्निनिर्द्देशसामर्थ्यात् अर्थवादेऽपद्दीणं तत्रैव न विरूध्यते इति। यदाहवनीये जुहोतीति ववनेन नवन्तु

र्हिनैवाधिकृतोयत इत्युक्तं तस्मादनाहिताग्नेरेवंजातीयकाद्धोमः ॥ ॥ पितृयज्ञे संयुक्तस्य पुनर्वचनं ॥
अथयदुक्तं। पितृयज्ञवदितियुक्तंपीत्यज्ञेतत्राहिताग्निसंयुक्तस्य पुनरेतद्वचनं भवति। अथ नाहिताग्निनाकार्य
मित्येतद्वचनाहिताग्नेरपीत्यनाहितान्यावच्याहार्यकं करोति। इहतथा नास्तिवचनं। नियोगात एको निर्दिष्टः एषावात्र
नाहिताग्नेरितिनात्रापित्र्यादेष्टि। तस्मात्पितृयज्ञेनात्रुल्यमेतत् ॥ ॥१॥ उपनयनादध्यीतहोमसंयोगात् ॥
इदमामनेति। उपनयंत्विति रभिर्जुहुयादिति। तत्र संदेहः किमस्यैवं होमआध्यानसंस्कृतेग्नाविति। किंप्राप्तं। उपनय
नादध्यीतेति। कुतः होमसंयोगात्। आहवनीयस्य। यदाहवनीये जुहोति तेनसोस्यामीष्टः प्रीतोभवति। तस्मादाधा
नोत्तरकालाएतेहोमाइतिस्थितिः ॥ ॥ स्थपतिवल्लौकिके वा विद्याकर्म्मानुपूर्वत्वात् ॥ नचैवतदस्याधायैवंजातीयकं
होतव्यमिति। किंतर्हि लौकिकएववर्तेतेति। कुतः विद्याकर्म्मानुपूर्वत्वात्। विद्याग्रहणार्थाइमेहोमाः विद्यातश्चाधा
नेनाधिकारः ॥ सामर्थ्यात् अतआधानोत्तरकालता नैषामवकल्पते। यथास्थपतीष्ट्याः ॥ ॥ आधानंचभार्यासंयुक्तं ॥
आधानंचभार्यासंयुक्तंश्रूयते विद्याग्रहणोत्तरकालंचदारसंग्रहः तस्मादपिनावकल्पतेपूर्वकालताधानस्य ॥ अकर्म

वोर्द्ध्वमाधानार्थैर्न्नत्समवायो हि कर्म्मभिः॥॥ अत्राह। यदि पूर्व्वमाधानाद्दारक्रिया सा कर्म्मार्थी न भविष्यति। वचना
त्तोर्द्ध्वमाधानादपत्यार्थायोरपि कालयोः पिंडपितृयज्ञवत् तन्नैष दोषो भविष्यतीति। अत्रोच्यते। अकर्म्मत्वे दारक्रिया
या आधानोत्तरकाले। कुतः आहवनीयादिसमवायो हि कर्म्मभिर्भवति। स्वार्थं वा भवत्याधानात्या इति नियमः। तस्मा
दुभयस्मिन्काले दारसंग्रह इत्येतन्नास्ति॥॥ आहुत्यदिति चेत्॥ ॥तत्राह। यथा पिंडपितृयज्ञ आतान्येरना। हितानेश्रम
वत्येवं दारसंग्रहो पीतिय दुक्तं तत्परिहर्त्तव्यं॥ ॥नश्रुतिविप्रतिषेधात्॥ ॥ नैवं श्रुतिविप्रतिषेधो हि भवति। एवं क्रियमा
णे दारकर्म्मणि विधाय ग्रहणान्तरकालं श्रूयमाणं पूर्व्वं क्रियत इति विप्रतिषिद्धं। अर्थादन्यदेवेदमिति चेत्। न। अर्थप्र
त्यस्यैवार्थकालनियमः। उपनयनं च कर्म्मार्थं तद्वितीयस्याविप्रतिषिध्यते॥ ॥ सर्व्वार्थत्वाच्च पुत्रार्थेन प्रयोजयेत्॥ ॥
अथोच्यते। प्रागाधानात्कर्म्मार्थैव ऊर्द्ध्वं चापत्यार्थैव सा भविष्यति तेनैवं सत्यस्य न किं विधिरोत्स्यत इति। उच्यते। नै राम
तदेवं सर्व्वार्था हि सा न केवलमपत्यार्थता भविष्यति। तदुक्तं। फलोत्साहाविशेषादिति। तस्मादपि नैव द्विर्दारसंग्रहः। अपि चै ७१
वं सम्पद्यते। धर्म्मेणार्थेन कामेनेव नातिवर्त्तितव्येति। एवं सत्यतिवर्त्तिता स्यात्॥ अतोपि न द्विर्दारसंग्रहः। एकैव भार्य्यापत्यार्थ

यःतस्मादपरक्तायामपरह्णेरन्वारम्भं हितेषां दृष्टंकार्यमाम्नातमतिक्रांतेकार्ये नस्यादिति॥ ॥अपिवालौकिकेग्नौ
स्यादाधानस्यासर्वशेषत्वात्॥ ॥अपिवेतिपक्षव्यावृत्तिः॥ लौकिकेष्वग्निषुस्यान्नसंस्कृतेषु। कुतः। आधानस्यासर्वशेष
त्वात्।सर्वकर्मशेषश्रुताश्रवयः तदागमाधानेनकर्मांगत्वादीनामभावात्।नकर्मप्रयुक्तं।आधानस्यवाक्यसामर्थ्या
दग्निप्रयुक्तत्वं।यच्चदर्शपूर्णमासप्रयुक्तं तच्चोदकेनप्राप्यते।नद्रव्यप्रयुक्तंतस्माल्लौकिकेष्वग्निषुस्थपतीष्टिरिति॥७॥
अवकीर्णिपशुश्चतद्वदाधानस्याप्राप्तकालत्वात्॥ ॥अस्त्यवकीर्णिपशुः॥ ॥ब्रह्मचार्यवकीर्णीनैर्ऋतंगर्दभमाल
भेतेति।तत्रसंदेहः।किंतदर्थमाधानंकर्तव्यम्।उतलौकिकेष्वग्निषुतद्भवतीति।तत्रावकीर्णिपशुश्च तद्वदित्यधिकरणातिदेशः
पूर्वस्याधिकरणस्यायं पूर्वःपक्षः सोत्रपूर्वपक्षः यःसिद्धांतःससिद्धांतः।सर्वार्थमाधानंतस्मादाहिताग्निस्थितिपूर्वःपक्षः
आधानस्याप्राप्तकालत्वादितिसिद्धांतः।अप्राप्तोयमाधानस्यकालइत्येतदुक्तंतस्मादिदमपिकर्मलौकिकेष्वपि॥८॥
उदगयनपूर्वपक्षाहःपुण्याहेषुदैवानिस्मृतिरूपान्यार्थदर्शनात्॥ ॥दैवानिकर्माण्युदाहरणमुपनयनप्रभृतीनि। राम
तत्रसंदेहः।किमनियतेकालेदैवानिकर्माणि उतोदगयनपूर्वपक्षाहःपुण्याहेष्विति।अनियतइतिप्राप्ते उदगयन। ७२

दिष्वित्युच्यते।कुतः।एवंहितेषुकालेषुदैवानीतिरूपार्थवादश्च एतद्वैदेवानांरूपंयदुदगयनंपूर्वपक्षोऽहरिति।
नत्ववयंदेवानांविद्मः।अथचेत्एतेषुकालेषुदैवानिक्रियंते ततएतेनसंबंधेनरूपवचनमवकल्पते।अन्यार्थदर्श
नमप्येतद्दर्शयति।पूर्वाह्णोवैदेवानांमध्यंदिनोमनुष्याणामपराह्णःपितृणामिति।तस्मादेतेषुकालेषुदैवानिस्युरिति॥
अहनिचकर्मसाकल्यं॥ ॥अहनिचविशेषः।सकलंकर्माहन्येवद्रावयेतकर्तुमितिनरात्रौकुर्यादिति।इतरेषुतुपि
त्र्याणि॥ ॥श्राद्धादीन्यपरपक्षेऽपराह्णेस्मृतिरूपान्यार्थदर्शनात्॥ ॥याच्ञाक्रयणमविद्यमानेलोकवत्॥ इदं
समाम्नायतेज्योतिष्टोमेदीक्षितदक्षिणारात्रीर्दीक्षितोभूतिंवन्वीतेतितथासोमंक्रीणातीति।तत्रसंदेहः।किंयस्यनविद्यते
भूतिःतेनवनितव्यायस्यवर्त्ततेनविद्यतेतेनसोमःक्रेतव्यः॥ उतोभयथापिसतिवासतिवा।किंप्राप्तंयाच्ञावाक्रयणं
अविद्यमानेभूतिर्येनसोमंवस्यात्।कस्मात्।द्रव्यसत्त्वार्थयाच्ञावाक्रयणं।तत्रविद्यमानेनर्थकम्।नर्थकंवोक्तमपि
नकर्तव्यंतस्मादविद्यमानेभवेत्।लोकवत्।यथायस्यलोकेनास्तिद्रव्यंसयाचतेक्रीणातिवाएवमिहापिद्रष्टव्यं॥
नियतंवार्थवत्त्वात्॥ ॥नियतंवायाच्ञाक्रयणंतद्विद्यमानेविद्यमानेद्रव्येस्यादेवयाच्ञाक्रयणमर्थवद्भवति।उभे

ष्टोमप्रयुक्तं हि तच्छ्रूयते। न द्रव्यप्रयुक्तं तत्र निर्मितं ज्योतिष्टोमस्य नैवं वचनं भवति यदा द्रव्यं नास्ति तदा कर्त्तव्यमि
ति। ज्योतिष्टोमस्यानित्यमेव प्रयुक्तं। द्रव्यामात्रेण निमित्तप्रयुक्तमिति परिकल्प्यते कल्पनायां च हेत्वाभावात् अतो याचितेन वा क्रयण
संस्कृते द्रव्यमिह प्रयोक्तव्यं अन्यथा वैगुण्यं भवति। तस्मात्सतिवा सति वद्रव्ये याचित्वा क्रयेण वा अनुष्ठातव्यमिति। अथ यदु
क्तं लोकवदिति। लोके कर्म्मार्थलक्षणं भवति न च फललक्षणं यथार्थं लभ्यते क्रियते न यथाशास्त्रं। वेदे तु शास्त्रलक्षणेनैवार्थो
वगम्यते तथैवानुष्ठेयमिति। तस्माद्विद्यमानेपि कर्त्तव्यं॥ ॥६॥ तथा भक्षप्रैषाच्छादनसंनहनहोमदर्शनं। ॥ज्योतिष्टो
मे श्रूयते पयो व्रतं ब्राह्मणस्य यवागू राजन्यस्यामिक्षा वैश्यस्येति। तथा दर्शपूर्णमासयोः प्रैषः प्रोक्षणीरासादये
ध्मं बर्हिरुपसादय स्रुवं च संमृड्ढि पत्नीं संनह्याज्येनोदेहीति। तथा। वाजपेये श्रूयते। दर्भमयं वासो भवतीति य च्छौसं
नहनहोमः। यत्पशुर्मायुमकृतोरो वा पद्भिराहते॥ अग्निर्मा तस्मादेनसो विश्वान्मुंचत्वंहस इति तथा येत्मां न्वृष्ट्ियं वचनं
दिष्ट इति वचनेनानुनुदाहरणानि। तेषु संदेहः॥ किं यस्य पयो ज्ञेनानविद्यते स पयो व्रतयेत् यव यस्य मिक्षा
उत विद्यमानेपीति। तथा यि प्रेषितः प्रैषार्थं निपाति पद्यते स प्रेषितव्यः॥ उत नातिपद्यमानेपीति। तथा यस्य स्वत्रमय

राम
७३

वांतस्मात्स्वविद्यायत्करणे न तत्कालता। अतो न्वाधानसंस्कृतेष्वेते होमा इति॥ ॥सोमपानात्तु प्रापणं द्वितीयस्य त
स्मादुपपद्येत॥ ॥ गृह्यत एतत् प्राग्निपनयनात्त्रास्ति पत्नीति। यदुक्तमेकैव पत्नीति तत्त्वमुच्यते। यथैव स्मृतिः धर्म्मे
र्थे च कामे च नातिचरितव्येति धर्म्मप्रजासंपन्ने पुदारे पुनान्यां कुर्वीतेति। एवमिदमपि अन्यत एव त्वन्यत राघाये
नान्यां कुर्वीतेति। तस्माद्यस्य न धर्म्मसंपन्ना प्रजा संपन्ना वा पत्नी सोन्यां कुर्वीतेति। सोमपानादिति वार्थवादे यापदिश्यति
सम्सोमपानद्विती या जायामुपस्पृष्टयत इति द्वितीयामपि जायां दर्शयति॥ ॥ पित्र्यस्त्वेतु दर्शनान्न्याग्न्याधानात्प्रतीयते॥ अथ
कथं पित्र्यस्तस्य द्वे कालाविति॥ ॥उच्यते॥ वचनं हि तत्र दृश्यते। अथ नानाहिताग्निनाकार्यमिति॥ तस्मात्याग्न्याधानात्तत्
प्रतीयते॥ ॥२॥ स्थपतीष्टिः प्रयाजवदग्न्याधेयं प्रयोजयेत्तादर्थ्याच्चापवृज्येत॥ ॥ अस्ति स्थपतीष्टिः एतया निषाद
स्थपतिं याजयेदिति॥ तत्र संदेहः किमाधानसंस्कृतेषु अग्निषु स्यात्॥ उत लौकिकेष्विति। किं प्राप्तं संस्कृतेष्विति कुतः
आहवनीये जुहोतीत्यनुमादिव वचनात्। ननु शूद्रस्याहवनीयाभावान्नास्ति तस्याग्निरस्ति। उच्यते। सा ह्याहवनीयं
प्रयोजयेद्यथा प्रयाजानस्थनान्प्रयोजयेत् नैवं वीद् क सामर्थ्यादिति। तादर्थ्याच्चापवृज्येत स्थपतीष्ट्यर्थं वाहिता अग्न

केषामाम्नायते। अग्नीषोमीय इति। सर्वशाखाप्रत्ययं चैकं कर्म्मेति। अत्रोच्यते। प्रतिशाखं भिन्नानि कर्म्माणि
ति स्थिता चिंता। किं तावत्प्राप्तं। पशुचोदनायामनियमः। उत्सर्गः कर्तव्यो द्रव्यं शक्यते उत्स्रष्टुं न पशुत्वं द्रव्येण हि साध्यं कर्मतोत्र द्रव्य
मंतरेण उत्सर्गो न संभवतीति द्रव्यमुपादीयते तस्मिन्नुपादीयमाने अनियमः। यत्किंचिदुत्स्रष्टव्यमिति कुत एतत् अविशेष
त्वेन हि पशुत्वसंबंधे पुनः कश्चिद्विशेष उपलभ्यते तस्माद्यः कश्चित्पशुरिति॥ ॥छागो वा मन्त्रवर्णात्॥ ॥वाशब्दः पक्षं व्याव
र्तयति। नैतदस्ति यत्किंचन द्रव्ये पशुत्वमुपादेयमिति। अस्त्युत्स्रष्टव्यस्य नियमकारणं मंत्रवर्णः। अग्नये छागस्य वपाया
मेदसोनुब्रूहीति छागप्रकाशनसमर्थो मंत्रवर्णः समाम्नायते। यदि छागो नोपादेयः ततस्तत्प्रकाशनसमर्थस्यो
पादानमनर्थकं। तेनावगम्यते छागमधिकृत्य उत्सर्गः स्यादिति। मंत्रवर्णिको द्रव्यनियमविधिरिति। ॥ न चोदनावि
रोधात्॥ ॥नैतदेवं न शक्नोति मंत्रवर्णश्चोदनायां प्राप्तार्थं मांसं संदिग्धं नियंतुं॥ यत्र हि द्रव्यस्य प्रकाशकं न श्रूयते
तत्राप्रकाशितमेव कर्तव्यमिति। तस्मान्न मंत्रवर्णः प्रकाशनियमो मविधिः कल्प्यते एवमत्र प्रकाशनं प्रकाशयितव्य राम
मिति॥ अत्र पुनः शब्देनावगमितं पशुत्वेन प्रकाशयितव्यमिति तस्मान्न मंत्रवर्णस्तत्प्रकाशने समर्थः मंत्रवर्णो हि ७४

स्याप्रयोगवचनश्रुतिः। उत्कृत्य प्रयोगवचनेनोपसंहर्तव्या। अन्य एव पशुशब्दसार्थकः पशुत्वं अन्यो मंत्रवर्णेन
नियम्यते छागः। तस्मान्न मंत्रवर्णश्चोदनाविरोधेन नियंतुमर्हतीति॥ आर्षेयवदिति चेत्॥ ॥इति चेत्पश्यसि न प
शुत्वमभिधः पशुमालभेतव्यमिति। यथार्षेयं वृणीते त्रीन्वृणीते सामान्यश्रुतिस्त्रिषु च वर्तिष्यत इति त्रित्वं विशेषो
विवक्षितो नान्ये विवक्षिता इति एवमिहापि पशुत्वं छागप्रकल्पयितुं विवक्षितं नान्ये विशेषा इति॥ ॥न वा तत्र चो
दितत्वात्। नैतदेवं तत्र ह्येव चोदितं प्रयत्न उत्स्रष्टव्यं मंत्रवर्णे वरणे पुनश्चोदितं तत्र॥ त्रित्वसंख्यासंबंधस्य वरणे चो
दितत्वान्नान्या संख्या क्रियते आर्षेयशब्दादपि नानार्षेयं त्रिशब्दसहितं तत्सामर्थ्यं नार्षेयशब्दे विशिष्टसंख्या विष
यो नियम्यते इह न मंत्रस्य सामर्थ्यं तस्माद नियम इति॥ ॥नियमो वैकार्थ्यं ह्यर्थभेदाद्भेदः पृथक्त्वेनाभिधानात्॥ ॥
नियमो वैकार्थ्यं हि पशुछागशब्दयोः सामान्यं पशुरिति छागादयो विशेषा उच्यते। कथं ते सामानाधिकरण्यात्। पशुश्छा
गः पशुरुष्ट्रः पशुर्मेषः पशुरश्वः पशुर्गौरिति। एवं सति न मंत्रवर्णः पशुशब्देन विरुध्यते। छागोप्यालभ्य श्चोदितः। मं
त्रवर्णेन नियमान रहदमवगम्यते छागो विवक्षितः तत्र पृष्ठे उच्चारित इति नान्यो विशेषा इति। छागोपकरणम

सोपदंशितं यदुपदंशनेन पशुशब्दः छागाभिप्राय इति गम्यते। यथा युगवरत्र उपदंशिते उष्ट्रावक्रादिसन्निधाने व
उह्यमाने येतु वदेत्तदा यानाद्यमधिकृत्योक्त इति गम्यते न तु विदेवनाद्यमिति। यदि ह्यर्थभेदो भवेत्पशुछागयो
द्वयोः पृथक्त्वेनाभिधानं ततो भेदः स्यात् न छाग एव नियम्येत अविहितः छागार्थ इति अश्वोपादानमपि च छाग
पक्षे तं मन्त्रवर्णः प्रकाशयेत्। छागार्थाभिधाने पुनः पशुशब्दस्य छागप्राप्तावन्येषामप्राप्तिरित्यस्मिन्न प्राप्ते लिंगेन नि
यमः क्रियत इति॥ ॥ अनियमो वार्थान्तरत्वादन्यत्वं व्यतिरेकशब्दभेदाभ्यां॥ ॥ अनियमो वा स्यात् कश्चित्पशुरुपादेयः अर्था
न्तरत्वात् अर्थान्तरं पशुत्वमर्थान्तरं छागत्वमर्थयोरत्र सामानाधिकरण्यं न शब्दयोः कथं पुनरर्थान्तरं गम्यते व्यतिरेका
च्छब्दभेदाच्च व्यतिरेको हि भवति कश्चित्पशुर्न छागः तथा छागः पशुरिति शब्दभेदः। शब्दभेदादेवार्थभेदो न्याय्य एकस्मि
न्वाक्ये समवायात् पशुश्छागमानयेति। इतरथा ह्यन्यतरेणैव कृतार्थत्वादन्यतरो वाक्ये न समवेयात्॥ समवैति वा तस्माद
न्यत्पशुत्वमन्यत् छागत्वं तस्मादनियमोयं कश्चित्पशुरुपादेय इति। ततो चोक्तं सहत्विकापद्मन्यात् ऋत्विः रूपत्वेपि सतीति नि
यम एव। अतः मन्त्रस्य प्रयोगवचनेन गृहीतात् मन्त्रसाधने हि क्रमेति गम्यते। यदि छागमुपादास्यामहे सगुणं क

राम
७५

वासो नास्तीति सरक्षमयं परिदधीत उत विद्यमानेपीति। तथा यस्य पशुर्मायुं कुर्यादुरो वा पादौ वा हन्यात्स एतेन
मन्त्रेण जुहुयात् उतान्योपीति। तथा यो दीक्षितः किंचिदन्येन वधिष्यते स एवं मंत्रं ब्रूयात् योस्मान्द्वेष्टीति उताद्विषंतमपि
ष्यमाणेप्यपीति। तत्राधिकरणातिदेशोयं। तत्र यः पूर्वस्मिन्नधिकरणे पूर्वः पक्षः स इह पूर्वः पक्षः यः सिद्धांतः स इह
सिद्धांतः अविद्यमानेर्थपदिति पूर्वः पक्षः नियतं वार्थवत्वादित्युत्तरः स एवात्र न्यायोयं पूर्ववत्॥ ७॥ ॥ अनर्थकं त्व
नित्यं स्यात्॥ ॥ ज्योतिष्टोमे श्रूयते मध्यंदिने पररात्रे वा व्रतं व्रतयतीति। तत्र संदेहः किं नियतमपररात्रे व्रतं उतानि
यतमिति। किं प्राप्तं नियतं वार्थवत्वात् स्यादित्येवं प्राप्ते ब्रूमः अनर्थकं त्वनित्यं स्यात्। यद्येवं मन्येत तस्मिन्काले व्रतमे
तरिष्यतीति तदा व्रतयेत्॥ यदा तु खलु मन्येत न सम्पत्स्यतीति तदा [illegible] प्रकृतं क्षिप्यमाणमनर्थकं स्यात्।
यदि ह्यजीर्णे न यजमानो म्रियेत तदा तन्त्रलोपः तन्त्रलोपे च सर्वलोपः तस्मान्न नियतं तस्मिन्काले व्रतं व्रतयितव्यमि
ति॥ ८॥ ॥ पशुचोदनायामनियमोविशेषात्॥ ज्योतिष्टोमे श्रूयते पशुरग्नीषोमीयो यो दीक्षितो यदग्नीषोमीयं पशु
मालभत इति। तत्र संशयः किं यः कश्चित्पशुरालभनीयः उत छाग इति वचनसमाम्नानेनाभिप्रायो भवतीति संशयः नन्व

म्भेदाद्धास्याम: कर्तुं मंत्रमनुपाददाना मंत्रस्यापाद्धिकत्वात्॥ अथान्यमनुपादास्यामहे मंत्रस्य विषयाभावान्म
त्रमजप ह्रतो न सगुणं कर्म्म निवर्त्तयेमातेन वनस्पतिं वाधामहे॥ अन्यस्मिन्पशुत्वाद्यो वर्त्तते इति न वान्यमुपाद
स्याम ह्येवै गुणाणद्भुमात: तस्माच्छाग एवोपादातव्य इति। नन्वश्वमनुपाददाना नैव मंत्रवर्णमपहास्याम:। सए
ववाश्व: छागो भविष्यतिय: छिन्नगमनोश्व: सच्छाग: छिदेर्गमेश्च छागशब्द: प्रसिद्ध:॥ ॥रूपात्लिंगाच्च॥ ॥छ
विनमनुष्वरा भवंति निश्चयते यघंतरेणव वनमनुष्वरास्तादिदमुपपद्यते। तस्माच्छिन्नगमनोश्वोपि छाग इति कर्म्मा
ख्या भविष्यति। अत्रोच्यते॥ छागे कर्म्मसंख्या रूपलिंगाभ्यां॥ छागे कर्मसंख्या रूपलिंगाभ्यां नावकल्पते न हि छागशब्द: छि
न्नगमनवचन: समुदायोप्यसौ पृथगर्थांतरे प्रसिद्धो नासाववयवप्रसिध्यावच्छित्तव्य: तस्मान्नाश्वश्छाग:॥ ॥रूपान्यत्वा
न्न जातिशब्द: स्यात् इदमनात्पदैत्तरंसूत्रं। अथ कस्मान्न वयोवचनो भवति वयोवचनाश्छेतशब्द: छागश्छागलेश्च
स्स इति तेनाश्वोपि वयोवचनो भविष्यति। उच्यते नैतदेवं सर्ववयोवचने: अजापतिगतं तु वयोवदिं तुं त्राप्नोति यथाश्रोण

इति[illegible] वचनः अश्वजातिगतं वर्णं वदतिनान्यंतस्मादूपान्यत्वान्नवयोमात्रवचनः किंतुजातिवाचस्यात्‌ज्ञात
अं[illegible]योवदेत्‌॥ अतश्छागएवनियम्यते॥ विकारोनौत्पत्तिकत्वात्‌॥ ॥ इदमपिपदोत्तरमिहाश्वादीनांविकारस्यछा
गछ्दः किंचिदत्राश्वादीनामुपादीयते किंचिदन्यदेव तस्मादश्वेपिछाग इति॥ ॥नौत्पत्तिकत्वात्‌॥ ॥औत्पत्तिके
हिनाभिनामके: सर्वंग्रहत्पुरुत्नाख्याविकारः संभवतीति तस्मान्नाश्वः छागः। अतश्छागएवोपादातव्य इति॥ ॥सनैमि
त्तिकः॥ ॥पशोर्गुणस्यावोदितत्वात्‌॥ ॥ ॥पदोत्तरमेवेदंसूत्रं अथकस्मान्नछिद्रनिमित्तः छागशब्दो
दोभवसेवंहिश्रूयते॥ सुषिरोवा एतर्हिपशुर्यर्हिवपामुत्खिदतीति। नेत्युच्यते॥ छिद्रस्यापशोरचोदितत्वात्‌॥
अग्नीषोमीयंपशुमालभेतेतिहिवोच्यतेतस्मात्‌अछिद्रः पशुः नवावयवप्रसिद्ध्यासमुदायप्रसिद्धिर्बाध्यतइत्यु राम
क्तमेवतस्मा[illegible] छागएवोपादातव्योनाश्वादयइति॥ ॥ज्ञातेर्वातत्प्रायवचनार्थवत्त्वाभ्यां॥ ॥वाक्याद्दोवचा ७६
रणेभ्यां। यस्मादवयवप्रसिद्ध्यानसमुदायप्रसिद्धिर्बाध्यतेतस्माज्जातेरेवछागशब्दोवाचकः॥ एवंसमुद

यस्यार्थवत्ताऽनुगृहीता भविष्यतीति तस्याय वचनमुपपद्यते। विश्वेषां देवानामुस्त्रा एंद्रागा एंमेषा
एंवपानां मेदसोनुब्रूहीति जातिप्रायेवचनमुपपत्स्यते। प्रायेण पि हि नियमः॥ क्रियते यथाग्न्याधेये लिखितं
दृष्ट्वा त्र्ययोयमिति बुद्धिर्भवति॥ ॥तस्माद्याग एवोपादातव्य इति कृत्वा चिंता योऽप्रयोजनं वक्तव्यं॥ ॥९॥
॥ ॥ ॥इति श्रीमदाचार्यशावरस्वामिनः कृतौ मीमांसाभाष्ये षष्ठस्याध्यायस्याष्टमः पादः समाप्तः
॥ ॥७॥ ॥७॥ ॥राम॥ ॥राम॥ ॥ ॥राम॥ ॥राम॥ ॥ ॥

[redacted] ॥ ॥

पुर्वमीमांसाभाष्यषष्ठायपत्राणि ७७

शाबरभाष्यम्

अध्यायः ६ षष्ठः

अ. ६ - पा. ८

राम ७७

शाबरभाष्य सप्तमाध्यायारंभः।

॥ श्रीगणेशाय नमः ॥ पूर्वेणाध्यायषट्केन प्रत्यक्षविहितधर्माणां दर्शपूर्णमासादीनां इतिकर्तव्यता विहि-
ता उत्तरेणेदानीमविहितेतिकर्तव्यताकेषु सौर्यादिषु विधित्सितमभिधास्यते तत्र यद्यपि दर्शपूर्णमासादीनां प्रकरणे
विहिता धर्मास्ते सर्वकर्मसु विहिता भवंति तस्मात्तैरेव धर्मैः सौर्यादयोऽपि धर्मवंत उक्तास्तथा कर्त्तव्याश्चेति नार्थ उत्तरे-
ण षट्केन अथ ये यस्य प्रकरणे उच्यंते तेन तेनैवोक्ता भवंति ततो धर्मकाणां सौर्यादीनि तेषु विहिता भवंति किमर्थं धर्म-
संस्तुतेनेति यदा वक्ष्यति तदा केषु क्रियंते न। कथं वानुष्ठातव्या इति तदर्थमुत्तरः षट्कः प्रवर्त्तनीयः तत्र सप्तमेन धर्मा-
तावन्तः तिधर्मा उत्सुच्यंते अष्टमेन तेषु मत्र स्थाने उच्छ्रयो क्तव्या इति नवमेन दशमैकादशद्वादशैरेतावंतः प्रयो-
क्तव्या नातोऽधिका इति तत्रेदं विचार्यते किं यजिप्रयुक्ता एते धर्माः कथं यजिर्गुणवान्स्यादित्येवमर्थमाम्नायं-
ते आहोस्विदपूर्वप्रयुक्ताः कथमपूर्वं स्यादिति। यदि यजिप्रयुक्तास्ततः सर्वार्थाः॥ अथापूर्वप्रयुक्तास्ततो य- राम
स्य प्रकरणं तमवतिष्ठंते। किं पुनरत्र युक्तं यजिप्रयुक्ता अपूर्वप्रयुक्ता इति अपूर्वं हि फलवत् फले यजिः फलवत्ति- १
वक्ष्यासो विधीयमानोऽर्थवान्भवति। तस्मादपूर्वप्रयुक्ता धर्माः अतः परमाचार्यस्य सूत्रोपन्यासः श्रुतिप्र-

गोत्वसंबंधेन श्रूयमाणस्तत्रासंभवंतस्तत्संबद्धेषु पिंडेषु विज्ञायंते तत्र च गोत्वसंबंधस्याविशेषात्सर्वग
वीषु शुक्लनीलकपिलादिरूपेष्विकास्तु भवंत्येवमिहापि। उच्यते विषम उपन्यासः। तत्र गोसामान्यसंबंधेन धर्मा वि
धीयंते गौर्न पदास्प्रष्टव्य इति। इह पुनर्यजिविशेषसंबंधेन धर्मा विधीयंते दर्शपूर्णमासाभ्यां यजेतेति ज्योतिष्टो
मेन यजेतेति विशिष्टयजिसंबंधेनैव एवं भवितुमर्हतीति न सर्वत्रेत्यचक्रमः दर्शपूर्णमासाभ्यां यजेतेत्यत्र न
ज्ञायंते यागविशेषधर्मास्तु किंकारणं यदा यजौ धर्मा विधीयंते तदा यजिरनूद्यते यजेतेत्यमिति। यदि च यजिर्विधी
यते न धर्मैः संबध्यते न हि द्वयोर्विधीयमानयोः परस्परेण संबंधो भवति अन्यवादश्च सन्न विशेषात्सर्वयागानुवा
दः तस्मात्सर्वार्थी धर्माः। ननु दर्शपूर्णमासशब्दो विशेषको भविष्यति न दर्शपूर्णमासशब्दः शक्नोति यागं वि
शेष्टुं अयं हि विधिर्वा स्यादनुवादो वा यदानुवादः तदा धर्मसंबंधार्थः स च धर्मसंबंधो यागानुवादेनैव नतयोः सिद्धः
ननु निवृत्तिकरो भविष्यति दर्शपूर्णमासावेव तौ कुर्यान्नान्यानिति नैवं शक्यं कारणं न तस्मादन्यनिवृत्तिर राम
र्थः ननु परिसंख्या करिष्यते। नात्र परिसंख्या युज्यते यद्यनेन वाक्येन यागमात्रे धर्मप्रसंगः स्यात्ततः २

स्मात्पुनर्वचनं परिसंख्यां कुर्यात् यत्र पुनरसति प्रसंगे नैव प्रसंगो नैव निवृत्तिरित्यतिभारः एतस्यैव वा
क्यस्य भवति एवं तर्हि नात्र यजेतेति शब्देन धर्मैर्विधिभिः संबध्यते यजेतेत्यमिति केन तर्हि दर्शपूर्णमासशब्देन प्रत्य
यात्मस्य तेन संयोगो दर्शपूर्णमासाभ्यां यजेतेति परोक्षो धर्मविधिभिः कस्तदा वाक्यार्थः दर्शपूर्णमासौ कुर्यादि
ति नैवं शक्यं समर्थं वसति धर्मासंबद्धाः परिप्लवा भवंति कथं तत्वाय यमाख्याति कोऽविभक्तिर्यजेतेति सा दर्शपूर्णमा
सयोः कर्तव्यतां विदधाति तत्र कथं यागमात्रेण यागविशेषेण वा धर्मसंबंधः स्यात्विधायिका विभक्तिर्नास्तीत्यसंब
द्धा धर्मा भवंति नैष दोषः न वयं वाक्येन धर्माणां संबंधं करिष्यामः केन तर्हि प्रकरणेन कथं कर्तव्यताकांक्षोदितायामि
ति कर्तव्यताकांक्षा भवति कथं कुर्यादिति प्रकरणेन धर्माः संबध्यंते इत्थं कुर्यादिति नैवं शक्यं यदा हि दर्शपूर्णमा
सौ कर्तव्यतया चोद्येते तदेति कर्तव्यताकांक्षैव नास्ति प्रकृतानि इति कर्तव्यताकांक्षायां प्रकरणमेव नास्ति एवं सुत
मसंप्रकरणादिति कर्तव्यतार्थित्वादिति। एवं तर्हि नैवात्र यागे धर्मा विधीयंते नापि दर्शपूर्णमासयोः।
कर्तव्यतोच्यते किं तर्हि दर्शपूर्णमासाभ्यां यजेतेति पदद्वयेन विशिष्टं यागमनूद्य तत्र धर्मा विधीयंते दर्शपूर्णमा

…तेति कर्तव्यतानतावाक्ययोरसत्यांचे ३

म्नायव्रेतेत्थमिति एवमपि दर्शपूर्णमासाभ्यामित्यनुवादो न युज्यते तृतीयार्थस्यासिद्धत्वात्पूर्व
वदनुवादो भवति अपूर्वं च तृतीयार्थः सोपि च रूपविधानात् तस्मिन्विधीयमाने यद्देवतासंबंधमापद्यते दर्श
पूर्णमासौ यज्ञेः करणमिति तस्मात्स एव प्रथमः पक्षोस्तु यागानुवादेन धर्माणां विधिरिति। ननु तत्रापि दर्शपू
र्णमासाभ्यामिति तन्न संबध्यते। ननु संभंत्स्यते कालतद्वचनः सन् प्राप्तिकोनित्यानुवादो भविष्यति। प्रायेण यागा
नां दर्शपूर्णमासौ कालत्वात् तृतीयावत्कालस्यार्थस्वतः करणभावत्वेनोपपद्यते तथा सत्सर्वे धर्माः सर्वार्थाभवं मा ५
ति। चोदनाशेषभावाद्वा तन्नैदायवत्तिष्ठेरन्नुत्पत्तेर्गुणभूततत्वात् कर्मचोदनायाः शेषभूतो धर्मसमाम्नायः एक
देशभूतस्तस्यार्थः दर्शपूर्णमासाभ्यां यजेत अन्वयान्वाधानादिकर्यतिकर्तव्यमतयेति तस्या चोदनायाः यज्ञेर्स
त्वभावः श्रूयते दर्शपूर्णमासशब्दश्च द्वितीयानिर्देशेवचनः करणमवोचयज्ञेः श्रूयते दर्शपूर्णमासाख्येन यागमसनु
दयेनाप्रसकुर्यादितियत्तद्रम्य तत्कर्तव्यतया बोध्यते नयजिरपूर्ववत्ता। ननु फलमत्र वाक्ये श्रूयते स्वर्गका। राम
मायजेतेतत्कर्तव्यं स्यात् स संश्रूयते न तु तथ यज्ञिनाक्रियते विनष्टेपियज्ञेतदपूर्वं तु तेन क्रियते तस्मात्त्व ३

साधनत्वाच्छेषाणां मुख्यभेदे यथाधिकारभावः स्यादिति मुख्यान्यपूर्वाणि तानि हि फलवत्वात्प्रधानानि प्रथ
नेव मुख्यशब्दस्तेषां भेद उक्तः शब्दान्तरादिभिर्हेतुभिः तस्मिन्मुख्यभेदे सति यथाधिकारभावः स्यात् ... शेषाणां
न ३ येयस्यापूर्वस्याधिकारे प्रकरणेम्नायन्ते तस्यैव भवेयुः श्रुतिप्रमाणत्वात् अयमस्यापूर्वस्य शेषः अयमस्येति
तत्र श्रुतिरेव प्रमाणं क्रमेण न प्रसज्यादीनामन्यतमत् श्रुत्याद्ययस्य प्रकरणे श्रूयन्ते ते तस्यैव भवितुमर्हन्ति
मा ५ तेन वान्यस्यापूर्वोर्थो न्यस्य भवति नहि यद्देवदत्तस्य वाससा आच्छादनानिर्दिक्कृतमुक्तं तद्यज्ञदत्तस्य भवति तस्माद्यथा
प्रकरणं व्यवस्थाधर्माणां उत्पत्त्यविभागाद्वा सर्वत्र वैदिकधर्मस्यात्॥ अथवा नैतदेवं यथाप्रकरणं धर्माणां व्य
वस्थितिः कथं तर्हि सर्वक्रिया धर्मः स्यादिति समानधर्मता सर्वे धर्माः सर्वार्थाः कुतः उत्पत्त्यविभागात्। उत्पत्तिरितियजिश्र
वः अपूर्वस्योत्पादनात् अर्थ उत्पूर्वं श्रमंयजिप्रयोजनत्वात्तयोरविभागः सर्वाण्यपूर्वाण्ययजिमं तियजिसंबं
धेन धर्माः शिष्यन्ते यजेगतुक्तो काले न प्रयोजनसंभवन्ति तस्याफलत्वात्त्वसंभवन्तस्तत्संबंधेष्वपूर्वेषु विज्ञायन्ते स
र्वयजिसंबंधः सर्वेषामपूर्वाणां तुल्यः तस्मात्सर्वार्था भवन्ति। सत्यधर्मवदयथासत्यधर्मा गौणं यदो स्यापूर्व इति

ष्टेषु विहितं भवति। तस्मात्सार्वत्रिकं प्रतीयते इह तु यज्ञेऽगुणभावेन श्रवणेनैव यज्ञो धर्मः। अयं तेकिंत
ऽपूर्वस्तेषामपदिष्टो हेतुः। तस्मादनुपन्यासः स खल्विति॥ ॥ अविभागात्तु नैवं स्यात्॥ ॥ नैतदेवमपूर्वप्रयुक्ता
धर्मा इति यजिप्रयुक्ता एव कुतो विभागात्। यजिना ह्यविभागो धर्माणां प्रत्यक्षं केचिद्विबंधोऽश्रूयंते किं विद्देवतापो कोविंमं
पु। एष वयजिर्यद्द्रव्यं देवताश्च स्विरूपमं चेणत्यज्यते स एष प्रत्यक्षो यजिना संबंधो धर्माणामपूर्वेण त्वानुमानिकः
लिप्यते प्रत्यक्षश्रुतो भावः स्वर्गकामो यजेतेति अनुमानिको पूर्वेणानुमानाच्च प्रत्यक्षं बलीयस्तस्माद्यज्यर्था
धर्माः। ननु यजिर्भंगित्वात्कालांतरफलं दातुमसमर्थस्तत्र कृता धर्मा असमर्था एव भवंतीत्युक्तं। अत्रोच्यते तस्य न्यायस्या
क्षेपेण प्रसवस्थानं क्रियते। तैलपानवदेतद्भविष्यति यथा तैलपानं घृतपानं वा भंगित्वेपि सति कालांतरे मेधास्मृति
बलपुष्ट्यादीनि फलानि करोति एवं यजिरपि करिष्यतीति दृष्टश्रुतेनाऽपूर्वेण कल्पितेनेति॥ ॥ द्रव्यार्थत्वं विप्रतिषि
द्धः॥ ॥ एवं च सति सर्वे धर्माः सर्वार्था भवंति यथा वैश्वानराद्युपयाजादयः संति तत्र सोऽर्थकर्मणि प्रयाजानादर्शनिसुप रामु ४
प्रतेप्रयोजनफलं ज्ञेहोतीति इतरथा प्रयाजाश्च विधातव्याः प्रयाजेषु च दृष्टफलहोमः तथा च धर्मं तस्मात्। यज्यर्थत्वं वि
या २

प्रतिषिद्धं तस्माद्यजियुक्ता धर्मा इति। उत्पत्तौ विधिभावाद्वा चोदनायां प्रवृत्तिः स्यात्तत्रश्च कर्मभेदः स्यात्। नैतदेवं यज्य
प्रयुक्ता धर्मा इति चोदनायां प्रवृत्तिः स्यात् चोदनेतापूर्वं ब्रूमः चोदनार्थत्वादपूर्वार्थत्वादपूर्वप्रयुक्ता धर्माः फलवत्त्वादि
त्युक्ते हेतुः। यत्तु प्रत्यक्षो यजिसंबंधो धर्माणामिति अत्र ब्रूमः। उत्पत्तौ विधिभावाद्वा द्युत्पत्तिरिति विधिं ब्रूमः। उत्पत्तौ यजेना
विधिः यज्यर्था धर्मा इति केवलं यजौ श्रूयंते क्रियंते न चैतावता तदर्था भवंति यथा वाससि रागः श्रूयते वासो रंज्यते न वा
सो सव क्रियते न चासौ तदर्थस्तदर्थः पुरुषार्थो वा भवति एवमिहापि यज्ञौ श्रूयमाणाः क्रियमाणाश्चापूर्वार्था भवेयुरथ
चायतत्तश्च कर्मभेदः स्यात्। यतोऽपूर्वार्था इति। यत्तूच्यते प्रत्यक्षं फलेयुणमाचरति। नो हेलापूर्वे भवतीति प्राणलि
लिंगो विलायते प्रसादा पि वयेन क्रियते तत्कारणं भवति यथा गोमये पचति तु ष पक्का भवंतीति। यत्तु तैलपानव
दिति फलं भवतीति अत्र ब्रूमः तैलपानस्यापि न कालांतरे फलं भवति धातुसाम्यं तस्य फलं तच्च तत्काले भवत्येव
बलपुष्ट्यादि तत्समग्राहारपरिणामाद्भवतीति तस्माद्विषम उपन्यासः। यदि वाप्यभिधानवत्सामान्यात्सर्वधर्मः
स्यात्। यथा पूर्वं प्रयोजकं धर्माणां तथापि सर्वधर्मः स्यात् समपदार्थः अभिधानवत्सामान्यात् अभिधानं तावदेत

ऽंसमानं मह र्वमित्यभिधानवद्धर्मेणाप्यस्य समानेन भवितव्यं वा हूकिंवत् यथा वा हीक्लोतिथिरागतो भव
त्रमस्मै भक्तियतामिति उक्ते यो यो वा ही क्लास्य तस्य यवाग्नं क्रियते यथा वसामयेभ्यु क्रोदनो भोक्तव्यः उदरामये
पयः पातव्यमिति सर्वत्र वसामये भु क्रादनो भुज्यते उदरामये पिपयः पीयते एवमिहापि दर्शपूर्णमासयोर्धर्माः श्रु
तास्ते सर्वान्हविर्ग्रहणं भवितुमर्हंति । अपि च अरुणपराशराः शौमनज्ञाखिनः नेषांपरि वरेषु स्मृति रूपं ब्राह्मणं भवतियेद
र्शपूर्णमासयोर्धर्मास्ते सवेष्टी नाम धीषोमीयस्य वेत्यारभ्याथ वत्सर्वाः प्रकृति विकृते मेनु ज्ञातात्रीति । तथैवानुक्रमण
मतमेव न्यायस्त्वयति तस्माद्पूर्वप्रयुक्ते त्वपि सर्वे धर्माः सर्वार्था इति । अर्थस्य त्वविभक्तत्वात्तथा स्यादभिधानेषु
र्वतां प्रयोगस्य कर्मणः शब्दभाक्त्वाद्विभागाच्छेषाणामप्रवृत्तिः स्यात् । उपवर्णना परिहारस्तावदुच्यते यदुक्तं व
द्विकवदिति । अत्र ब्रूमः अर्थस्य त्वविभक्तत्वात्तथा स्याद भिधानेषु अर्थो वा हीक्वत्वं तद्भावासं वंधः स्यो विभक्तः सर्वत्र
अनुगत इत्यर्थः तन्निमित्तश्च प्रीति विशेषेण पुरुषनिमित्तः कथं ज्ञायते पूर्ववत्त्वात्प्रयोगस्य पूर्ववान्त्र प्र
योगो वहु शो वा हीकान्वा का हीका श्च ज्ञोजितास्तत्रान्वयव्यतिरेकाभ्यां ज्ञातमेतद्दृशा निमित्तेयं वा न्न प्रियतानपु
५२

स्यकर्तव्यतोच्यते यस्य कर्तव्यता तदिति कर्तव्यतया संवध्येत तस्माद्पूर्वार्थाः तेषां वा पूर्वाणां भेदः अत स्तन्नेदाद्य
थाप्रकरणं व्यवतिष्ठंते धर्मा इति तत्र वैतस्मिन्नत्रे कथं दर्शपूर्णमासशब्देन यागो विशेष्यते उच्यते नैरात्र यागो
विशेष्यते किं तर्हि पूर्वभावने उभयपदविशिष्टो वा तेयथा रुण्यापिंगाक्ष्यैक हायन्या सोमं क्रीणातीति विषम
उपन्यासः तत्र घनत्वस्य मन्योगुणः तेन तत्रोभय विशेषणत्वं युज्यते इह पुनर्याग एव तौ दर्शपूर्णमासौ तेनेहो
भय विशेषणत्वं न युज्यते उच्यते इहापि यजतिसामान्यं दर्शपूर्णमासाविति विशेषः अन्यत्र सामान्यमन्यो वि
शेषः एवमपि श्रुतसामान्यस्य नाराकात विशेषस्य न वैलक्षण्यं गच्छ्रवतीति । एवं तर्हि नैवात्र श्रुत्यर्थः परि
गृह्यते किं तर्हि वाक्यार्थः किं कारणं श्रुत्यर्थे परिगृह्यमाणे दर्शपूर्णमासशब्देन थैकी भवतियजतिश्चानुवादः
स्यात् यज्ञ तात्मकत्वाद्दर्शपूर्णमासयोर्यजतिसामानाधिकरण्याच्च दर्शपूर्णमासशब्दस्यास्य त्वेलक्षणसंयोग
त्वार्वलिकं प्रतीयते । यत्तूक्तं स्व वदिति अत्र गावाहतो धर्मः श्रूयते आहूते पदार्थत्वात् नवतत्रसंभवति अतो सा
मान्यतः सहचारिपिंड लक्षणार्थे विज्ञायते यथा गंगायां गावरतित स्रसाहचर्यं सर्वेपि ग्रामा अविशिष्टमिति सर्वे

रूपनिमित्ता। तस्मात्त्रयासाध्वाहीकादिधर्मिनियानेषु थे हकर्मणः शाब्दभाव्यत्वं॥ नान्यतः आकामेतत्तज्ज्ञातं
एकैकस्याः सर्वस्य धर्मा इति शब्देन व्यवस्थिता विज्ञाता धर्मा अपूर्वाणां च विभागः अतः शेषाणामन्यत्र विहिताना
मन्यत्राप्रवृत्तिः स्यात्। स्मृतिरिति चेत्। अथ यदुक्तं स्मृतिरिति तस्याः कः परिहारः। न पूर्ववत्वात् पूर्ववती हीयं व ३
कं ४ स्मृतिः योऽस्त्वं धर्मयाहे वक्ष्यति विध्यंतावाप्रवृत्तिवदिति। तेन प्रापितानां धर्माणामयमनुवादः। एतन्न्यायपूर्वि
कानां प्राप्तानां विद्याधिकाप करणे व्यवस्था धर्माणामेतेन न्यायेन भवति। अर्थस्य शाब्दभाव्यत्वात् प्रकर
णनिबंधनाच्छब्दादेवान्यत्र भावः स्यात्। इदं निगमनसूत्रं निगमनं च प्रतिज्ञायाहेतोश्च पुनर्वचनं तादृदस्तु
च्यते यस्मादेवं तस्मादर्थस्याग्न्याधानादेः शाब्दभाव्यत्वात्प्रतिप्रकरणं च निबंधनाच्छब्दादेवान्यत्र भावः
स्यात्। यथा गंधर्वाप्सरसो वा एतमुन्मादयंति य उन्माद्यते ता वै गंधर्वाप्सरसो यद्राष्ट्रभृतं तस्मै स्वाहा ताभ्यः
स्वाहेति जुहोतीत्यग्निप्रकरणे उक्तानां राष्ट्रभृतां मुख्य हृत उपदेशाः एतेषां राष्ट्रभृतां जुहोतयस्ता नान्यजुहो

न्या

तिष्ठत्यसत्येतस्मिन्वचने यथाधिकारं व्यवतिष्ठेरन्धर्मा इति एवं वसत्यधर्मकाण्डेपि अग्न्यादीनित र्थमुक्तरेण्या
यपक्षः प्रारब्धमप्रवृत्तिनतस्यैव प्रमेनतावदैन्द्राग्न्यादीनां कर्मणां धर्माः संतीत्युच्यते तेषां निर्दिशेनैतिर्दिशेन। श्र
मपरत्रविहिता धर्मास्तमतीतानाच तेषां देशो यथा देवदत्तस्य भोजनविधिं कृत्वा शालिरूपमांसापूपै देवद
त्तो भोक्तव्य इति तमेव विधिं यज्ञदत्ते दिशति देवदत्तवद्यज्ञदत्तो भोजयितव्य इति। श्लोकमप्युदाहरन्ति। प्रकृतात्क
र्मणो यस्मात्तत्समानेषु कर्मसु। धर्मप्रदेशो येन स्यात्सोतिदेश इति स्थितिरिति। तत्रैतान्यावचनेन वा तत्र नाम मि ८
त्रिविधमतिदेशं कर्मनामयौगिकमिति। वचनं पुनर्द्विविधं प्रत्यक्षश्रुतमानुमानिकं च तयोरानुमानिकं तु परि
शिष्यते। प्रत्यक्षश्रुतं त्विदानीं विविच्यते। अस्ति पुनर्नामैकाहः अपरः श्येन सौत्यादिवाक्याणि वा रिक्तात त्रयो
काश्चित् धर्मान्विधायाह समानमितरं श्येनेनेति एतद्विचार्यते किमयमनुवादो विधिर्वेति यदि विधिस्ततोतिदेशः
श्येन धर्मान्निषादवति दिशति। अथानुवादस्ततो नेति। तत्र किं प्राप्तं तल्लक्षणेनैवोपक्रम्यते॥ समानपूर्वत्वात् राम
सन्नाधिकारः स्यात्। समानमितरत् श्येनेनेति श्येनापन्नाधिकारः स्यादनुवादइत्यर्थः कुतः पूर्ववत्त्वादय ६

भिषुः पूर्ववान् ज्योतिष्टोमपूर्वकः ज्योतिष्टोमिकोत्र विध्यंतर उत्पथ्यः॥ अत्र चोदकेनोत्पन्नाज्योतिष्टोमिकाध
र्माः संति श्येनेपि ज्योतिष्टोमपूर्वकत्वात्तत्रापि ते संति ये श्येनेन समाम्नाता भवंति तानधिकृत्यायुं वादो युज्यते त
स्मादुत्पन्नाधिकारत्वादनुवादः किंचेतरदितिचोद्यं नाम वेनोपपद्यते उतरत्राद्यस्यासंनिहितत्वेनानुपपन्नः संन्निहि
त एव भवति यथेतरः प्रावारादीयतामितरः कंबलो दीयतामिति संन्निहितो दीयते न प्रावारमात्रं कंबलमात्रं
वा ज्योतिष्टोमिकाश्च संन्निहितास्तस्मात्तेषां वादः तेषां चेदनुवादो विहिता हि ते चोदकेनेति॥ ॥ श्येनस्य तिवत्॥
इति चेत्तथ्य श्येनस्य ज्योतिष्टोमिकानामनुवाद इति मैवं॥ श्येनस्य वैशेषिकाणां लादितो ष्षीषादीनां धर्माणां वि
धिः कुतः श्येनग्रहणसामर्थ्यात् एवं श्येनग्रहणमर्थवद्भविष्यति धर्माणां विशेषयदितरथानर्थकं स्यात् सर्वे
षां हि ग्राहाहीनसत्राणां तत् समानास्तत्र यावदुक्तं स्यात् समानमितरदिति तावदेव समानमितरत् श्येनेनेति।
नातन्निधानात्तत्॥ ॥ नार्यश्येन वैशेषिकाणां वादो युज्यते कस्मादसन्निधानात् अयमितरच्छब्दः संन्निहि
ते भवति न च श्येनशब्देन वैशेषिका उपेसन्निहिताः पदं तु श्येनशब्दो वैशेषिके भवतीति विधिपदे अवैशेषि

कत्वं दोषः स्यादनुवादपक्षे नैव कश्चिद्विधीयते किं विशेषः पश्यति । ज्यौतिष्टोमिकास्तु सर्वसाधारणाः संतश्चे
नस्यापि भवंतीत्यनुवादा युज्यते तस्मा ज्यौतिष्टोमिकानामेवानुवादः ॥ ॥ अपि वा पूर्ववत्त्वादितरदधिका घ २घ१२
र्थे ज्यौतिष्टोमिकाद्धि वेत्यादावत्समानं स्यात् । अपि वेति पक्षांतरपरिग्रहे विधिरयं श्येनवाजपेयिकानां न ज्यौति
ष्टोमिकानामनुवादः कुतः अपूर्ववत्त्वादेवमपूर्वमर्थं विधास्यति तथा सति विशेषकरो भविष्यति अनुवादः
सन्नपूर्वत्वे विशेषकरो नर्थकः स्यात् । न चेतरत्राद्यर्थं संनिहितं भवति । उच्यते इतरदधिकार्थं समानमित
रत् ॥ समानमधिकं वेत्यर्थः ननु संनिहितवचनायनाधिकार्थमिति । उच्यते न केवलमयं संनिहितवचन
एव । पूर्वोक्तसंदंशमसंनिहितमपि ब्रूते अव शिष्ट वयदाः ५ हविस्त्वाणप्यनुक्रम्यते तरत्राद्यः प्रयुज्यते देवद
त्तायकं बलो दीयतां विष्णुमित्रायकोशो यज्ञदत्ताय सोममित्रश्चैवत्रायेति तदा वस्त्रमेव प्रदीयते न हिरण्य
रजतं वा एवं ज्यौतिष्टोमिकेभ्यो धिकाद्रलोहितोष्णीषादीन्धर्मानुक्रम्यतरत्राद्यः प्रयुक्तः तेनात्राप्यधिकानेव व राम
क्ष्यतीति तथाधिकवचनो भवति । अथ ज्यौतिष्टोमिकाद्रूते तथा संनिहितवचनः तत्राचक्षपमन्यतरद्ध्य ७

॰ध्यः।थेकार्थतांहित्वासंन्निहितार्थताश्राश्रीयतेअनुवादमात्रमनर्थकंभवतिरूपेनशब्दस्याविवक्षितार्थः
॰संन्निहितार्थताहित्वाअधिकार्थताग्रहणेनकश्चिद्दोषोभवति।तस्मात्तत्रकारआहरतरदधिकार्थइति।
॰न्ताज्योतिष्टोमिकाद्विधेराधिकाः रूपेनवैशेषिकाइहइतिदिश्यंपतेतद्ववकंसमानंस्यात।समानशब्दःस्यादि
त्यर्थः भवतिरूपेनशब्दस्यविवक्षितः॥ चातुर्मास्यानांवैश्वदेवेआग्नेयादीनिहवींषिसार्थवादवाक्यैर्विहितानिधर्मा
॰तेषांसक्ताः वरुणप्रघासेषुकेवलानिहवींषिआम्नायन्तेयद्वैश्वदेविकानांब्राह्मणंतेषामतिदिश्यंतेएतंब्राह्मण
॰वपंचहवींषियद्ब्राह्मणानीतराणीति।तत्रकिमर्थवादमात्रस्यायमतिदेशउतसार्थवादकस्यसविधिकस्य
॰स्येति।कथंपुनरर्थवादमात्र–स्यातिदेशोभवतियथापंपाकुलायप्रतिमाप्रहरेदिति।केपुनर्विधयः।केऽर्थवादाः
॰त्रेधेसंन्नद्धवर्हिर्भवतिधैत्रेयासंन्नद्धरश्मि[illegible]नवप्रयाजानवानुयाजाइत्येवमादयोविधयोवाक्ये[illegible]भिवाएतानिदंवी
॰णीत्यर्थवादाः तत्रेदमुच्यतेपंचसंचरेष्वर्थवादातिदेशःसन्निधानात्॥ पंचे ।तानिहवींषिसर्वपर्वसूच्चरतीतिपंच
संचराणीत्युच्यतेतेषुसंचरेष्वर्थवादमात्रस्यातिदेशइतिकुतःसन्निधानात्हवींषिहिसन्निहितात्अर्थवादाविधिभि

...कस्य संबंध संबद्धत्वात् धर्मविषयः किमतः अतएतद्भवति यत्र्वेषां ब्राह्मणमिति व्यपदेशो युज्यते तद्धि
ब्राह्मणं येन विधीयते कोऽन्योह विषां ब्राह्मणस्य तु संबंधोऽस्त्व विधेयविधायकभावादर्थवादस्यैतानि विधीय
तेन धर्मविधिभिर्धर्मविधिभिस्तु यानि विधीयंते न तानि ह वा पितस्मादर्थवादानामतिदेशो न धर्मविधीनां। अ
पि च वरुणप्रघासेष्वपि केचिद्वैश्वदेविका धर्मा विधीयंते यथाग्निं मथ्नंतिप्रस्तुवो भवंतीति तेषामतिदेशो न विद्यता
नां पुनराम्नानमनर्थकं स्यात् यदि विधयोतिदिश्येरन् तस्मादर्थवादातिदेश इति। सर्वस्य वैकृताद्युत॥ नैतदे
वमर्थवादमात्रस्यातिदेश इति सविधिकस्यार्थवादस्य कार्यस्यातिदेश इति कुतः एकवाक्यत्वात् समानत्वाद्
वादित्यर्थः समानोयं ब्राह्मणमिति त्वाद्विधीनामर्थवादानांवस यथार्थवादान्नरुष्णात्तेवं विधिनापि गृह्णंति
नान्यपातिदिश्यंति। यत्तु विधिनोहर्विर्भिः संबंधो नास्तीति विधेयविधायकसंबंधो नास्त्युपकारलक्षणः सर्वेधो
...यतिकउपकारोयदेषांमंगानि विदयाति अक्तिवेत्संबंधोब्राह्मणानां त्वद्भुत्तसर्वातिदेशोन्यायमिति॥ लिंगा
दर्शनाच्च॥ ॥लिंगं च विधीनामतिदेशं दर्शयति किं लिंगं वरुणप्रघासेषु मथिं त्वाहूकुतयो वाजिनोपडंत्याकुतीनां

राम
८

नैत्रिं ज्ञात्वायेति वरुणप्रघासेष्विज्ञातमाकृतीर्दर्शितयदि विषयो नातिरिक्तेप्रवृत्तानस्युः तस्मादिति दि
ष्टदेविहितानाम्नानान्तेति वत्। इतियदुक्तं तस्यकः परिहारः अभाषा तेस्त्रं। नेतरार्थत्वात्॥ ॥ अत्रोक्तेविध्य
न्दिदे होपिसति नाग्निमंथनादीनामाम्नानमर्थकं मितरस्य हविषोर्थेन भविष्यति दक्षिणवैहारिकस्य मारुत
त्स्मान्नेतत्त्तापन्नं विशिष्टिनाम नाग्निदेवतास्य भविष्यति। एककपालेष्वाम्नोवनातिदेत॥ ॥ वैश्वदेवे एककपाल आग्ना
तोद्यावापृथिवीयएककपाल इति वरुणप्रघासेष्वपि कायएककपाल इति तत्रापरऐन्द्राग्नोद्वादशकपालो मारुता मि
श्चेति। तथासाकमेधेष्वपि एककपालेन्द्राग्नो वाम्नाते ऐन्द्राग्न एकादशकपाल इंद्राय वृत्रघ्ने चरुः वैश्वकर्मणएक
कपाल इति तत्रैवमाम्नातं एतद्ब्राह्मणऐंद्राग्न एतद्ब्राह्मणएककपालो यद्ब्राह्मणइतर इतरस्मेति। तत्रैवमुक्तोए
ककपालेष्वाम्नोवनातिदेवतयदर्शयवसवराणि। अत्रापि सविधिकस्य सार्थवादकस्य कौ ... अस्याति देवतात्तैनेव
न्यायेनेति प्राप्तिरत्र मेतदुत्तरचिंतार्थं॥ ॥ एककपालानां वैश्वदेविकः इति रायवणऐ सर्वहोमापरिशिष्टदर्शी 53
दानमर्थवसतचापवदनस्य वचनात् साकमेधेषूयते एतद्ब्राह्मणएककपाल इति तत्र चिंत्यते वैश्वदेविकस्यैक

पालस्येदं ग्रहणमुत वारुणप्रघासिकस्येति। किं प्राप्तं वैश्वदेविकस्येति ब्रूमः। किं कारणं तस्य विहिता धर्मास्त्र
लं कृत्स्नाभिरूर्यैरुपांशुयष्टव्यः। आविः ष्टब्धः कार्यस्तेष्वेव मा स्युः। वारुणप्रघासिकस्तु धर्मकः। यस्य विहिता धर्मा
स्तैश्चैतद्गुणैस्तेऽपलं तद्धदिदं कृतेयमिति। तस्माद्वैश्वदेविकस्य ग्रहणं। नन्वैन्द्राग्नसमुच्चारणादेककपालोऽपि वारुण
प्रघासिक एककपालनवावद्रूपमेकपर्वणैरेव समुच्चारणे न भवितव्यं नानापर्वणैरपि समुच्चारणमविरुद्धं तत्त
स्माद्वैश्वदेविकस्य ग्रहणमिति प्राप्त उच्यते वारुणप्रघासिकस्यैककपालस्य ग्रहणमिति। कुतः। तत्रैककपालानां
वैश्वदेविकः प्रकृतिः। कथं ज्ञायते। आग्रयणे सर्वहोमापरिवृत्तिदर्शनात्। आग्रयणे द्यावापृथिवीयस्यैककपाल
स्य सर्वहोमम पर्यावृत्तिं च दर्शयति यत्सर्वं हुतं करोति सा तैककपालपरिवृत्ता हुतो हुतः पर्यावर्तते सा द्वितीया आज्य
स्य तद्यावापृथिव्यायजेतेति आज्ययागविधिपरं वाक्यं एककपालस्य सर्वहोमम पर्यावृत्तिं च प्रत्यक्षादर्शयति एतस्माद रा॰न
र्शनादवगम्यते वैसर्जनवदाधानस्यावदानादवगम्यते वावधारणं भवति इदमेवैककपालस्य द्विरवद्यतीति तेन ज्ञायते नृ ९
नमन्यत्र न द्विरवदानमिति तत्रैतत्सर्वं वैश्वदेविक एककपाले विहितं तस्मादेककपालानां वैश्वदेविकः प्रकृतिः॥ कि

मतः साकमेधिकेष्वेककपाले वैश्वदेविका धर्माः प्राप्तास्तेषामतिदेशोऽनर्थकः वारुणप्रघासिकस्य च धर्माः
वैश्वदेविका अप्राप्तास्तेषामतिदेशोऽर्थवांस्तस्माद्वारुणप्राघासिकस्यैककपालस्येदं ग्रहणमित्युच्यते लिंगमेत
स्तुतः प्राप्तिरिति । प्राप्तिमुत्तरवत्साम स्वरसामैककपालामिष्टं वेत्यत्र । के पुनस्ते धर्माः । हिरण्यमप्स्व च प्राम
श्यो वेत्येवमादयः ॥ ॥ इति शाबरे भाष्ये अष्टमस्य प्रथमः पादः ॥ ॥ इदं श्रूयते रथंतरमुत्तरयोर्गायतीति
बृहतीषु रथंतरं गायतीत्येवमादीनि समाम्नायंते तत्र विचारः किमिहातिदिश्यत इति ॥ ननु यद्यद्रथंतरादिभिः शब्दैरु
च्यते तदतिदिश्यते बाढं तदेव तु न ज्ञायते किमेभिः शब्दैरुच्यत इति । न च स्तुतिरूपमेतत् गीतिरृक्षु साम्यते इति तथा
सिद्धस्याक्षेपः करिष्यते स एव तु निर्णयो भविष्यति । यदि स एव निर्णयः किमर्थ आक्षेपः शास्त्रार्थः स्मरणनिरूपणमेव श्रा ४
तु । तत्र किं प्राप्तं तद्युच्यते स्तोभस्वरकालाभ्यासविकारायो हिंकारस्वरणेव प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनवत्साम
विगीतिः सामशब्दाभियुक्तैरुपदिश्यते तस्मात्संज्ञायां उच्यते न तु गीतौ सत्याभावात् रागानारब्धस्य संस्कारकर्मणो वाचकाः
न्नाम्रस्तुतो । तदेवेदं मुक्तमाक्षिप्यते नेमे संस्कारस्य वाचकाः किं कारणं । अकर्मकाले प्रयुज्यंते प्रयोजनाभावा
न्यो ... अकर्मकाले साम प्रयुज्यते न च संस्कारकर्माणि प्रोक्षणावेक्षणपर्यग्निकरणादीन्यकर्मकाले १

यत्तु मंत्रा एते तत्तेऽन्वहं स्वाध्यायोऽध्येतव्य इति नियमादकर्मकाले प्रयोगो युज्यते तस्मादेवं नामानि। किंवासं
ज्ञाभेदात्संज्ञाभेदस्तु भवति रथंतरं बृहदिति। एवमादिः सत्कृतात्संस्कारकर्मणो न पृथक्त्वः। एकेनैव हि तदा पर्याप्तं य
था गीतिरिति। अथ यानि नामानि तत्तासां भेदात्संज्ञा पृथक्त्वं प्रयुक्तं। अपि च यदि गानांतरं रथंतरं गानं च बृहदिति रथं
तरमिदं बृहदिति पृथक्त्वेन संज्ञानिवेशो नोपपद्यते। अन्नाम त्वेतदुपपद्यते। किंच विकारपृथक्त्वान्नु। नति साम च
विकारपृथक्त्वान्नास्ति साम च विकारपृथक्त्वं दृश्यते तदेकत्वाज्ञानस्यानुपपन्नं संस्कारभेदे हि विकारपृथक्त्वं दृष्टं
तद्यथा अवहतेस्तंदुलीभावं पिष्टेश्चूर्णेनं न त्ववहतस्य तंदुलीभावश्चूर्णेनं च॥ अन्नानामान्येतानि तत्रैवां भेदा
द्विकारपृथक्त्वं प्रयुज्यते। तस्मादेवं नामानि तत उत्तरं पठति॥ ॥ साम्नोभिधानशब्देन प्रवृत्तिः स्यात्पृथग्भा
वित्वमिति॥ ॥ साम्नोभिधानशब्देन पृथक्त्वाद्विशेषव्रवृत्तिः स्यात्पृथक्क्षिप्रप्रवक्तृभिः शिष्येभ्यः। किंवद्विशेषस्तोभा
दिविशिष्टा अनृक्सामसामवर्तते। किंकारणं तस्मा रथंतरादिनामभेदेयमिति॥ ॥ अत्रैकत्वं विधित्वाद्यर्थांतरे
प्रवृत्तिः स्यात्पृथक्त्वात् आलिप्यावाहतमित्ससंबंधः॥ ॥ तु शब्दः पक्षं निवर्तयति नत्वेवं स्याद्यचः प्रवर्तेरिन्निति कथमित् उक्तं ती

विष
अथ
राम
१०

विलाप्यतेच्छ्वागामानयतिइह कुशाद्रे एवकार्ये सं भवति नार्थे अतोत्र शाद्ध विद्वास्याम ॥२

धारत्वारं कवतीषु प्रयुंजीत कवतीरथंतरशब्देनाभिलपेदिति किं कारणं शब्द उच्चरिते तत्र तावन्मुख्या
प्रतिपत्तिः शब्दैकार्यस्यासंभवादर्थैकार्यं नोत्पत्तिकत्वात्॥ पूर्वस्मादेषवादः पापीयान् कस्मादौत्पत्तिकत्वात्
औत्पत्तिको हि नामिनाम्नोः संबंधः यः शब्दो यस्मिन्नर्थे औत्पत्तिकेन संबंधेन प्रसिद्धो न स ततोन्यत्र प्रत्याययितुं
शक्नोति न हि गोशब्देनाश्वोभिधातुं शक्यते॥ नास्त्वेवमनर्थकं स्यात्॥ एवं च सति शब्दस्य मनर्थकं स्यात्तत्र
वाक्यार्थत्वात्तस्मात् शब्दस्यापि प्रदेशो युक्तः इति कारस्तु मे नेगानशास्त्रमौ किं समनर्थकं स्यादिति तस्याभिप्राय
सत्संगतो नेतावान्प्रयासः शिष्टानामफलोभ्युपगंतुं न्याय्य इति स्वरस्येति चेत्॥ इति चेत्तत्र पसि नाम्नोति दृष्टो यु
क्त इति तेन तर्हि स्वरस्यातिदेशो भवतु स्वरः सामशब्देन लोकेभिधीयते सुसामा देवदत्त इति सुस्वरो देवदत्त इति स्व
रो घोषो नाद इति समानार्थाः स सामशब्देनोच्यते साम च रथंतरं तस्मात्तस्यातिदेशः॥ नार्थाभावात्तु तेन संबंधः॥
नैतदेवं स्वरस्यातिदेश इति कुतः अर्थाभावात् अर्थस्याभावात् स्वरस्य कवतीषु अभावात्। नन्वसत्त्वे वासौ वतिदेशेन राम
भावते उच्यते भावयितुमपि न शक्यते न हि भिवत्पक्षराणामभिव्यंजको नादः कवतीषु भावयितुं शक्यः यदि शक्येत न ११

कवतीभवेत्पुनश्चेज्ज्ञायेतेर्नभूतः कवतीषु रथंतरं गायतीत्येतस्याः श्रुतेः पदांतरेणाभिसंबंधो न स्यात्तस्मात्
स्वरस्यातिदेशः॥ स्वरस्तत्रिषु स्यान्मात्रावर्णविभक्तत्वात्॥ तुशब्दः पक्षांतरपरिग्रहे ह्ययमभिवतीस्वरस्य कव
तीषु प्रदेशो नोपपद्यते अनुवादो भवतु कवतीषु रथंतरं गायतीति कथं तदुच्यते इह कवतीषु रथंतरं गायतीत्यस्य वाक्य
स्य द्वयं न व्यक्तीभवतः कवतीषु यद्रथंतरं तद्गायतीत्येकार्थः रथंतरं यत्तत्कवतीषु गायतीत्यपरस्तयोरेषा द्वितीया ६
रथंतरं यत्तत्कवतीषु गायतीति तस्य स्वरस्य सामत्वेन संभवतीत्युक्तेनाभिवतीस्वरः कवतीषु समावेशयितुं शक्य
इति स्वर्वत्तु संभवति कवतीषु यद्रथंतरमिति नन्वसावपि न संभवति न हि कवतीषु रथंतरमस्ति अतः परमुच्यते स्व
रस्य तत्रिषु स्यात्॥ स्वरस्त्वभिवतीस्वरः कवतीनामुत्तरिष्वक्षरेषु स्यात् कथं मात्रावर्णविभक्तत्वात् च क्वेमात्र
वर्णाश्चाभिवतीनां कवतीनां च विभक्ताः अभिवतीष्वपि विद्यंते कवतीष्वपि सोसावभिवतीस्वरः कवतीषु साधारण
वर्णसामवत्तो विद्यते तस्यानुवादोयं घटते कवतीषु रथंतरं गायतीति तस्मात्स्वरस्यानुवादः॥ लिंगदर्शनाच्च॥
लिंगं च दृश्यते एतस्मिन्नर्थे [struck] न नयोनेपद्रामीति वसिष्ठ इति पश्चाद्विधमानं नन्दप्पतेतद्दर्शनाय मले
रथंतरं उत्तरयोरिति। किं तल्लिंगं भवति एवमाह रथंतरमुत्तरयोर्न परिणामीति विश्वामित्रस्तापस्तेपि
इह तु [struck] ॥१०

क्रियते यथा घटं न पश्यामीति प्रदीपं करोति न चाग्निविषाणं न पश्यामीति तस्मादस्युत्तरयो रथंतरं बृहच्च
...नुवाद इति॥ अस्ति तु स्वविकारस्योत्तरासु यथाश्रुति॥ नुत्तरः प्रत्ययार्थं तेनैतदेवं स्वरस्यानुवाद इति कु
तः कृत्स्नमुत्तरासु विकारो न कश्चिच्छ्रुतो भवति तदा उत्तरायथाश्रुति। अयोक्त्वा: यथास्तोत्रीये काले श्रुतास्त्वरथं
तरमुत्तरयोर्गीयते तेन तदनुवादमात्रम् अप्रत्यक्षविशेषकरमनर्थकमेवापद्येत श्रुतानस्वरस्यानुवादोऽप्ययुक्तः। शब्दा
नं वासामंजस्यं। रथंतरादीनां वसाम शब्दानामसामंजस्यं स्यात् रथंतरं योः बृहदुत्तरयोरिति कथं तदुच्यते अयं रमुत
रथंतरशब्दो बृहच्छब्दो वा स्वरसामशब्दः स्वरसमुदाये अन्वर्थ्या वर्तते स्वरविशेषप्रयुक्तः स एकदेशाभिन्नानु
र्लेवासमंजसो भवति। तस्मान्नैतत्पुनः स्वरस्य सामशब्दः तस्य वानुवाद इति। अत्राहैवं भवतां सर्वे पक्षा निरूढास्ततः
किम् अप्रवृत्तिरेवेति उच्यते स एवमभ्देशो भवतु नामानेन शाकान्तरेण प्रदेष्टुमिति। वाक्यदेशलक्षणम् भविष्यति कव राम
तीषु रथंतरं गायतीत्युच्यते न च शाकास्ते कवतीषु रथंतरं गानुतन्त्रदेशलक्षणं भवति कवती देशलक्षणं भवति कव १२
तीदेश इति। यथा गोतिष्ठति कूपे तिष्ठतीति धर्मेलक्षणं वा स्यात् रथंतरधर्मा वा कवतीषु रथंतरशब्देनातिदिश्यते

भक्तिप्रथ...वारनहि ३

षु रथंतरं गायतीति कवतीनां वाक्यार्थे अभिवत्स्यतीतिदिश्यते न कवतीनां चोपपद्येयमावेन तत्र कार्यं तावदिति
न मघटवेकृतः शब्दैरर्थविधिलात् शाष्टानामर्थविधानं कार्यं न च कवतीषु रथंतरं गायतीति कवतीभिर्ये
र्ये भिधीयते तमभिधीयते तमभिवत्सः शक्तिर्वतिवल्लं तस्मान्न क्रायीति देशः आग्नेय ते पिन संदेशः शास्त्रम
वेति स्थगेवावतिष्ठते अभिवाक्यानां इति क्रियायाहिण न क्रियायाः शाष्टेनाभिसंबंधोभवेन्न शास्त्रस्यातं देशाति स्मा
देशः अतो नायमस्वः प्रदेश इति॥ ॥ स्वार्थं वा स्यात् प्रयोजनं क्रियायास्तदंगभावेनोपदिश्येरन्॥ ॥ स्वार्थं वा भव
न्माना अभिवत्सः कवतीनामंगभावेनोपदिश्येरन्। कथं पुनः कवतीषु गायतीत्यंगभावः शक्य उपदेष्टुं श
क्यो यथा येन कर्मणेत्सेत्तं जयां जुहुयादिति किं पुनः प्रयोजनं कवतीनामभिवत्स्यो निर्वर्त्यं इति उच्यते प्रयोज
नम दृष्टं कल्प्यं कुतः क्रियायाः॥ यस्मात् क्रियाश्रूयते कवतीषु रथंतरं गायतीति यथा प्रयाजादीनां प्रयोजनं क्रि
यायाः। उच्यते अयमेवास्मिन्पक्षे दोषो यत्प्रयोजनं क्रियायाः कल्पयितव्यं। तस्मादयमपि पक्षो दुश्लिष्टः। शब्दमा
त्रमिति चेन्॥ इति चेत् स्यात्पत्तिसिक्वतं गभावेनाभिवतीनामुपदेशो दुश्लिष्ट इति तेन तर्हि शब्दमात्रं प्रदिश्यतां र

यथा रथंतरे प्रस्तूयमाने पृथिवीमनसा ध्यायेदित्येवमादयः। यथा चार्ये प्रोषिते आचार्यानी भवतामाचार्य
इति आचार्यशुश्रूषा आचार्यान्यामिति दिश्यते। अपि वा कर्मशब्दस्यात्र चोदनार्थः प्रसिद्ध्यग्रहणत्वादधिकारेषु विशिष्ट
त्वः॥ ॥ अपि तु नैवं स्यादिव। सामशब्दस्तस्याश्च प्रदेशा इति तथा देशान्तलक्षणं धर्मलक्षणे वा अध्ययनीया अग
तिश्चैषा यल्लक्षणपरिग्रहः। किं तर्हि कर्मशब्दः स्यात् रथंतरादिगीनाख्यस्य संस्कारकर्मणो वा वक्तुः। कुतः। उक्तोन्या
योगीतिषु सामाख्येति तत्र गीति विशिष्टायामभ्येषशब्दो दृष्टः। न चान्यहीनविशेषणाविशेषबुद्धिरुत्पद्यते। तस्मा
द्विशेषस्याव दभिधीयते विशेषप्रत्ययाद्भ्य सहार्थे रिते विशिष्टप्रत्ययः। अतो नास्त्यपूर्वः शब्देनस्य शेष इति। तेनैव न्या
ये न गीतिनामधेयमिति ब्रूमः। किं वप्रसिद्ध्यग्रहणत्वादयं व गायतीति शब्दे गानक्रियायां प्रसिद्धः। क्वा पुनः स्तोभाद
सच्चारणविशेषः गायति गानं करोतीति तद्ग्रहणं रथंतरादिशब्दस्तद्वचन इत्यर्थः। न च अवमितितस्मा गीतिव
चनः। तेन सत्युच्चारणं द्वितीयासामर्थ्याद्वा यथा आसारितकं गायति वर्धमानं गायतीति। ननु शब्दवचनेनाभिसमु
च्चारणं भवति। गाथां गायन्नं व गायतीति सत्यं विपरिसम्मितत्वशब्दं गानेनत्त्वं संस्करोतीति यथा निपतितेन।

र्थेन न संबध्यते गानं करोति अवमिति । तस्माद्गीतिवचनः इतश्च गीतिवचनः कुतः विकारोह्य विशिष्टैः वि
कारस्यात्र अग्नेर्द्धस्यद्दृश्यते ऋक्षानामक्षराणां दीर्घतादीर्घाणं वक्रत्वं विवृत्तानां संवृतत्वं संवृतानां वि
वृतत्वं सो विशिष्टान्यैः संस्कारकर्मभिर्यथावहंतिनाव्रीहीणां तंदुलीभावः पिषिणां तंदुलानां पिष्टीभावः तस्माद्ध
ग्धानां संस्कारेणानाख्याः रथंतरादिभिः शब्दैरुच्यंते तस्मायं प्रदेशोऽरथंतरमुत्तरयोर्गायतीत्येवमादि ॥ अन्यद
वापि दृश्यते । अपि वा अन्यं साम दृश्यते अश्वत्राश्वमेधुदागे अत्त्वा चरति अन्यमन्त्रवमित्यर्थः अन्नेवं साम दृश्यते
प्रजापते हृदयमन्त्रवं गायतीति प्रजापति हृदयनामसाम तदन्त्र्यबुलान्नं यस्य विसामशब्दः कृथं प्रजापति हृदय
मन्त्रवं स्यात् अश्थगीतेः सामशब्दः ततो विनापि ऋचा गीतिर्भवति तत्रैतदुपपद्यते प्रजापतेर्हृदयमन्त्रवं ग
यतीति तस्माद्गीतिः साम । ननूक्तं संस्कारकर्मत्वेनर्थकी कर्मकाले प्रयोग इति । तत्र ब्रूमः । तस्य च क्रिया यह राम
णार्थानानार्थेषु विरूपित्वादर्थेत्यासामलौकिकोविधानात् । तस्य क्रियायाः कर्मकाले यद्ग्रहणार्थो विशिष्टिनु मन्य १३
सिनुं वना नार्थेषु नानाभूते तेषधर्थेषु भिन्नेषु तापर्थः विरूपित्वादाश्रयभे । दानविविधरूपं तज्ज्ञानं भवती । तस्मद

सिद्धिस्तथमस्य सिः तदेवं प्रयोगप्राशुनावायत्तूभिरथिकवत्तयथा तूभिरथिको भूमौ रथमालिख्य योग्यां
करोतिसा तस्य योग्या प्रयोगकाले सौकर्यमुत्पादयति अर्थोऽस्यास्तु रथंतरादिसंज्ञानां नालौकिके व्यवहारे सिद्धे
यथा वहत्यादीनां कुतो विधानाद्दिवीय तेषु सौ चिख्यापायसंबंधेन एवं रूपं रथंतरं भवति तिनलौकिकतो वि
ज्ञायते तस्मान्न पर्यवेदनैषामकर्मकाले प्रयोगादिति। अथ यदुक्तं संज्ञा पृथक्त्वादिति तत्रोच्यते उक्तः तस्मिन्सं
ज्ञाविशेषः सुविकारपृथक्त्वात्॥ तस्मिन्नेव तस्मिन्न पिगानाख्यसंस्कारे संज्ञाविशेषा भवेयुरुक्तः विकारपृथ
क्त्वेऽन्तुल्येपिगाने विशेषो भवति गानविशेषाच्च संज्ञापृथक्त्वं आसारितको वर्धमानक इति अन्यथालक्षणं आ
सारितकगीतिः अन्यथालक्षणं वर्धमानकगीतिः एवमिहाप्यन्यथालक्षणं रथंतरगीतिरन्यथालक्षणं वृह
द्गीतिः तस्मात्संज्ञापृथक्त्वं। यो निश्वासस्तुल्यवदितराभिर्विधीयते। यो निश्वासोऽश्रास्याव यो निश्वासायो निश्वास्या
श्चत्वः तुल्यवदितराभिर्यो निश्वासाभिर्विधीयंते यास्मात्रांसतिशि पिविष्टवतां त्रांसनिरथंतरस्य यो निमत्र
त्रांसतिरहतो यो निमन्त्रांसतीति। क्रोचन्तुल्यतात्रांसतित्वाद्वेना भियाने। इहैतौस्तौ ति त्वां त्रांसतित्वाद्वै समानै।

आभ्यासं

रा३

स्तुतथर्लिवमवस्थितविषयोप्रगीतेषु मंत्रवाक्येषु स्तौतिशब्दः प्रगीतेषु शंसतिशब्दः यथा प्रउगं शंसति नि
ष्केवल्यं शंसतीति आज्यैः स्तुवत इति अतः शंसतिशब्देन विधानादप्रगीतानां रथंतरस्य योनिं दर्शयति यदि
गीतिः रथंतरं ततस्तस्यां प्रगीतायामृच्यनिरन्यथायं एव्यपदेशो नोपपद्यते रथंतरस्य योनिमिति तस्मात् गीतिषु साम
ख्या।। ।। अयोनौ चापि दृश्यते अतथायोनि अयोनौ च साम दृश्यते तस्यां सत्यां सैव धीयत इत्या उपवृहद्गायत्रीषु क्रि
यते पिबेमां रुजंति नवास्यां संभवतीति वृहतो बृहती योनिस्तस्य गायत्रीषु प्राप्तिर्नास्ति पृथक् च साम शब्दः अथ
तु गीतिस्ततः सा बृहद्गीतिर्गायत्रीषु वचनात् प्राप्ता सा च यमनुवादो घटते यद्बृहद्गायत्रीषु क्रियत इति अत
अयोनि च साम दर्शयति यादृशी यस्य योनिस्ततो न्यूनादृशी या वैविध्यं दर्शयति साम्नो गीतिः सत्यत्वं संपूर्णत्वं तिस
मदर्थं वलिश्चातिसाम संपूर्णा अत्र विविलिरानीतिपत्तरदृष्टसीयतास्य विलक्षीयत रक्षणं यस्तस्माच्च रत्न वगीतावे
वसाम्नि प्रयुज्यते उहतिशब्दस्य गीतावेव समर्थः सामशब्दः ऐकार्थ्येनास्ति वैरूप्यमिति चेत्।। ।। यदुक्तं तस्य क्रि राम
यायहृणार्थं क्षित तत्र परिवोधयते ऐकार्थ्यं नास्ति वैरूप्यमिति रथंतरं बृहत् शिरथितरं तेन रथंतर गीतो गृहीत १४

गीते

ग्निहोत्रशब्दश्चिंत्यते कथमयं प्रयुक्त इति तदर्थमारभ्यते ॥ ॥ उक्तं क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशः ॥
स्यात् ॥ ॥ उक्तमादौ क्रियाभिधानं कर्मनामधेयमग्निहोत्रशब्द इति तत्प्रख्यं चान्यशास्त्रमित्यत्र तस्मान्न श्रुतौ
कौण्डपायिनामयनेन जुहोतौ विधिप्रदेशः स्यात् धर्मप्रदेशो नैयमिकस्याग्निहोत्रस्य ये धर्मास्तेस्मिन्ननेन नाम्नाति
दिश्येरन् किं कारणं उच्यते परशब्दत्वात् परत्वेन परशब्दस्य परत्वं कौतस्कुतो वा गम्यते यत्र विहितो भवति त
त्रानुवदनेन यथा सिंहो देवदत्त इति यत्राविहितस्तत्र विधीयते यथा मीपिष्टपिंडः सिंहः क्रियतामिति । उद्धवादि
तत्तोस्य जुहोते रग्निहोत्रवच्छ्राव ॥ ॥ तस्मात्स विधीयते तस्मात्समग्निहोत्रं जुहोतीति अग्निहोत्रवत् जुहोतीति कथं
पुनरसति वतिप्रत्यये वत्यर्थः शक्योवगंतुमिति उच्यते साहचर्यात् अग्निहोत्रशब्दोयं कर्मणा संबद्धस्तत्कर्मवि
तदोहनादिधर्मवत्त्वात् लक्षणया शक्नोति गमयितुं शक्नोति क्रमयितुं प्रदेष्टुमपि शक्नोति एवमंतरेणापि व
तिं वत्यर्थः शक्योवगंतुमिति ॥ ॥ अपूर्वे वापि भागित्वात् ॥ ॥ वा अपीति विपर्यासेन प्रयुक्ते अपि वेत्यर्थः ॥ अपि राम
वा अपूर्वे एते उभे अपि कर्मणी स्यातां न कौण्डपायिनामयनीयं जुहोतिर्नैयमिकपूर्वः ॥ साधारणं च नामधेय १५

मुभयोः कुतो भागित्वात् अयमपि जुहोतिर्भागी एतस्य नामधेयस्य यथैव तत्राग्निहोत्रं जुहोतीति समुच्चारण
मेवमिहापि तत्तुल्यसमुच्चारणे तस्यैव तन्नामधेयं नास्येत्यत्र विशेषहेतुर्नास्ति तस्मादुभयोः साधारणं ना
मेति नास्ति धर्मप्रदेशः नेन घुलं कुतः नाम्नस्त्वौत्पत्तिकत्वात् ॥ औत्पत्तिको हि नामिनाम्नोः संबंधो यन्नामय
स्मिन्नर्थे औत्पत्तिकेन संबंधेन प्रसिद्धं तस्मिन्नेव सदा विज्ञेयं नान्यत्र । तथा अव्यवस्थायां शब्दार्थाभ्यासो न स्यात् ॥
उक्तमन्यायश्चानेकार्थत्वमिति यदा चनोभयार्थस्तदा नैयमिकं तावदाह । तस्मिन् रूपविधानार्थे वेतरत्रापि प्र
योग उपपद्यत इति नास्तीतराभिधानत्वे हेतुः तस्माद्विधिप्रदेशः स्यात् अत्राह कस्मात्पुनस्तन्नामधेयमिदमि
प्रयुक्तमित्युच्यते न पुनरेतन्नामधेयमयं तत्रेति तत आह । प्रत्यक्षाद्गुणसंयोगात्क्रियाभिधानं स्यात्तदभावेप्रसिद्ध
स्यात् ॥ नैयमिकेग्निहोत्रे प्रत्यक्षो गुणसंयोगः प्रत्यक्षविहिता धर्माः संति उक्तं दोग्धीत्येवं प्रपद्यति वत्सरूपं त्वयति
एवादिर्यदग्निहोत्रसमिद्वति त्वं जुहोति संप्रत्यक्षो गुणसंयोगान्नैयमिकस्यैतन्नामधेयमिह प्रयुक्तमि
नंदोहना द्विक्रियाभिधानं स्यात् धर्मप्रदेशकमित्यर्थः ॥ अस्य पुनर्जुहोते नैके विद्धर्माः संति तदस्यावेतेषा धर्म

नमावेऽप्रसिद्धत्वान्न प्रज्ञायेत किमर्थमयमग्निहोत्रशब्द इह प्रयुक्त इति एवं वा प्रत्यक्षो गुणः संयो
गेनैयमिकस्य द्रव्यदेवतासंयोगोऽग्निहोत्रे अग्नये च प्रजापतये च सायं जुहोति तस्मात्प्रत्यक्षो गुणः सं
योगात् क्रियाभिधानं स्यात्। कर्मनामधेयं इत्थं रूपो जुहोतिः अग्निहोत्राख्य इत्यथेतरज्जुहोतेरूपं नास्ति
दभावेऽप्रसिद्धत्वान्न ज्ञायेत कीदृशं तदग्निहोत्रमिति। ननु मासोऽस्य रूपं भविष्यति न मासः कर्मांगं कर्तृ
धर्मः सोऽपि वाग्निहोत्रं समं मासे विधीयते न मासेनाग्निहोत्रं रूप्यते। तस्मान्नैयमिकस्यैतन्नामधेयमि
त तरन्नेदृदति देत्राइति। किमस्योत्सर्गः सर्वं कर्मनामान्यत्र श्रूयमाणं धर्माणां ग्राहकमिति एवं खल्वप्रा
प्तं एवं प्राप्त इदमारभ्यते॥ ॥अपि वा सत्कर्म तद्गुणार्थेष्वाश्रुतिः स्यात्॥ ॥गवामयने श्रूयते वैश्वानरोऽग्नि ते
ष्टोमः प्रायणीयमहर्भवतीति अस्ति तु द्वादशाहे प्रथममहः प्रायणीयं नाम प्रायणीयोऽतिरात्र इति तयो
र्नानात्वे तेनैव न्यायेन सिद्धं प्रकरणं तेर प्रयोजनानानात्वमिति तत्रायं प्रायणीयशब्दः परत्रापि श्रूयमाणो राम
न धर्माणां ग्राहकः किं तर्हि गुणार्थेष्वाश्रुतिः॥ कथं लक्षणया नामधेयं धर्माणां ग्राहकं न तु कर्मसति ववश्रूत १६

यां रहृति रग्रहीता भवतीति युक्तो रथंतरेण गृहीते कृतः शिक्षार्थमकर्मकाले प्रयोगः रथंतरगीते स्वक
एवार्थस्तस्य येन्तो प्रयोगो शिक्षितपुनरुत्तरस्मिन्निश्चितव्यत्ररमकालप्रयोगः संस्कारकर्मलेन युक्तो भवे
तस्मान्न संस्कारस्य सामशब्द इति शिक्षितायो प्रतिज्ञायास्त्वेण परिवादयति। स्वार्थतिर एव निष्यते यथाप
कस्यादेरूपं कुतः एतस्थांतरेण निष्पन्नं गतेरस्याश्रय भेदात् यथापाके यथा एक एवायमर्थः पाको नामत
स्यार्थतरे वरूपं भवति अन्यथा लक्षणं ओदनस्य पाको न्यथा लक्षणं गुडस्य येनोदनपाकोऽपहीतो नास्ता
वशिक्षिता गुडपक्तृजाना इति तस्मात्तस्यापकर्मकाले प्रयोग उपपद्यते। शब्दानां तु सामंजस्यं। एवं च सा
मशब्दानामृक्शब्दानां च सामंजस्यं भवति कवतीषु रथंतरं गायतीति कवतीशब्दश्च एव वक्ष्यति रथंतरशब्दे
असामतरथा कवतीशब्दवाच्यत्वं लक्षणस्याद्रथंतरशब्दे बाधमेलक्षणं तस्मात् गीतो सामशब्द इति॥ ॥इति
वरेमाप्येस तमस्याध्यायस्य द्वितीयः पादः॥ ॥नाम्नां धर्मप्रदेशो वक्ष्याम इत्यादौ प्रतिज्ञातं सोऽयमुच्यते। कुंडपायि
नामयने श्रूयते मासमग्निहोत्रं जुह्वतीति तत्र तत्स मधिगतं नैयमिकादग्निहोत्रात्कर्मांतरमेतदिति अधुनाऽ

इति लिंगात्॥ लिंगं चैतमर्थं दर्शयति पवमाने रथंतरं करोत्याभवं बृहन्मध्ये उत्तराणि वै रूपं होतुः सामवैरा
जं मैत्रावरुणस्य रैवतं ब्राह्मणाच्छंसिनः शाक्वरमच्छावाकस्येति विनिवेशं परे वाकेषा उदिकानि पृष्ठानि दर्श
यति। उक्थ्याग्निष्टोमे॥ ॥ अथ यदुक्तमस्ति वचनं पृष्ठशब्द इति तत्र ब्रूमः न त्वेष श्रोत्यन्ते रूपः पृष्ठश
ब्द उत्पन्नानां स्तोत्राणामसावधिकारो यान्येतानि पृष्ठानीति। तानेव तेषां पृष्ठत्वे सति तदुपपद्यते न च तत्र तानं कथं
तर्ह्ययमनुवादो लिंगसमवायात् एवं तत्र पृष्ठं माहेन्द्रस्तोत्रमिति षाडहिकानां पुनः पृष्ठत्वं तानं कथं तत्र हि चोद
ने मुक्ते। तेषां वादेशो तः पृष्ठशब्दस्यार्थः परिगृहीतो भवतीति रथन्तरबृहतोर्ण कस्तस्मात् षाडहिकानां प्रदेश इति
द्वयोरिति चेत्॥ इति चेत् उपसि षाडहिकानां पृष्ठानां विधिरिति। नैतद्युक्तं किं कारणं द्विन्नर एवं सर्वपृष्ठशब्दोऽभ्युपग
म्यते पृष्ठानि वचिरयाति तेषां वसर्वत्वं। अस्तु को दोषः असंभवः स्यात्। यदि पृष्ठशब्दः पृष्ठानि विदध्याति सर्वत्र
वचनेन शक्यते विशेषयितुं। अथानुवदतीति तथा शक्यते पृष्ठानि विहितानि भवंति तेषु सत्सु कृत्स्नं सर्वत्वं विधी
यते। उभयक्रियायाश्चासंभवः॥ अथात्र रथंतरयोर्विकल्पेन प्राप्तयोः सामस्त्येन वलं विधीयते सर्व साम १७

षो भवतीति उभे अपि बृहद्रथंतरे भवतो नैकमिति तत्रोयं दोषो न भवति तस्माद्द्वयोरधिकारः॥ ॥ नवार्थत्वा
त्सर्वशब्दस्य॥ ॥ नैवमेतत् कुतः अर्थलात् सर्वशब्दस्य एवं सति सर्वशब्दो व्यर्थो भवति अर्थशून्यः अयं हि व
कुविषयो द्वयोर्न युक्तः षाडहिकानां तु विधाने नैष दोषः नन्वेवं तत्रापि द्विकरः शब्दो भविष्यतीति उच्यते सर्वत्वं केव
लं पृष्ठानां विद्यासति न पृष्ठानि निर्वर्त्यन्ते पृष्ठेषु सत्सु कृत्स्नं सर्वत्वं विधीयत इति। उच्यते पृष्ठानां सर्वत्वं हि
सं हितं तेन पदर्थितं येन वचनेन पृष्ठानां कुर्वतां तत्संपादयितुं शक्यते तत्र अर्थात् पृष्ठानि करिष्यति एवं नवार्थः शब्दो भ ध्य
विष्यति सर्वशब्दस्य समर्थितः तस्मात् षाडहिकानामतिदेश इति॥ ॥ तथा वरुणप्रघासेषु ॥ ॥ वरुणप्रघासेषु
श्रूयते वारुण्या निष्कासेनानुषेषग्नी वभृथं यन्तीति तत्र संदिह्यते किं दार्शपौर्णमासिकेऽवभृथे निष्का
सं विधीयत उत सौमिकादवभृथाद्धर्मातिदेश इति। किं युक्तं दार्शपौर्णमासिकेऽवभृथे विधिः एवं सन्निहितः प्रकृत
योऽनुगृहीतो सन्निहितो हि सौमिकेन प्रापितः ननु नासौ वभृथः। उच्यते अस्ति तत्राप्यवभृथशब्द इति एषु वेद
दर्शपौर्णमासयोरवभृथ इति एवं प्राप्ते वदामः तथावभृथः सोमात् यथा षाडहिकानां पृष्ठानामतिदेशः एवं सौमिको

दवत्स्यादिहधर्मातिदेशः कुतः अभिहितान्वायः उक्तं क्रियाभिधानेन श्रुतानन्यत्र विधिप्रदेशः स्यादिति प्र
तेरितिवत् ॥ अथ यदुक्तं दार्शपौर्णमासिकेनवमध्ये गुणविधिर्भविष्यतीति तस्य कः परिहारः अनाषांतरत्वं ॥ ॥
नमभितात ॥ ॥ नैतदुक्तं कुतो यतो नास्ति दर्शपूर्णमासयोरवभृथः ॥ नन्वेष वै दर्शपूर्णमासयोरवभृथ इति
श्रूयते तेनत्वमवभृथत्वमस्य भवति कथं । उच्यते एष वै दर्शपूर्णमासयोरवभृथ इति एतस्य वाक्यस्य द्वयी वचनव्यक्तिः
निर्ज्ञातावभृथत्वस्य वैदर्थिस्य पदार्थस्य दर्शपूर्णमाससंबंध उच्यते यथा देवदत्तो यज्ञदत्तस्य पुत्र इति निर्ज्ञातपुत्रत्व
स्य देवदत्तस्य यज्ञदत्तसंबंध उच्यते निर्ज्ञातसंबंधस्य वा निर्ज्ञातावभृथत्वस्यावभृथत्वं यथा अयमाम्रो यज्ञदत्तस्य
पुत्र इति निर्ज्ञातयज्ञदत्तसंबंधस्याम्रस्य पुत्रत्वमुच्यते उतरस्यां पादविपुल्ये कः सः दर्शपूर्णमाससंबंधः प्रकरणं
निर्ज्ञातो नावभृथत्वमतोस्यावभृथत्वमुच्यते नायमवभृथः ॥ नन्वयमप्यवभृथो भवतु । नैतदुक्तं अनाये राम
नकार्थत्वं । कथं तर्हि शब्दप्रयोगः सादृश्यात् । किं सादृश्यमस्य संबंधः स एष भक्त्या प्रशंसावादः देवमुत्सेकः स्यादव १८
भृथ इवायमिति । यथामेपुत्रवा दत्तस्मान्नास्ति दर्शपूर्णमासयोरवभृथः अतो नात्र गुणविधिः ॥ ॥ लिंगसूत्र ॥

दर्शेना ९

एवं संभवति गुणार्थ एव शब्दो

र्थलक्षणार्थे याग इहतु श्रुतार्थ एव गुणेन क्रियायोगेन तस्मिन्कर्मणि श्रुत्यैव प्रयुज्यते प्रयत्नेनेति प्र
यणीयं प्रवर्तितेनेन स चरुरिति वाक्यशेषश्चास्यैतमेवार्थमाह ज्योतिरेव पुरस्ताद्दधातीति येन ज्योतिः प्रायणीयं
भवति तत ज्योतिः पुरस्तात्क्रियते इत्यर्थः ज्योतिरेव पुरस्ताद्दधातीति आम्नायमतिदेशः ॥ २१ ॥ विश्वजिति
सर्वपृष्ठे तत्पूर्वकत्वात् । ज्योतिष्टोमिकानि पृष्ठानि अभिप्रायपृष्ठशब्दः ॥ विश्वजित्सर्वपृष्ठो भवतीति श्रूयते तत्र
विचार्यते किमयमनुवादो विधिरिति । किं प्राप्तं अनुवाद इति । कुतः योयं सर्वपृष्ठस्तस्य सर्वपृष्ठता विधेया भव
सर्वपृष्ठ एव तस्यतया किं विहितया अयं वा सर्वपृष्ठ एव । कथं तत्पूर्वकत्वात् । ज्योतिष्टोमपूर्वकत्वात् ज्योतिष्टोमिका
नि स्तोत्राणि अत्र प्राप्यंते तेषु महिंमस्तोत्रादीनि वत्सारिसंति तानि सर्वाणि एषस्य तेरथंसर्वपृष्ठो भवति न्वनूतानि पृ
ष्ठानि उच्यते अभिपृष्ठशब्दः स षडशा निपृष्ठानीति । तस्मादनुवादः एवं प्राप्ते ब्रूमः चोदना नायमनुवादः कि
तर्हि विधिः अनुवादे प्रवृत्ति विशेषकरोनर्थकः स्यात् । अपि वा ज्योतिष्टोमेन पृष्ठवत्त्वमस्ति यस्मायमनुवादः
स्यात् षडहे तत्र दृष्टिततत्र हि चोदनाः पृष्ठानां रथंतरपृष्ठो भवतीत्येवमाद्याः तस्मात्षाडहिकानामतिदेशो वि

लिंगं नैतमर्थं दर्शयति किं लिंगं भवति एवमाह नाप्सु रज्जु होतिन सामर्थ्यं (गा) यति नवा ध्वंगमम मंत्रं स्तुपनीति सेपमि
क्रावभृथधर्माणां प्रतिषेधं त्रुवन्त्स्तु कर्मप्राप्तिं दर्शयति तस्मात्सौमिकादवभृथात्कर्म प्रवेशादिति ॥ ॥ द्रव्यादेशे तद्द्रव्यः ॥
श्रुतिसंयोगात्पुरोडाशस्त्वनादेशे तत्प्रकृतित्वात् ॥ वारुणप्राघासिकोऽवभृथः सौमिकादवभृथात्कर्माण्याहरन्ति तु
सुक्रांतत्वेदर्विस्पते किं पुरोडाशद्रव्यकोऽप्सावुत तुषनिष्कासद्रव्यक इति किं प्राप्तं पुरोडाशद्रव्यक इति कुतः नाम्ना पुरो
डाशः प्राप्यते। ननु प्रत्यक्षं तं तुषनिष्कासं प्रत्यक्षं तं न तु शक्यते विधातुं त्र्यवभृथे न विधीयते त्र्यवभृथं यंत
नः यदि तुषनिष्कासमपरं विधीयते ततो वाक्यं भिद्येत त्र्यवभृथं यंति न तु तुषनिष्कासेनेति निष्कासस्य च वरुणाभिदानी
क्रिमर्थमनर्थकं संबंधो नावादे वप्राप्ते ब्रूमः द्रव्यादेशे तद्द्रव्यः द्रव्यादेशे एतस्मिंस्तुषनिष्कासेनावभृथं यंतीति तद्द्रव्यः
तुषनिष्कासद्रव्यः कुतः श्रुतिसंयोगात्तुषनिष्कासं प्रत्यक्षं तं पुरोडाशस्त्वानुमानिकोऽतिदेशेन प्राप्यते नन्वपु
रोडाशोऽपि प्रत्यक्षः नाम्ना यद्यपि प्रत्यक्षः सामान्येन न तु प्राप्यते तुषनिष्कासं तु विशेषेण बाध्येत न सामान्य
विशेषेणवश्यापि च लक्षणया पुरोडाशो गम्यते श्रुत्या तुषनिष्कासः श्रुतिः लक्षणायाश्च बलीयसी तस्मात्तुषनिष्का

सद्यस्क इति अथ यदुक्तं न संबध्यते वत्सत्येन तुषनिष्कासं वाक्यभेदप्रसंगादिति तत्र ब्रूमः यद्यपि तव्वत्सस्य विधा
यत्तुषनिष्कासं विधीयते ततो वाक्यभेदः स्यात्तुषनिष्कासद्रव्यके पूर्वोक्तं भ्यभ्याधते तथा सगुणकर्मविधान
मविरुद्धं विधीयमाने तुषनिष्कासे तद्ग्रहणमनर्थकमेव स्यात् तस्मात्तुषनिष्कासद्रव्यकः पुरोडाशस्त्वनादेश्यः
त्वत्यहतिलाघवमयत्नसहकृतं न द्रव्यं स्यात् ततः पुरोडाशास्तत्य इति लोकात् स्यादत्र तु प्रत्यक्षश्रुतं तुषनिष्कासः तस्मा
न्न पुरोडाशः ॥ ॥ आतिथ्ये श्रूयते वैल्वो नवकपालो भवतीति तथा राजसूये पूर्वस्मिन्स्त्रिसंयुक्ते वैल्वस्त्रिकपा
ल इति तत्र विचारः पायं त्रिसंयुक्ते वैल्वस्त्रिकपाल इति वैल्वत्वादयमातिथ्यो धर्माणां ग्राहकः नेति किं युक्तं ग्राह
मर्भके ४ क इति कुतः विहितधर्मकस्य भिन्निदृष्टः ग्राहको नास्मिन्नविहितैः श्रूयमाणे ग्राहक इत्युत्तरकाले क्रियाभिधानमित्य
त्रायमप्यविहितधर्मक आतिथ्ये दृष्ट इदानीमविहितधर्मके त्रिसंयुक्ते दृश्यते तस्मात् धर्माणां ग्राहक इत्येव याम
प्राप्ते ब्रूमः गुणानिविस्तुनग्र मात्समत्वात् ॥ ॥ गुणविधिरयमातिथ्यस्य गुणं विल्वदेवतासंयोगो विरुद्धातिस १९
एष धर्मान् चरतीति न शक्नोति कुतः समत्वात् सोमयामातिथ्ये त्रिसंयुक्ते वध्यात्र विल्वदेवतां विरुद्धात्वं वत्रापि

ध्य९

कृतपर्थासंभवाद्विलक्षणया धर्माण्याहरूः । कल्पते उ हवप्रत्यक्षात्कृतपर्थ एव भवति देवताविधिस्तस्मान्नायं याह
कृ इति ॥ ॥ निर्मथ्यादिषु चैवं ॥ ॥ पञ्चावत्तीषोमीये धर्मे वाल्मिर्मथ्ये ग्निराम्नातः । साध्या वै देवा रत्तारम्भा ग्नेस्त्रियते निर्म
थ्येन ष्टकाः पचंतीति ॥ तथा दर्शपूर्णमासयोर्बर्हिराज्ये धर्मवतीप्र्यौ सोप्य्रूयते बर्हिषा पूर्णाद्दं टमव स्तृणंतीति आसेनप्र
पमन क्रीतित्तत्र संदेहः । किं निर्मथ्यादयः शब्दः धर्माण्याहरूकाने तितत्राभिकरणाति रेत्राः । क्रियते निर्मथ्यादिषु चैवं
यथा वै लवराद्वेत्र चाप्ययं यौगिको निर्मथ्यशब्दः । सद्यो निर्मथितमग्निमाहुः तथा वर्वहिराज्यमिति दम शब्दौ तत्र यो
पिस्वार्थं विधाय कृतार्थौ भवंति धर्मान्न्य हीतुं न कुर्वंति तस्मान्न याहकाः ॥ ॥ चातुर्मास्येषु श्रूयते द्वयोः प्रणयंतीति तस्माद्वा
ध्यामेतीति अस्ति तु सोमप्रणयनं धर्मवत् तथा दर्शपूर्णमासयोरधर्मकं तत्र संदेहः । किं सौमिकमेतत्प्रणयनं उत दार्शपौ
र्णमासिकमिति तत्र सूत्रे पूर्वोपक्रमः ॥ प्रणयनं तु सौमिकमवे... ॥ ॥ सौमिकमेतत्प्रणयनं कुतः कारणं अवाच्य हि
तरथा दर्शपौर्णमासिके वादकेन प्राप्तत्वात् । कथं पुनरयं प्रणयंतिशब्दः प्रणयनमात्रवचनः सन् सौमिकं प्रणयनं विशे
षशक्नोति वक्तुं लक्षणयेति ब्रूमः । तीर्थशब्दवत् । तद्यथा तीर्थशब्दस्तीर्थमात्रवचनः संस्तीर्थविशेषं धर्मसाधनं कुरुवि

द्वैतंतीर्थयात्रांगतइति।उत्तरवेदिप्रतिषेधश्चतद्वत्।नवैश्वदेवउत्तरवेदिमुपकिरंतिनशुनासीरीयइतिप्राप्ति
पूर्वकोहिप्रतिषेधोभवतिसौमिकेवप्रणयनउत्तरवेदिर्नदार्शपौर्णमासिके।प्राकृतंवानामत्वात्।प्राकृतंवैतत्प्रण
यनंदार्शपौर्णमासिकेकृतः।अनामत्वात्प्रणयनस्यार्थः।सौमिकस्यप्रणयनस्यननामधेयंनैतत्तस्यैवावयवमित्यर्थः।यद्य
पितस्यावयवःस्यात्तत्तस्तदिहभूयादिदंतुपदार्थनामधेयंपदार्थस्यप्राकृतप्रणयनस्यावयवंततदिहदृष्टान्तोत्पत्तेः।प्राचीनंनय
नवत्कृतंतदेहास्येवतस्मात्तस्यैवावयवः।एवंसंनिहितप्रत्ययेनबाधितोभवति।अथयदुक्तंतीर्थशब्दवज्ञविष्यतीतितच्च
नक्रमः।तीर्थशब्दोपितीर्थमात्रमेवब्रूतेतीर्थयात्रांगतइतितत्रकानिचित्तीर्थान्यनुक्रांतानियतास्तेनतद्विशिष्टार्थोवि
ज्ञायतेयत्रतुनकेवलःप्रयुज्यतेतत्रतीर्थमात्रमेवब्रूतेयथातीर्थेस्नातीतितीर्थमेवहिसमानानामभवतीति।अपिवसम
वतिष्ठस्यार्थलक्षणार्थोग्राह्यःसंभवतिवाचकस्यार्थः।तस्मान्नलक्षणार्थोग्राह्यइति॥॥परिसंख्यार्थश्रवणमिच्छ
त्यर्थमर्थवादोवा॥॥तत्राहयदुक्तमवाच्यंहीतरदितितत्स्यात्।परिहारः।उच्यतेपरिसंख्यार्थत्वात्तद्रूपा।प्रण राम
यतिनवतत्वंदर्शितिगुणार्थमर्थवादार्थवातस्मादाम्नायामतीति।तत्रपरिसंख्यायांतावत्त्रयोदोषाः।गुणेपिनकश्चिद्विधीय २०

इतितीर्थयात्रांगत इति। उत्तरवेदिप्रतिषेधश्चतत्र ज्ञानेन वैश्वदेव उत्तरवेदिमुपकिरंति नवरुणा सीरीय इति श्रामि
क्षर्वो हि प्रतिषेधो भवति सौमिकवप्रणयन उत्तरवेदिर्न दार्शपौर्णमासिके। प्राकृतं वा नामत्वात्। प्राकृतं वैतत्प्रण
यनं दार्शपौर्णमासिकं कुतः अनामत्वात्प्रणयनत्वात्? सौमिकस्य प्रणयनस्य न नामधेयं नैतत्तस्य वाचकमित्यर्थः यद्य
यं तस्य वाचकः स्यात्तस्तद्विरूपादिदं तु पदार्थनामधेयं पदार्थस्य प्राकृ पनस्य वाचकं तद्विरूपात्कोत्पत्तेः प्राचीनं नय
नवक्लृप्ततद्धास्त्येव तस्मात्तस्यैव वाचकः एवं संस्कृतिप्रत्ययोन बाधितो भवति अथ यदुक्तं तीर्थशब्दवज्ञविष्यतीति त
त्रउम: तीर्थशब्दोपि तीर्थमात्रमेव ब्रूते तीर्थयात्रांगत इति तत्र कानि विंतीर्थान्युक्तानि यतास्तोत्तद्विशेषार्थोवि
ज्ञायते यत्र तत्तु केवलः प्रयुज्यते तत्र तीर्थमात्रमेव ब्रूते यथा तीर्थस्नाति तीर्थमेव हि समाना नामवतीति अपिव सम
वतिष्ठत्यर्थ लक्षणार्थयाद्यः संभवति वा च सायर्थः तस्मात्तल्लक्षणार्थयाद्य इति॥ ॥ परिसंख्यार्थं श्रवणं तु
तदर्थमर्थवादो वा॥ ॥ तत्राह यदुक्तमवाच्यं हीतर दृष्टितत्स्यात्? परिहारः उच्यते परिसंख्यार्थं वा स्यात्तद्यथा प्रण राम
यति नवतुर्थिति गुणार्थमर्थवादार्थं वा तस्मादाम्यामनीति। तत्र परिसंख्यायां तावत्त्रयो दोषाः गुणेऽपि न कश्चिद्द्वितीय २०

कालपर्यासंभवाद्वलक्षणया धर्माणि व्याहरतः कल्प्यते ऽह इव प्रत्यक्षस्य कालस्यार्थ एव भवति देवताविधिस्तस्मान्नायं याद्
कइति॥ ॥निर्मथ्यादिषु चैवं॥ ॥पक्षावत्ययोषामीयचर्मवाल्लिर्मथ्ये ऽग्निराम्नातः साधावैवेद्वारतारम्यां कौसृयते निर्म
थ्येनेष्टकाः पचंतीति॥ तथा दर्शपूर्णमासयोर्बर्हिराज्ये धर्मवती पुरोडाशीयस्यैव बर्हिषा प्रस्तरमेव स्तृणातीति आज्येनप्र
पमन्तीति तत्र संदेहः किं निर्मथ्यादयः शब्दाः धर्माणि व्याहरन्ति नेति तत्राभिधिकरणानि शब्दाः क्रियते निर्मथ्यादिषु चैवं
यथावैस्रुवराद्देत्राप्ययंयौति को निर्मथ्यशब्दः सद्यो निर्मथितमग्निमाहतथा वर्बर्हिराज्यमिति दृश्यशब्दैतेत्रयो
पिस्वार्थं विधायकत्वार्थी भवंति धर्मान्व्याहीतुं नर्हवंति तस्मान्न व्याहरकाः॥ ॥चातुर्मास्येषु श्रूयते द्वयोः प्रणयंतितस्माद्
यामेतीति अस्ति तु सोमप्रणयनं धर्मवत् तथा दर्शपूर्णमासयोः परधर्मकं तत्र संदेहः किं सौमिकमेतत् प्रणयनं उत दार्शपौ
र्णमासिकमिति तत्र सूत्रैणैवोपक्रमः॥ प्रणयनं तु सौमिकमवेद्यं हीतरत्॥ ॥सौमिकमेव प्रणयनं कुतः कारणं त्र्यवाच्य द
र्शपौर्णमासिकं वाद्केन प्राप्तत्वात्। कथं पुनरयं प्रणयंतिशब्दः प्रणयनमात्रवचनः सद्यौमिकं प्रणयनं विशे
षशब्दो ऽतिवलक्षणया इति ब्रूमः तीर्थशब्दवत्। तद्यथा तीर्थशब्दस्तीर्थमात्रवचनः संस्तो ऽपि विशेषं धर्मसाधनं करोति

यास्येतितयोर्द्वयोः प्रणयंतितस्माद्वाप्याहवनीयात् समासिंचयातिश्वप्रणयनेनहितौबलवंतौभवतोगाम्यस्त्वा
दिति। एतत्तदर्थवादस्यप्रयोजनं। अथयदुक्तमुत्तरवेदिप्रतिषेधाति। तत्रब्रूमः औत्तरवेदिकोनारभ्यवादप्रतिषेधः।प्र
करणाध्यकोविमार्दविशेषंचातुर्मास्येषूत्तरवेदिराम्नाता उपात्तवयंतीतिरूपानारभ्यविधेरयंप्रतिषेधः ननुवरुणप्रघा
सानांगुणवाक्यप्राप्तादेवायंतेषामेवात्रप्रतिवादः स्यात्। नैतदेवंप्रकरणाच्चातुर्मास्यानामेवंयदिवरुणप्रघासानांवादः स्या
त्तत्रप्रतिषेधे। साकमेधपर्वणोरपिकीर्तयेत्। अथोच्यतेद्वयोः पर्वणोर्वादोभवतीति अत्रब्रूमः नद्वयोः पर्वणोः प्रकरणंवरु
णप्रघासानांवा वरुणप्रघासानांवा वरुणप्रघासानांप्रकरणेद्वयोः पर्वणोरुक्तातिनंप्रतिषेधः समर्थस्यात्तस्माच्चातुर्मा
स्यानामेववादः॥ नन्वेवमप्यर्थवादेनैतस्मात्तंमध्यमयोः प्रणयनमिति किमर्थंप्राप्तस्यप्र-णयनस्यपुनः श्रवणमि
तिप्रयोजनंनोक्तंअसतिप्रयोजनेनकश्चित्परिसंख्यार्थमेवभवतितत्रदोषउक्तः॥ तस्माद्गुणार्थमेवैतच्छ्रवणं। नतु
नास्तिकश्चिद्गुणः उच्यतेगुणः श्रूयतेउत्तरवेद्यामग्निनिधानंतस्मात्तदर्थंपुनः श्रुतिः॥ ॥ स्वरसामैककपालामिक्षंच राम
लिंगदर्शनात्। गवामयनेश्रूयतेअभितोदिवाकीर्त्यमहः स्वरसामानोभवंतीतितेषांविशेषधर्माआम्नाताः प्रथ। २१

सप्तदशाभवंतिसंततमयांतियाज्यागृह्यंतइति एवमादयः तेपुनरत्रश्रूयंतेपृष्ठ्यः षडहोद्वौस्वरसामानाविति तथा
वैश्वदेवंश्रूयतेद्यावापृथिवीयएककपालइतितत्राम्नातो विशेषधर्माः सर्वेक्रतवस्तुरौत्रपर्यावर्तेमच्छन्दुहोतीतिपुनरप
रत्रकायएककपालइतितत्रैवंश्रूयतेवैश्वदेव्यामिक्षेतितत्रापिविशेषधर्माः केचिदाम्नाताः पुनरत्रचमैत्रावरुणामि
क्षेतितत्रसंदेहः किंस्वरसामशब्दोपचश्रूयमाणेगवामयनिकेभ्यः स्वरसामभ्योधर्माणांग्राहकः उतनेति एवमेककपा
लामिक्षाशब्दावपितत्रगुणविधिकस्मृत्रगृहीयात् समत्वादितिपयङ्गप्राप्तेउच्यतेस्वरसामैककपालामिक्षंचधर्माणांग्रा
हकंकिंकारणंलिंगदर्शनात्। लिंगंतत्रतोहनोद्वेपलेयेनजायतेसर्वेतेधर्माणांग्राहकाइतिस्वरसामसुतावत्पृष्ठ्यंषडहोद्वौ
स्वरसामानौविषुवान्ऋतत्रयऋतीसप्तदशामहत्तत्रयविशाखस्थानमभिपर्यावर्तेतिसउत्तराणिसामानामव्यवायत्रप
णांसप्तदशानामन्यूनतायाइतितथैतास्वरसामानोगवामयनिकानांधर्माणांग्राहकोनतएतावपिसप्तदशोनमात्रः॥
सप्तदशात्मन्यूनानाभवंतितत्रैतद्द्वचनंयुज्यतेत्राणांसप्तदशानामन्यूनतायाइतितथाअग्नयेद्यावापृथिवीयमे
ककपालंविधायाहयन्तर्वेऊतंकरोतिसालेकापरिवदाऊतोदुंः पर्यावर्ततेसाद्वितीयाआज्यस्यैवद्यावापृथिव्योपजेतेतिश्र

अविशिष्टे वाक्ये सर्वहोमपर्यग्निं वैश्वदेविकौ धर्मौ प्राप्नोदर्त्रोयति कृष्यामैत्रावरुणामामिक्षायां न वाजिने न प्रव
र्त्ततीति वाजिने उभौ वैश्वदेवधर्मप्रतिषिद्धं स्तो धर्मप्राप्तिं दर्शयति एतस्माल्लिंगमपरं तत्र ज्ञायते यथा स्वधर्माण्याहुरु
न्निप्रतिपत्त्यर्थं कर्म वाजिने उभौ आश्लिष्टरूत्तत्सांयत्नेन दुःकर्म । हलिंगमपदिष्टं कृतः प्रतिषिद्धिषु वा तल्लक्षणया प्राप्तिलिंगात् कुत उत्कर्षः
न्नाण्यरियहः चोदनासामान्यात् । स्वरसामलसामान्याद्रूकपाललसामान्यादामिक्षासामान्याद्वा यस्य लिंगमर्थसंप
गादित्यनेन वप्राप्तिरिति । [illegible]विक्रूयते वासोदहासनो दहातीति तत्र विचार्यते किं पाससेन संश्चक्रिया प्राप्यत उत नेति तत्र
हएवतर्त्याप्र[illegible] किं कर्मनिमित्तावतोत्राहाहुता इति निमित्ताविति यदि कर्मनिमित्तौ ततः प्राप्यते अथा इति निमित्तौ ततो नेति व
किं तावत्प्राप्तं कर्मनिमित्ताविति । कुतः कर्मणामतद्धर्मानात् यदा तस्मिन्नूरुव्ये दारुणि सूत्रे वा सारुकारेण तं उपनयेन वी राम
कर्मसंतं भवति तद्दैतो त्राष्टिप्रवर्तते न प्रागतो विज्ञायते कर्मनिमित्ताविति यदा कर्मनिमित्ताविति यदा कर्मनिमित्तौ न दैवदार २२
श्रुते कर्मजे कर्मदर्शनात् ॥ ॥ कर्मज एतस्मिन्वास आदेश्यमूयमाणे कर्म प्राप्यते कथं सूपवत्यथा सूपशब्दो ज्ञोषणादि
यनिमित्तः स यत्र श्रूयते तत्र ज्ञोषणधाः क्रियाः प्राप्यंते एवमिहापीति ॥ ॥ रूपं वा ज्ञोषश्रुतत्वात् ॥ ॥ अत्रोच्यते नैतत्कर्म-

पुरस्थं रंगायतीति रूववतीनां वा कार्ये आभिप्लवेति दर्शपरस्त्वकवतीनां वोपर्यधेयभावेन तत्र कार्येतावदनिदेशो
सधर्मे कुतः आष्टैरर्थविधित्वात् तत्राष्टानामर्थविधानं कार्यं न तत्रकवतीषु रथंतरं गायतीति रूववतीभिर्योर्थोभिधीयते
तमभिधीयते तमभिवत्सः शक्तिं वेदितव्यं तस्मान्न कार्या (इ) तपरिशेषादर्थवादार्थे । नन्वर्थवादेऽपि निष्प्रयोजनः प्रण
यनस्याप्राप्तत्वात् । अर्थवादस्य वप्रयोजनमुत्तरस्मिन्नधिकरणे वक्ष्यामः मध्यमयोर्वा गतार्थवादादिति ॥ ॥ ८ ॥ ॥
प्रथमोत्तमयोः प्रणयनमुत्तरवेदिप्रतिषेधात् ॥ ॥ द्वयोः प्रणयंतीति श्रूयते तत्र संदेहः कतरयोर्द्वयोरिति तत्र नियमे प्राप्त उ
च्यते प्रथमोत्तमयोः प्रणयने कुतः उत्तरवेदिप्रतिषेधात् तत्रोत्तरयोर्विधिः प्रतिषिध्यते न वैश्वदेव उत्तरवेदिमुपवपंतीति
सशुनासारीय इति अस्मिन्प्रणयनं उत्तरवेद्यामग्निविधानं विहितं तृतीये प्रणयनं तत्रोत्तरवेदिप्राप्तिः प्राप्तैव सत्यं
प्रतिषेधः प्रथमोत्तमयोश्चासौ तस्मात्तयोः प्रणयनमिति । मध्यमयोर्वा गतार्थवादात् ॥ मध्यमयोर्वा पर्वणोः प्रणयनं
कुतः गतार्थवादात् गतार्थवादेनैतद्वयोः प्रणयनमुच्यते तस्माद्वाभ्यामेतीति उरुं संस्तुते येते पर्वणी उरूवा एते यज्ञस्य
वरुणप्रघासाश्च साकमेधाश्चेति उरूवगमनस्य धेनेतत्त्वे संस्तुति संबंधो विज्ञायते उरू यत्तस्य वरुणप्रघासाश्च साकमे

श्रमः
आथयदुर्वैदिकं सर्वकर्मधर्मसुत्वं तस्मात्तदुपानियेयमिति अर्थ्नै वैदिकसामर्थ्यनिर्देशात्।

ग० क्षि२

दृष्टं वा तत्तदुपदीयमानम् अविरुद्धं तस्माल्लौकिकः स्यात्। न वैदिकम् अस्ति इदं शास्त्रे वीसादितं तस्य शास्त्रे पौरुषे कार्ये
निर्दिष्टं यदाहवनीये जुहोतीत्यारभ्य तस्मिन् सर्वार्थकल्पमाने निर्देशो नर्थकः स्यात्। तस्माल्लौकिको रूपनिर्देशः सर्वार्थत्वे
वेषां स्वे स्वे कार्ये वर्तमानानाम् भविष्यति एवम् उभयम् अविरुद्धं सर्वार्थत्वं निर्देशश्चेति। अथ वैरूप्याश्रयः कस्मान्नोप
दीयन्ते त्रयो यतो तथोत्पत्तिरितितरेषां समत्वात्॥ ॥ इतरेषामप्य नो वैरूप्यानां तथोत्पत्तिः न सर्वार्थत्वं तुर्थः कु
तः समत्वात्। एते पीतरे रश्मिभिः समाः। एतेषामपि निर्दिष्टकार्यत्वात् आगासीनो धिष्ण्यानाघारयतीत्याः स्तेनोपभिधे
यादिति॥ ॥१४॥ संस्कारांस्त्वप्रकृतत्वात्॥ ॥ एकादशिन्यां श्रूयते उपस्त्रायो रूपो भवतीति तत्र संदेहः। किमेतदुप
स्त्राय इयं संस्कृतं ज्ञोषणादयः संस्कारा अत्र कर्तव्या उत नेति किं प्राप्तं संस्कृतसारकत्वात् अत्र ज्ञोषणादयः संस्काराः।
कुतः तद्धितत्वात् अयं रूपप्रादः संस्कारनिमित्तः सत्यपि संस्कारेषु नोपपद्यते तस्मान्न कार्या इति॥ ॥ न
त्वप्राकृतत्वात् गुणानामभिधानत्वात्। न कर्तव्याः कुतः अयं ज्ञोषत्वात् एते संस्कारा अस्मिन् ... क्रियन्ते राम
एतैर्धारणं यजतिना संमन्त्रते तत्र संस्कृतको ... नियुक्तेन पशुना यष्टिः क्रियमाणे पूर्वं निर्वर्तयति अस्मि २३

प्रत्यये न ए... उत्पतेत तत्र कृताः संस्कारा अनर्थकाः स्युः॥ ननु एवं तत्सामर्थ्याद् दृष्टार्था भविष्यन्तीति उच्यते
नात्र वचनं ... पः कृत्स्न इति वर्तमानापदेशोऽयं न च वर्तमानापदेशोऽपि न घटते संस्कारा ... मावे उच्यते म
न्त्राभविष्यति यथा यजमानो वै रूप इति ... तत्र साद्गुण्यादिह पुनः कथमिति उच्यते गुणानामभिधानत्वात्। रूप
गुणेनो रूपसंस्काराणामभिधानत्वात् रूपसंस्कारास्तत्र के विदर्थप्राप्ता ... दनाद्यः ... तता संतितैरयमभि कु४
धीयते रूप इति अरूपः सत्यं यथा स्त्रीकन्या निलं ... ता मालागुणेनापलं ... तत्रैव मकदेशो नापि संस्काराणां संस्कृ
ता इति स्तुत्याभिधीयते॥ ॥ अग्नौ श्रूयते पृष्ठे रूप तिष्ठते इति तत्र चिन्त्यते किं पृष्ठधर्माः कर्तव्या उत नेति किं पुनस्ते सा
मान्यधर्मा ... कारादयः विशेषधर्मा ... रथन्तरे ... मानेष्वपि वीमनसाग्रायेक्षु इति सम्बुद्धिमित्येवमादयः। किं ता
वत्प्राप्तं तत्र ... तावन्तः परीक्षं किमयं पृष्ठशब्दः कर्मणो वाचक उत द्रव्यस्येति। ननु सिद्धमेतत् कर्मनामधे
यं पृष्ठशब्द इति तस्मिन् गुणोपदेशः। प्रजानन्तोऽभिनन्दयन्त तत्तासेव वो दनास्वेत उक्तेल मददशा निष्ठानि दे
रूपं पृष्ठं वै राजं पृष्ठमिति इदानीं पृष्ठे रूप तिष्ठन्तीत्यस्यां चित्यते किं पुनरत्र युक्तं तत आह कर्मणष्टुप् ... शब्दः

स्यात्तथाभूतोपदेशात्।। कर्मणः षष्ठीशब्दस्य कुतः तथाभूतोपदेशात् तथाभूतः सन्नुपदेशो यथायं षष्ठीश
ब्दः कर्मनामाधिगतः तथाभूतोयमपि किमस्य तथात्वे षष्ठीशब्दसामान्यं षष्ठीशब्दस्तत्र कर्मवचनोधिगतः स
एवायं तस्मादिहापि तद्वचनः एवावगंतव्यः विशेषाभावात् पदधर्मार्थः कल्प्यते नैकः शब्दोनेकार्थः स्यात्। तत्र केचि
त्ः शब्द उक्त इति संशयः स्यात् नार्थप्रत्ययः तत्र व्यवहारो न सिध्येत् व्यवहारार्थश्च शब्दप्रयोगः कारणांतरं च
प्रकरणाद्यपेक्षं एकार्थत्वे तु निरपेक्षोर्थप्रत्ययः तस्मादनेकार्थत्वमन्याय्यं तस्मात्कर्मनाम षष्ठीशब्दः यदि
कर्मनाम तदा यदि तावत्तानि कर्माणीहापदिश्यते तत्रोत्तरेषामनर्थकता अथ यमाभूद्देषदोषस्तेन दुपस्थानं
तत्र विलायते तत इदं प्रकरणं वाभ्येत तस्मात्स्वाद्रूपविधिरयं षष्ठीरूपं तिष्ठते षष्ठीसदृशः कर्माभिरूपं तिष्ठत इति
तस्माद्रूपेणैव धर्मैर्भवति तस्मात्कर्तव्या धर्मा इति अभिधानोपदेशाद्धि पर्तिष्ठ द्रव्येषु षष्ठीशब्दः स्यात्।। न
वैतदेवं कर्मणः षष्ठीशब्द इति किं तर्हि द्रव्येषु षष्ठीशब्दः स्यात् द्रव्येषु अभिधानत्वेनेतुम इत्येवमादीनां द्रव्या राम
णां वाचकः कुतः अभिधानोपदेशात् अभिधानोपदेशोयं षष्ठीरूपमभिष्ठत इति षष्ठी रमिदधातीत्यर्थः कथं पुनरयमु २७

निमित्तौ किं कारणं येनैमित्तिकः शब्दस्तेन निमित्तमुपलभ्य प्रयुज्यते यथा दंडी छत्री इति अस्मैत्वनुपलभ्य क्रियामर्ल
तिमान्प्रयुज्यते तस्माच्चैतौ क्रियानिमित्तावितिश्चेदुच्यते आहत्य क्रियामनुमायते शब्दं प्रयुंक्त इति। अत्र ब्रू
मः प्रत्यक्षाभावात् इति निमित्ततां गम्यमानास्तु त्वदुपन्यस्त हेतवः क्रियाया निमित्तत्वकल्पनायां हेतुर्नास्तीति। यत्र के
क्रियोत्तरकालं प्रवृत्तिदर्शनादिति अत्र ब्रूमः प्राक्क्रियया आकृतिरनभिव्यक्ता सा क्रियया अभिव्यज्यते यतः क्रियोत्तरका
लं शब्दप्रयोगस्तस्माच्छब्दा इति निमित्तौ यदेवं तदा सिद्धं रूपं देयं कुतः अशेषभूतत्वात् नात्र क्रिया शेषभूता क्रिया
वा विशब्दस्याभावात् रूपं तु प्रत्यक्षैर्विहिता ज्ञापलघाः क्रियात्तस्माद्रूपवदित्यत्रलोपन्यासः।। ।। विशायेलौकि
कः स्यात्सर्वार्थत्वात्।। ।। गर्गत्रिरात्रे श्रूयते दश हानि सामानि प्रकृत्य पृष्ठ्यपते अग्निमुपनिधायस्तुवत इति तत्र विशयः।
किं लौकिकोग्निरुत वैदिक इति। किं प्राप्तं वैदिक इति कुतः सर्वकर्मार्थ उत्पन्नो सौ यान्यहं कर्माणि करिष्ये तेभ्य आत्मा वि
कृत इत्यतो वैदिक उपनिधेय इत्येवं प्राप्त उच्यते विशये लौकिकः स्यात्सर्वार्थत्वात्। एतस्मिन्विशये लौकिकं वैदिकमि
ति लौकिकः स्यात् कुतः सर्वार्थत्वात् लौकिकः सर्वार्थेनात्स्य कार्यं किंचिन्निर्दिष्टं अतो यद्यदग्निनाकर्तव्यं तद्दृष्टम

मुपस्थानंवचनोभिधानार्थः आक्षेपविज्ञानात् उच्यते उपस्थहविशेषात् मंत्रकरणे उपतिष्ठतेइत्यात्मनेपदं
भवति मंत्रस्याभिधानस्य करणं नोपस्थानस्य उपस्थानं शरीरेण क्रियते मनसा वा तस्मादभिधानार्थः।
स एष विप्रतिषेधः यदिष्टश्शब्दः कर्मसु कल्प्यते आत्मनेपदं बाध्यते नहि तेनैंद्रा मंत्रः करणं भवति अथात्मने
पदमनुरुध्यते उपस्थानविप्रतिषेधः तदभिधानार्थता पततितत्रात्मनेपदानुरोधो नाप्यः शब्दशब्दो हि लक्षण
यास्य शब्दस्याभिधानं मंत्रस्तु तस्य तदर्थवान् भवति आत्मनेपदं तु मंत्रकरणे नैवोपपद्यते अतः शब्दसाधनेषु मंत्रेषु एष
शब्दः आह नैतद्युक्तं उपस्थानार्थता हि स्रुत्या उपतिष्ठते आत्मनेपदलिंगात् अभिधानार्थता नबलिंगेन
श्रुतिर्बाधिता उच्यते नैवात्र श्रुतिर्बाध्यते स्वार्थमेवोपतिष्ठ निराह समीपस्थानं तत्त्वभिधानाय श्रु भिधाय नं
निर्वर्त्तयितुमग्निसमीपतिष्ठ इति आत्मनेपदान्तं तो विरोधः। आह एवमप्यभिधानस्य मंत्रः करणं नोपतिष्ठ
तेस्तत्रासंबंध एवोपस्थानस्य मंत्रेण तथा एष्टेरुपतिष्ठं तद्यति समुच्चारणमनर्थकं स्यात् उच्यते अभिधानमभिनिर्व
र्त्तयन् मंत्र उपस्थानस्य करणं भवति यतो यस्य प्रयोजनं निर्वर्त्तयति न हि निः प्रयोजनमनुष्ठीयते तस्मान्मंत्रे

र्थकं स्यात्तन्न तु कथंविदपि कर्मणः फलं प्रति गुणभावः शास्त्रोपक्रान्तं तु तस्माद्यागेनापूर्वं साधनमत्रोच्यते तत्र
यागो विज्ञायते लौकिकोसौ पदार्थस्तेन उक्तं यमपूर्वं साध्यं तद्वृत्तेतन्न विज्ञायतोऽह तु यागेनापूर्वं साधयेदि
त्येतावदेवोक्तं कथं साधयेदिति तिकर्तव्यता नोक्ता येषां वा श्रीनां ज्ञायत एवेति कर्तव्यता तेषां कर्तव्यत्वमात्रमुप
दिश्यते यथौदनं पचेति येषां तु न ज्ञायते तेषां सहेतिकर्तव्यतयैवोपदिश्यते यथा दर्शपूर्णमासाभ्यामेवं चेन्नूनं ज्ञायते य
गेनापूर्वं निर्वृत्ता विति कर्तव्यता यस्मान्नोक्ता तस्मान्नूनमसाववस्तीति आह यद्यप्यस्ति लोके ततो ज्ञायते अथ नास्ति वक
व्यं शास्त्रात्तावदुक्तमिति उच्यते बाढमस्ति लौकिकी वैदिकीव लौकिकी तावत्सार्वजनी पाकादिषु वैदिकी दर्शपूर्ण
मासादिषु यदि ता सर्वा एता श्चोदनाः तदुपदेशाः सौर्ययागेनापूर्वं साधयेत्तया ज्ञातयेति कर्तव्यतयेति ततोऽनु
या
क्तेरितिकर्तव्यतात्र विधिर्नैव विधीयते अत इति कर्तव्यता मा अविधेयं जतेः पूर्ववत्त्वं नाविहितेति कर्तव्यता कल्पि
ता अथ यच्चाङ्गं यजेत यागं कुर्यादिति तु ङ्याद्धोमं कुर्यादिति तेषां किं त्वैव धर्मको ज्ञामवति भवतीति ब्रूमः यद्य
पि न ज्ञातेति कर्तव्यता नोपदिश्यते वर्ता पत्नु दिश्यत इति तथापि परफलार्थः क्रियते तदा धर्मनाको हतिनष्टं यमी

घ

फलं ३ ७१

कालत्वं भवति कथं ज्ञायेत यो ह्यमेध्यं द्रव्यमुच्छिष्टः ज्ञापानेवा प्रोक्ष्य पादो वामेन हस्तेन पादेन वा यथा कथंचिद्दे-
वताभ्यै उत्सृजति तस्य फलं न भवतीति शिष्टाः स्मरंति यस्तु मेध्यं द्रव्यं शुचौ देशे प्रयतः प्राङ्मुखो दक्षिणेन हस्तेन
समाहितमना मंत्रवन्नियमवद्देवताया उत्सृजति तस्य भवतीति स्मरंति तस्माद्धावान्यजति फलायाम्नायत्ते
स सर्वो धर्मानाकांक्षति अतस्तेषामप्यस्ति धर्माकांक्षा सत्याम। कांक्षायां संनिहितैर्थैर्वैरपि प्रतिषिद्धः संबंधः प्र-
प्रकृतौ विकृतौ त्वानुमानिकैः॥ ॥स लौकिकः स्याद्दृष्टप्रवृत्तित्वात्॥ ॥अथ नैवं चिंत्यते किं नियमो लौकिको वैदिको
वेति कर्तव्यता उत लौकिको वत्राहोस्विद्वैदिको वेति अत्र विशेषाभावादनियमे प्राप्ते उच्यते स लौकिकः स्यात्स खलु
कर्तव्यतोपायः लौकिकः स्यात्॥ कुतः दृष्टप्रवृत्तित्वात् दृष्टार्थस्य तन्नेतत्प्रवृत्तिर्यथा पार्वणस्थालीपाके अष्टकायां च
हे। आग्रहायणीकर्मणि लिंवयत्रयत्रयागेनाप्रवसाध्यते तत्तवास्य प्रवृत्तिर्दृष्टा। अतोन्यथा ह्निसायतेय-
ग स्यात्प्रवसाध्यत अयमुपाय इत्यवगंतुं नापि यागः तस्माद्दस्यापि स एवाभ्युपायः॥ ॥वचनात्तु ततोन्यत्वं॥ राम
आह्निमेष एवोत्सर्गः सर्वत्र लौकिकोतिकर्तव्यतेति एवं खलु प्राप्तः एव प्राप्ते ब्रूमः। वचनात्ततोन्यत्वमिति यत्र २६

क्रिं क्रियतां यस्यार्थो नास्ति प्रयाजे प्रयाजे कृष्णलं जुहोतीति वचनं प्रयाजानां भविष्यति कथं पुनरत्र प्रयाजा
र्थकृष्णलहोमस्य श्रुत्याभाव उक्तोऽभिधीयते हि तथा नाम एवं तर्हि न प्रयाजान्ते सति प्रयाजे कृष्णलहोमं विधास्यति न
वा सत्सु प्रयाजेषु कृष्णलहोमः शक्यते कर्तुमित्यर्थात्प्रयाजान्करिष्यतीति तस्मान्न लिंगेन वैदिकानियमः । यथोक्ते
न न्यायेन लौकिकं वेति कर्तव्यतेति मिथो विप्रतिषेधाद्गुणानां नायथार्थकल्पना स्यात्तत्राहाथ कस्मान्नो भेत्र पि
इति कर्तव्यते सहप्रवर्तेते इति किमेवं भविष्यति एवं तु सापेक्षा कर्मणामन्यतरतो न बाधिता भवति उच्यते संहि
प्रत्यक्षावकृयावत्कर्म निरपेक्षं कृतं द्वितीयस्याः प्रवृत्तिर्विप्रतिषिद्धा अतो मिथः प्रवृत्तेर्विप्रतिषेधाद्यथार्थकल्प
नास्यादेकस्याः प्रवृत्तिः स्यादित्यर्थः कथमेकस्याः प्रवृत्तेर्धर्माणां यथार्थकल्पना भवति यथा मीयं सुकार्येषु प्रव
त्तावुत्पन्नास्तस्मादपि तेष्वेवमेवं वीतरथा द्वितीयस्या धर्मास्त्वयथार्था भवेयुः एवैर्धर्मिस्तेषां कार्याणां निर्वृत्तित्वा
देवमेकस्याः प्रवृत्तिर्यथार्थकल्पना भवति अतो यथार्थकल्पना स्यादित्यनेनैकस्याः प्रवृत्तिरित्युक्तं भवत्येकस्याः प्र राम
वृत्तौ यथोक्तेनैव न्यायेन लौकिक्याः प्रवृत्तिरिति ॥ ॥ नागिलाल्लुभिप्रमप्येत गुणानामभिधानत्वात्सर्वथाद्दभिधानव २७

यथा धेनुः किशोरेण ॥ गुणशब्दः प्रश्न निवृत्ते नत्वं स्यात्लौकिकी तिकर्तव्यतेति किं तर्हि वैदिकी नियम्येत कुतो
नागिलात्वैदिकस्यापि नागिनी प्रवृत्तिः सापि सर्वस्येति कर्तव्यतासमानेव नागिलत्वे उभयोर्वैदिकोत्वस्यात् । गुणेन
मभिधानत्वात्गुणा एते प्रयाजादयः सौर्यादिषु दृश्यमाना अभिधायकान्भवेयुस्तस्यार्थस्य यथा वैदिकस्येतिकर्तव्यते
ति बाधका भवंतीत्यर्थः ॥ कस्मात्सर्वं वा तएते हि तयेति कर्तव्यता पासंबद्धाः अतः साहचर्यं पर्यान्नागमयंति अभिधान
वत्त्वयथा कोऽपाधिनेश्चिरोच्च मितमभिधानं कर्मणो वावकं तत्कर्मसहचरितो तु धर्मी [illegible] मयतित्येष सत्त्वेत दभिधाने ना
भिहत्यनुपत दृष्टितेषां धर्माणां तत्र भावो विज्ञायते एवमिहापि प्रयाजादीनां दर्शनमसत्यां वैदिकानुत्पन्नो
तेनस्याअपीहभावो विज्ञास्यते नन्वसति नायं लिंगमकारणं सत्यमेवं कुत्स्नुन्याये नागिलत्वादिति । यत्तु दृष्टप्रवृत्ति
लौकिकीसंचक्रमः । यद्यपि दृष्टप्रवृत्तिः सान्यथापि वैदिकी चेन्नियम्येत कथं यथा धेनुः किशोरेण तथा वाक्ये किशो
रा धेनुरिति यद्यपि धेनुशब्दः स्त्रीगोवृत्तौ दृष्टप्रवृत्तिः तथापि अभिधानसामान्यादश्वेनामपि भागीति किशोरेण लि
गेनाश्वत्वं विज्ञायते एवमिहापि यद्यपि लौकिकी दृष्टप्रवृत्तिस्तथापीतिकर्तव्यता सामान्येन नागिलात्लिंगेन वै

दिक्षाविकल्पः॥ ॥ उत्पत्तौ नासमत्वाद्यथाधिकारं भावः स्यात्॥ ॥ अथवा नैव लिंगेन नियम इति कुतः उत्पत्ती
नासमत्वात् धर्माणां प्रयाजादीनामुत्पत्तयः समाः सर्वेषामाग्नेयाद्यंगभावेन न परस्परांगत्वेन किमतः यदि प्रया
जादीनामनुयाजादयो योगानि स्युस्ततो यत्र प्रधानं तत्रांगानि इति प्रयाजदर्शनेनानुयाजादयोनुमीयेरन् अयस
तु समप्रधाना एततर प्रयाजदर्शनेन कामं प्रयाजा अनुमीयेरन् प्रधानधर्मत्वान्न त्वनुयाजादयः तस्माल्लिंगमनि
यामकं। यत्वभिधानवदिति तत्र ब्रूमः पुरुषं तत्र हि परत्वादः परत्र पुरुषः संस्कारधर्मा नेति हि स्रातीत्युक्तं। अपि च विधिरसाव
ग्निहोत्रवदेतन्नाभिसंपुनः अनुवादः तेनात्र प्रयाजादीनामेव नास्ति प्राप्तिः कुतोनुयाजादीनां तस्माद्विषम उप
न्यासोभिधानवदिति॥ अतो यथाधिकारं भावः स्यात् येन यन्मीप स्यात्पूर्वस्याधिकारे आम्नातास्तेन तत्रैव भवेयुः एवं
तर्हि सोयं वरं निर्वपेदिति तेनाम्नातेन प्रधानस्य विधानोत्पत्तिः तेषामेव वचनेन भवतु कथं यत्तेषां नाग प्रधा
नप्रयमानकस्मै विकल्पयोज्ञनायत्रत्वत इति तेन वप्रापितानामंगानामभितस्यो लिंगाद्विशेषावधारणं नाव राम
[illegible] प्यति। तत्रेदमुच्यते। अतिदेशवचनं विप्रतिषिद्धमेकस्मिन्। एकस्मिन्नाद्वैप्रधानस्यासतिरंगा। २८

कर्तव्यता प्रयाजैस्तनात तय तेषु कस्य चेतसंगतिनत्रेता निवचनान्नुपपद्यंते प्रयाजे प्रयाजे कृष्णलं जुहोति॥

सहं ववनं वैदिकास्तत्र न है। किं कीस्यात् तद्वचनसामर्थ्याद्वैदिकमेव स्यात् यथोपसत्सु गृहमेधीयेव॥ लिंगेन वा
नियम्येत लिंगस्यानुगुणत्वात्॥ ॥ लिंगेन वैतिकर्तव्यता नियम्येत कतरा यस्यां लिंगं वैदिक्या अलिंगं तस्माद्वैदिकी भि
प्रयाजे पुनर्लिंगं सोयं तावद्वरोध्यते प्रयाजे कृष्णलं जुहोतीति तथा रैग्वाबर्हिसाते अर्धं बर्हिषो लुनात्यर्धं निस्यंदितं अ
र्धं देवा करोत्यर्धं नेति पितृयज्ञे न होतारं वृणीते नार्षेयमिति एते लिंगैर्ज्ञायते वैदिकी इतिकर्तव्यतेति कथं लिंगस्यानु
गुणत्वात् एते हि प्रयाजादयो वैदिकस्य पूर्वस्य गुणाः यदि वैतदा इति एवमादीनि तस्माद्वैदिकी इतिकर्तव्यता नियम्ये
त॥ ॥ अपि वा न्यायपूर्वत्वाद्यत्र नित्यानुवादवचनानि स्युः॥ अपि वा नैव स्याद्वैदिकी इतिकर्तव्यतेति यत्कारणमेते लिं
गैर्न ज्ञायते वैदिकी नियंतुं कुतः अन्यायपूर्वत्वात् न्यायपूर्वकं हि वचनं तस्माद्धर्मं भवति न वैतानि न्यायपूर्वाणि न
हि वैदिकी प्रवृत्तिर्युक्ता निबद्धा हिंसात्मकरणं द्विभिः कारणैः दर्शपूर्णमासादिषु कथं तर्ह्येतानि लिंगानि उच्यते य
त्र नित्यानुवादवचनानि स्युः अर्धं तावदर्धं बर्हिषो लुनात्यर्धं नेति यत्र बर्हिस्तत्रैव भविष्यति। यत्कारणं सतो बर्हि ड्र २
ष उच्यते न चेहास्ति बर्हिः न होतारं वृणीते नार्षेयमिति नित्यानुवादो भविष्यति नन्वनित्यानुवादः सत्त्वनर्थको भवति
स्ति ०

न्य

नावबवनंनसंभवति। किंकारणं। उत्पन्नं हि प्रधानमंगापेक्षते। अपेक्षया वर्त्तानिग्रहंते तस्मान्नैत
दपि युक्तं। यद्यपि विनिर्वपादित्तेनेन शब्देनांगान्यपि विधीयेरंस्तत स्तेषामपि फलसंबंधः स्यात्। तथांगत्वमे
व व्याहन्येत। ततोयमपि वादे न घटते। तस्मात्पूर्वोक्तो लौकिक एवाभ्युपायः। विध्यंतो वा प्रकृतिवच्चोदनायां
प्रवर्त्तेत तथा हि लिंगदर्शनं। विध्यंतो वा सौर्यादिकाप्य चोदनासु प्रवर्त्तेत न यत्र लौकिकः। कः पुनरयं विध्यंतो
नाम। विधेरंतो विध्यंतः। अथ विधिः यद्वाक्यमुपलभ्य पुरुषः कस्मिंश्चिदर्थे प्रवर्त्तते कुतश्चिद्वा निवर्त्तते स विधिः।
विधीयते अनेनार्थः यथा लोके देवदत्त गामभ्याज शुक्लामिति तस्माभ्याजेत्यादिः॥ इतरेतंतः। वेदेपि दर्शपूर्णमा
साभ्यां यजेतेति विध्यादिः। विध्यंतोपि प्रधानविधिवर्जितं कृत्स्नं पौरोडाशिकं ब्राह्मणं तेन समेतो यो विध्यादिर्विधि
दृष्टं पूर्वनिर्दिष्टं प्रति पुरुषं प्रवर्त्तयति। तस्मात्सोप्यंतः। तथा सोमेन यजेतेति विध्यादिः। सोमिकमपि ब्राह्मणं वि
ध्यंतः। एष विध्यंतो नाम। एते वुवसौर्यादिषु विधिः आदिरस्ति विध्यंतो नास्ति एतेष्वपि स विध्यंतः। कल्पेत कथं कल्प्य त्वपि
पूर्णं यं क्षारं तदध्याहारेण वा पूर्यत व्यवहितकल्पनया वा तत्राध्याहारा व्यवहितकल्पना न्यायसी। अध्याहारे बंध्रुआ
घ

कल्पेत। इतरत्र तूक्तेन संबंधः तस्माद्यवहितोप्यालंबनत्वयचोस्य परिपूरकः कल्पेत यथा वसंताय कपिंजला
नालभेतेत्यत्राप्यायकत्वविंकानालभततइतितत्र वैदिकी तित्रर्गव्यताप्राप्य तेयदितत्रालभ्यमस्यात कल्पेत तत्र नभ
वतितदेतन्मपूरन्त्वमापद्यते तद्यथा मपूरस्यानृत्यतोन्पदोंद्रियते अनृत्ते द्रियते एवं भिरूपीदंसं द्रियते तद
पाद्रियते नैष दोषः प्रत्यक्षस्य सत्त्वमावः उक्तः पुनरानुमानिकोनवानुमानिकं प्रत्यक्षं वा यदिदं कृतर्हि न प्राप्नोति प्र
त्यक्षविरोधात्तस्यादेवं यदि विरोधः स्यात् न त्वास्ति विरोधः तत्रापि ज्ञास्यतीति तीहापि तदेतदुक्तं विद्येतो वा प्रकृतिवच्चोद
नायां प्रवर्त्तेतेति द्युतेप्रकृतिवदिति कि[illegible] माह॥ अष्टमेप्रकृति नियमं करिष्यती यमस्या प्रकृतिरिति तदुच्यते वि
धं तो वा प्रकृतेरिव प्रवर्त्तेत। यायायस्य कर्मणः प्रकृतिरिति यस्याश्रयः प्रकृतिस्तस्या नियमादेव यस्याग्नीषोमीयस्तस्याग्नी
षोमीयादिति तेवं सर्वत्र पृथक्त्वआन्वलौकिको विध्यंतः कल्प्यते उच्यते लौकिकस्य विधेरभावाद्विध्यंत एव नास्ति कुतस्तस्य क
ल्पनेति आह लौकिकी कर्तव्यता प्राप्ता किंविध्यंतकल्पनयेति। उच्यते वैदिकीत्यत्रेति कर्तव्यतानलौकिकीकस्मान्नत्या
हि लिंगदर्शनं प्रयाजादिसमर्थितं भवति॥ ॥लिंगहेतुत्वादलिंगलौकिकं स्यात्॥ ॥यदि लिंगाद्वैदिकोभ्युपायो भवी

तंद

राम
२९

नतर्ह्यलिंगो लौकिकः स्यात्यत्र कर्मलिंगं किंचिल्लिंगं नास्ति तत्र लौकिकः स्याद्विधानं यथैन्द्राग्नमेकादशकपालं निर्वपेद्
ससजाताविर्यात्पुरिति। लिंगस्य सर्वबलात्वोदनासामान्यादेकेनापि निरूप्येत यथा शालीपुलाकेन अत्र त्वावतेस्यादेवं
यदि लिंगहेतुको वैदिक उपायः स्यात्र लसौलिंगहेतुकः किंहेतुकस्तु विर्यंतहेतुकः विर्यतोपि न्यायपूर्वः सर्वन्यायस्तुल्यः स
र्वेषां कर्मणां वैकृतानां लिंगवतामलिंगवतां च कुतः चोदनाशब्दसामान्यात्कर्मचोदनायाः शब्दः समानः सर्वत्र विर्याद्दिरिति
न विर्यते तत्तुल्यस्य प्रापेत्तपान्यत्र प्रकृतेन विर्यंतेतन्नः संबध्यस्त हेतन्यायपूर्वकं लिंगमेव तत्रापि दृश्यमानं तुल्यन्यायानां सर्वेषा
धर्मवत्तां ज्ञापयति। यथा स्थाल्यां तुल्यपाकानामेकमुपसृष्य अन्येषामपि सिद्धतां ज्ञापयति तुल्यो हेतुरस्य चान्येषां च विशिष्टत्वस्य
ति। तस्मात्सर्वत्र वैदिकी इतिकर्तव्यता। अथ यदुक्तं दृष्टप्रवृत्तिर्लौकिकी इतिकर्तव्यतेति तत्र ब्रूमः सामान्यतो दृष्टमेतद्दृश्यते। प ४
सामान्यतो दृष्टं च यद्व्यभिचारितत्प्रमाणं सव्यभिचारं चैतत्। दृष्टा हि गण्यागादयो अनेवमिति कर्तव्यताकाः तस्माद्दृष्ट
प्रवृत्तित्वादित्यहेतुः यत्तु वैदिक्या आगिलात्तत्सर्वकाणि लिंगानि भविष्यंतीति अत्र ब्रूमः आगिलस्यापूर्वे इतिकर्तव्यता त्वं किंलिं
गं तद्भावस्तस्याः शब्दस्त्वं॥ शब्देन चोदनामासवारस्य विवितत्वात्पद्धतेन सर्वत्रेति। तस्मान्न आगिलमतो विरुध्यते नैव वि

ग५

र्त्तव्यता प्राप्यते नान्यथा । अथ कस्मादेतानि वैरूतानि वाक्यानि न्यूनान्येव नानुमन्यंते । किमेभिः पूरितैः न्यूनान्य
नर्थकानि भवंति । भवंतु को दोषः । श्लिष्टैरेषां संपरिग्रहेन युज्यते प्रमादो ह्यविष्यतीति नास्ति हेत्वेमाचार्यो वा प्रमादः कुतए
तावति ग्रंथे न विषयति कथं तुल्यं न सा प्रदाधिकमित्युक्तं । व्यामोहोऽपि विदुषां युगसहस्राणि बहूनि नानुवर्त्तेत । युज्यते वैषाम
पत्न्यपाहरणं तस्मान्न्यूनानि नानुमन्यंते । अतो वैदिकी तिकर्तव्यतेति सिद्धं द्वादशाहिकमहर्गणेऽतस्य कृतित्वादैकाहिकम
धिकागमात्तदाख्यं स्यादेकाहवत् ॥ ॥ प्रजाकामश्च वायमनस्यु पेयुरिति सत्रं विवापान्यायते ज्योतिर्गौरायुरिति गवामय स्पं
ने द्वादशाहिको विध्यंतरगति वक्ष्यति · गाय्याप्युद्वादशाहस्यैति तत्र चोदकेन द्वादशाहिका धर्माः प्राप्यंते · एकाहानामपि मध्या
नामभिः प्रातिस्विकाः । येतत्र द्वादशाहिका एकाहिकैरविरुद्धास्ते यथाप्राप्तं क्रियंते विरुद्धेषु संशयः । किं द्वादशाहिको धर्मः ।
कर्तव्यः उतैकाहिक इति किं प्राप्तं तत्र सत्रेणैवायं क्रमः द्वादशाहिकमहर्गणे तद्धितिलात् द्वादशाहप्रकृतित्वाद्विध्यंते नैव राम
प्राप्यंते । नन्वेवं नाधैर्मयं बाध्यंते । न बाधिष्यते नामधेयं ज्योतिरादि अधिकागमाद्भविष्यति । यज्ज्योतिष्टोमिकेभ्योऽधिकास्तोत्रशस्त्र ३०
विकारास्तदागमादेकाहवत् । यथा तस्मिन्नेव ज्योतिष्टोमिकाहे ज्योतिः शब्दाधिकागमाद्भवति स स्तु ज्योतिष्टोमिकेषु ज्योतिष्टो

म२

मभावात्त्र्यविकधर्मार्थोयंचोद्यः।नवाधिकानांद्वादशाहिकैर्विरोधोऽस्तितस्माद्द्वादशाहिकंधर्मजातंचिरुद्धकृते
अमितिअधिकागमात्तदात्वंस्यादेकाहवद्दृष्टेतस्यापराद्यात्मायंद्वादशाहेअधिकाएकाहिकेभ्यःकेचिद्धर्माउच्यंतेअभिहु
वोन्वहंभवतिगौरीविनमत्त्वहंनवतीतितेषामधिकानामागमात्रदाख्यंस्याद्देतद्द्वादशाहिकमहर्ज्योतिरास्यमायुरस्या
वा।कथमेकाहवत्।यथातस्मिन्नैवैकाहेयंज्योतिरादिस्त्रादेऽज्यौतिष्टोमिकेभ्योऽधिकेषुवैश्वोषिकेषुधर्मेष्वागतेषुभवतिएव
मिहाप्यधिकागमसामान्याद्भैणभविष्यतियथाषाडहिकानांदृष्टानांभावादेकाहोविश्वजित्षडहस्तुकेतमेकाहंषडहस्ता
वद्दिनरतिएवमिहापिगोएस्यैवसमाप्तकः।तस्मान्नास्तिनामधेयाद्भेदमायारिति॥ ॥लिंगाच्च॥ ॥लिंगाच्चैतन्नलोभयतेयथाद्वि
स्त्राहिकंकर्तव्यमिति।किंलिंगंभवतिद्वाभ्यांलोमावद्यतिद्वाभ्यांत्वचं।द्वाभ्यामसृजं।द्वाभ्यांमांसमितिएवंषाडहिकाननुक्रम्य
हयद्द्वादशाहोपसदोभवंतिआलानमेतत्ल्लिरवदयतयतएतिद्वादशाहिकंधर्मद्वादशोपसत्त्वंदृश्योपपतिततदुपपद्यतेयदिद्वाद
शाहिकंधर्मजातंविरोधिकर्तव्यमितरथावैकाहिकंषडुपसत्त्वस्यात्तस्मान्नरूपामः।द्वादशाहिकंकर्तव्यमितितथेदमपरंलिंग
यस्यादशतिरिक्तामेकादशिस्यामालभेरन्प्रियंभ्रातृव्यमभीरिवेतातामयतस्वौदुपसूसमस्येपुः।कुवीरव्यवपद्यतेत्वात्ल्लिएवंतः।

पशावश्चालभंबतेनापियंश्चाद्यममसतिरिच्यतेन कनीय श्चायुः कुर्वीत इतिएकादशिन्यांविहारंस्याद्दशाहिकंवर्मद
श्रीयतिकथंविहारेसतितत्तिरेकः पशूनामापद्यते अतिरेकमयाद्द्वयोर्द्वयोः समासः एकादशधर्मप्राप्तौविहारोनस्यात्त
च्चैतद्दर्शनंनयुज्यते तस्मात्द्वादशाहिकंकार्यंनवापैत्यद्वोत्तत्कल्पविधानाद्दर्शकानामत्वादत्वेनद्वादशाहि
कंकार्यंकिंतर्हिऐकाहिकंकिंकारणंचोदकेनद्वादशाहिकंप्राप्तोतिनामधेयेनैकाहिकंनामधेयंबलवत्त्वादुबलीयः कुतःप्र
अध्यक्षं ५ त्यक्षत्वात्प्रत्यक्षंनामधेयंपुनर्विलंबितावपिप्रत्यक्षंवानुमा~~नि~~लीयः ४ चोदकस्त्वानुमानिकोनत्वविघ्नतोपिप्रत्यक्षः सत्यप्रत्य
तौप्रत्यक्षोविलंबितोत्वानुमानिकः। नामधेयं ४ नोबलीयः तस्मादैकाहिकंकार्यं॥ नन्वधिकार्थंनामधेयमित्युक्तं। अत्रोच्यते
अधिकानामधेयमित्युक्तं। अत्रो ~~च्यते~~ अधिकानामत्वादुक्तं अधिकानांत्वाद्योनास्ति इमेज्योतिरादयः त्वाद्याः कर्मना
मधेयानीत्युक्तं। अपिवानामधेयंस्याद्धेतुस्तत्रावदृष्टमभिधायकत्वादिति। यत्वधिकागमात्तदाख्यंस्यादिति। तत्रब्रूमः व
वनादयिकागमेननामधेयेनयत्नतेषसत्त्वत्वाद्दस्याभावादिति। नैतेकदाचित्पुरादिषुनसंतिकथंतेषामभावेत्वाद् राम ३१
स्याभावोदृष्टः यत्तुज्योतिष्टोमेनास्तिज्योतिरादित्वादइति। कर्मांतरत्वात्ज्योतिष्टोमेत्वायुरादिः त्वाद्योनास्तिनवर्म्भ

॰ःवात्। तस्मादेकाहिकं विरुद्धधर्मजातं कर्त्तव्यं इति। अधिकागमात्तदाख्यं स्यादेकाहवदिति एतस्यां द्वितीयव्याख्या
परिहारः। गौणः सन्ननुवादमात्रमनर्थकं स्यात्॥ तस्मात्पूर्वोक्तेन न्यायेन नामधेयं धर्म्मिणं प्रापकमिति॥ ॥लिंगं
संघातधर्म्मः स्यात्तदर्थापत्तेर्द्रव्यवत्॥ अथयल्लिंगमुपदिष्टं द्वादशोपसत्त्वदर्शने। तस्य कः परिहारः। उच्यते। लिंगं सं
घातधर्म्मः स्यात्। लिंगमेतत्संघातधर्म्मः स्यात्॰ द्वादशाहो हः संघातः सफलाय वोध्यते। द्वादशाहमृद्धिकामा उपयुरि
ति। गवामयनमप्यहः संघातोत्तरं तस्मिन्नेव कार्यफलसिद्धौ विधीयते। तत्र तत्राप्यर्यापत्या द्वादशाहधर्म्मा न प्राप्नुवन्ति
नवोदकेन द्रव्यवत्॥ यथा द्रव्यधर्म्माः व्रीहौ श्रुतास्ते तत्कार्यापन्नेषु प्रतिनिधिभूतेषु प्राप्यंते नवोदकेन तद्वत्॥ नवा
र्थधर्म्मत्वात् संघातस्य गुणत्वात्॥ नैतद्युक्तं कुतः अर्थधर्म्मत्वात्। अपूर्वधर्मत्वादित्यर्थः॥ अपूर्वधर्म्मा द्वादशोपसत्त्वं न
संघातधर्मः कस्मात् संघातस्य गुणत्वात्। इह न्यायप्रधानानि द्वादशाहानि इति द्वादशाहस्तेषां गुणो विशेषणमित्यर्थः। विशेष्य
वत्कार्यं प्रतीयते न विशेषणं। यथा राजपुरुष आनीयतामित्युक्ते पुरुष आनीयते न राजा। तथा यथा वस्त्रपृष्टं भुंक्ते देवदत्त इत्यु
क्तेन च्छाकं सूपो वा प्रतीयते यदेव प्रधानं तत्प्रतीयते। किमतः अतो हानिफलवंति न संघातः फलवतश्च धर्म्माः तस्माच्च

ला१

द्वादशोपसत्त्वं संघातधर्मः ॥ एवं चेन्न गवामयने कार्यापन्नितः प्राप्यते । अतो परिहारो यं । अर्थापन्नेष्वेषु धर्मत्वाभावः ॥
स्यात ॥ यद्युक्तं द्रव्यवदिति । युक्तं द्रव्येषु तत्राप्यतिदेशो हि कार्यापन्नानि वाराः । कार्यापन्नानि वाराः कार्याणीति तस्तद्धर्मांल्लभंते ।
इह पुनर्द्वादशोपसत्त्वं नैव संघातधर्मत्वेनोपदिष्टं हेतुः तस्माद्दृष्टांतो द्रव्यवदिति । आह कथं तर्हीदं लिंगदर्शनं ॥ ॥
अत्रोच्यते ॥ ॥ प्रवृत्त्यानियतस्य लिंगदर्शनं ॥ गवामयने द्वादशाहिकं प्रथममहः प्रायणीयोतिरात्रस्तस्य धर्मो द्वा
दशोपसत्त्वं तदुपादाने मुख्यस्यानुग्रहः षडुपसत्त्वोपादाने जघन्यानां ज्योतिरादीनां मुख्यस्य प्राप्तकालमनुग्रहः इति
कमित्येकं किंचित्कार्यं नास्ति अतस्तदनुग्रहार्थं द्वादशोपसत्त्वम [illegible] ख्यया प्रवृत्त्यानियतस्य ॥ तद्दर्शनं न चोदकप्रा
प्त्या । यस्माद्गोरक्तो नामधेयादबलः वक्ष्यति च विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्सधर्मत्वं मुख्यं वा पूर्ववचोदनाल्लो
कवदिति ॥ ॥ अथ पद्धतीयं लिंगदर्शनमुक्तं एकादशिनां विहारदर्शनं तत्रोच्यते ॥ ॥ विहारदर्शनं विशिष्टस्यानार
भ्यवादानां प्रकृत्यर्थत्वात् ॥ ॥ अनारभ्यैकादशिन्यो विहारः श्लिष्टः तदादिप्रमाणाः पात्रावस्थास्थातानेवानुवीनानु याम
हरहरालमेरनुआग्नेयमेवप्रथमेहन्यालमेरनुसारस्वतीमेषीं द्वितीये सौम्यं बभ्रुं तृतीये वारुणमं ततोथपुनः पर्या ४२

र्त्तेष्वाग्नेयमेवप्रथमेहन्यालभेरन्सारस्वतींमेषींद्वितीयेसौम्यंबभ्रुंतृतीयेवारुणंमंततइति।तदनारभ्यवा
दानांप्रकृतसमर्थताज्योतिष्टोमप्रविष्टंतत्राग्नावकुलस्याभावादसंभवादपरांप्रकृतिंद्वादशाहमागतंतत्रापि
पुनर्ज्योतिरादीनांपर्यावर्त्तेष्विष्टेतत्रयुज्यतइतितृतीयांप्रकृतिंगवामयनंप्रविष्टमेवमागतस्यैतद्दर्शनमिति।
॥ ॥छ॥ ॥ ॥इतिश्रीशाबरस्वामिकृतौमीमांसाभाष्येसप्तमस्याध्यायस्यचतुर्थःपादः॥ ॥छ॥ ॥
अध्यायश्चसमाप्तः॥ ॥शुभमस्तु॥ ॥ ॥छ॥ ॥राम॥ ॥श्री॥ ॥ ॥छ॥ ॥
[redacted]॥

राम
३२